Sanskrit Text of the TAntrarAja - transcribed by Mike Magee
Corrections welcomed. See also www.shivashakti.com

श्रीश्रीतन्त्रराजतन्त्रम्।

श्रीगणेशायनमः।

अथ तन्त्रराजः

प्रथमः पटलः।

अनाद्यन्तोऽपराधीनः स्वाधीनभुवनत्रयः।

जयत्यविरतो व्याप्तविश्वः काली विनायकः॥ १॥

भगवन् सर्व्वतन्त्राणि भवतोक्तानि मे पुरा।

नित्यानां षोडशानां च नवतन्त्राणि कृत्स्नशः॥ २॥

तेषामन्योन्यसापीक्ष्याज्जायते मतिविभ्रमः।

तस्मात्तु निरपेक्षं मे तन्त्रं तासां वद प्रभो॥ ३॥

शृणु कादिमतं तन्त्रं पूर्णमन्यानपेक्षया।

गोप्यं सर्वप्रयत्नेन गोपनं तन्त्रचेद्रितं॥ ४॥ ?

कथं कादिमतं नाम्ना तन्मे ब्रूहि महेश्वर।

कादिकालीतशक्ती स्तः पुरा तत्तन्मर्त मया॥ ५॥

प्रोक्ते तन्त्रे कादिकालीमताख्ये तेन नामतः।

शृणु तत्सर्वतन्त्राणां राजानं सर्वसिद्धिदम्॥ ६॥

कादिसंज्ञा भवद्रूपा मा शक्तिः सर्विसिद्धये।

तन्त्रं मदुक्तं भुवने नवनाथैरकल्पयत्॥ ७॥

तया तैर्भुवने तन्त्रं कल्पे कल्पे विजृम्भते ।

अवसानेषु कल्पानां सा तैः सार्द्धं व्रजेच्च मान् ॥ ८ ॥

आद्ये तन्त्रावतारादि द्वितीये नाथमण्डलम् ।

नित्योद्धारस्मृतीये स्यात् ललितार्चा तयोर्द्वयोः ॥ ९ ॥

नैमित्तकम् तथा काम्यमर्चनं षष्ठके भवेत् ।

कामेश्वरी सप्तमके परतो भगमालिनी ॥ १० ॥

नित्यक्लिन्ना तु नवमे भेरुण्डा दशमे स्मृता ।

एकादशे वह्निवासिनियथ वज्रेश्वरी मता ॥ ११ ।

त्रयोदशे भवेद्दूती त्वरिता स्याच्चतुर्दशे ।

कुलसुन्दर्य्यतोऽन्यस्मिन् नित्यानित्या तु षोडशे ॥ १२ ॥

ततो नीलपताका स्याद् विजयाऽष्टादशे परे ।

सर्वमङ्गलनित्याऽतो ज्वालामालिनिसंज्ञिका ॥ १३ ॥

एकविंशातिमे चित्रा कुरुकुल्ला त्वनन्तरे ।

त्रोविंशतिमे तु वाराहीध्यानानि तदानन्तरे ॥ १४ ॥

पञ्चविंशे मातृकाप्तिः षड्विंशे मन्त्रवैभवाः ।

सप्तविंशे श्वामरूपा अष्टाविंशे तु लोकता ॥ १५ ॥

अनन्तरे कुण्डल्कृतिस्तदुर्द्धं होमकर्म्म च ।

एकत्रिंशे तदूर्ध्वं च होमाः काम्या महोदयाः ॥ १६ ॥

त्रयत्रिंशे तु पटले यन्त्राणि फलभेदतः ।

चतुर्विंशे तु नामानि पञ्चत्रिंशेऽस्य वासना ॥ १७ ॥

षट्त्रिंशे स्वात्मकथनमध्यायास्तत्वविग्रहाः ।

प्रत्यध्यायं शतश्लोकाः स्यादेवं तन्त्रसंग्रहः ॥ १८ ॥

सुन्दरः सुमुखः स्वच्छः सुलोभो बहुतन्त्रवित् ।

असंशयः संशयच्छिन्निरपेक्षो गुरुर्मतः ॥ १९ ॥

सौन्दर्यमनवद्यत्वं रूपे सौमुख्यता पुनः ।

स्मेरपूर्वाभिभाषित्वं स्वच्छताऽजिह्मवृत्तिता ॥ २० ॥

सौलभ्यमप्पगर्वित्वं सन्तोषो बहुतन्त्रता ।

असंशयस्तत्वबोधे तच्छक्तिप्रतिपादनात् ॥ २१ ॥

नैरपेक्ष्यमवित्तेच्छा गुरुत्वं हितवादिता ।

एवंविधो हुरुज्ञ्नेयस्त्वितरः शिष्यदुःखदः ॥ २२ ॥

चतुर्भिराद्यैः संयुक्तं श्रद्धावान् सुस्थिराशयः ।

अलुब्धः स्थिरगात्रश्च प्रेक्षाकारी जितेन्द्रियः ॥ २३ ॥

आस्तिको दृढभक्तिश्च गुरौ मन्त्रे सदैवते ।

एवंविधो भवेच्छष्यस्त्वितरो दुःखकृठ्गुरोः ॥ २४ ॥

गुरूच्यमाने वचने दद्यादित्थं वचः मदा ।

प्रसीद नाथ देवेति तथेति च कृतादरम् ॥ २५ ॥

प्रणम्योपविशेत्पार्श्वेत्पार्श्वे तथा गच्छेदनुज्ञया ।

मुखावलोकी सेवेत कुर्य्यादादिष्टमादरात् ॥ २६ ॥

असत्यं न वदेदग्रे न बहु प्रलपेदपि ।
कामं क्रोधं तथा लोभं मानं प्रहसनं स्तुतिम् ॥ २७ ॥
चापलानि च जिह्मानि नर्माणि परिदेवनम् ।
ऋणदानं तथाऽऽदानं वस्तूनां क्रयविक्रयम् ॥ २८ ॥
न कुर्याद्गुरुणा सार्द्धं शिष्यो भूष्णुः कदाचन ।
यतो गुरुः शिवः साक्षात्तं स्तुवन् प्रणमन् भजेत् ॥ २९ ॥
यथा देवे तथा मन्त्रे यथा मन्त्रे तथा गुरौ ।
यथा गुरौ तथा स्वात्मन्येवं भक्तिक्रमः प्रिये ॥ ३० ॥
गुरोस्तु जन्मदिवसे कुर्यादुत्सवमादरात् ।
विशेषपूजां योगिभ्यो भोजनं तत्पदार्चनम् ॥ ३१ ॥
व्याप्ते दूरगते पूज्यं पूजयेदग्रजादिषु ।
एकदेशे नित्यसेवा दूरस्थे योजनक्रमात् ॥ ३२ ॥
एकादि ऋतुसंवृद्ध्या वर्षे षड्योजनान्तरे ।
ततोऽदूरगते सेवा तदाज्ञापरिपालनम् ॥ ३३ ॥
आसनं शयनं वस्त्रं भूषणं पादुकां तथा ।
छायां कलत्रमन्यच्च यत्तस्येष्टं तु पूजयेत् ॥ ३४ ॥
एकग्रामे पृथक्पूजां न कुर्यादननुज्ञया ।
पूजामध्ये समायाते पूज्ये नत्वा स्थितिं वदेत् ॥ ३५ ॥
विधेहि शेषमित्युक्तः कुर्यान्नो चेत्तदाज्ञया ।

वर्तेत सोऽपि तच्छेषं कुर्यान्निश्चलमानसः ॥ । ३६ ॥

पूजामध्ये गुरौ पूज्ये त्वन्ये वऽपि समागते ।

कृत्वमेवं समुद्दिष्टं मौनं तैर्न समाचरेत् ॥ ३७ ॥

गुरुं न मर्त्त्यं बुध्येत यदि बुध्येत तस्य तु ।

न कदापि भवेत्सिद्धिर्मन्त्रैर्वा देवपूजनैः ॥ ३८ ॥

मन्त्रेण तस्य नियतं पूजां कुर्य्याद्यथोदितां ।

तां च तत्पटले सम्यक् ज्ञात्वा भक्तिसमन्वितः ॥ ३९ ॥

नित्यानां त्रैपुराणां च नावेक्ष्यास्त्वंशकादयः ।

तथाप्यत्रोच्यते किञ्चिदभिचारादिसिद्धये ॥ ४० ॥

अश्विन्यादिषु ऋक्षेषु बिन्दुसर्गान्त्यवर्जितम् ।

चतुरो योजयेदाद्यान् बिन्दुसर्गौ तु सर्वगौ ॥ ४१ ॥

तेन मन्त्रादिवर्णेन नाम्नश्चाद्याक्षरेण च ।

गणयेद्यत्र षष्ठं वऽप्यष्टमं द्वादशं तु वा ॥ ४२ ॥

रिपोर्मन्त्राद्यवर्णं स्यात्  तेन तस्याहितं भवेत् ।

राशिष्वन्यत्र ऋक्षेषु सप्तपञ्चतृतीयगैः ॥ ४३ ॥

साध्यानामपि विज्ञेयमंशकाद्यमनुग्रहे ।

यतस्ते तत्त्वविज्ञानरहितास्ते न चेदितम् ॥ ४४ ॥

प्राक्प्रत्यग्दक्षिणेदक च सूत्रपञ्चकयोगतः ।

कोष्ठानि षोडशाऽत्र स्युस्तेषु वर्णान् क्रमाल्लिखेत् ॥ ४५ ॥

चतुश्चतुर्विभागिने कल्पयेत्तानि वै क्रमात्।

प्रथमप्रथमे त्वाद्यं द्वितीयप्रथमे तथा॥ ४६॥

द्वितीयमन्यतश्चान्यत् तथाऽन्यदपि कल्पयेत्।

तत्तकोष्ठेषु विलिखेत् तत्तत्पञ्चममक्षरम्॥ ४७॥

एवं चतुर्षुकोष्ठेषु क्षान्तावधि समालिखेत्।

स्वनामाद्यक्षरं यत्र कोष्ठे सन्दृश्यते ततः॥ ४८॥

सिद्धादीन् गणयेद्यावन्मन्त्राद्यक्षरदर्शनम्।

सिद्धसिद्धो जपात्सिद्ध्येत् ?

द्विगुणात्सिद्धसाध्यकः॥ ४९॥

सिद्धे सुसिद्धः सम्प्राप्य सिद्धारिर्हन्ति गोत्रान्।

साध्यसित्धेऽतिसंक्लेशात् साध्यसाध्योऽतिदुःखकृत्॥५०॥

सध्ये सुसिद्धो भजनात्साध्यारिः स्वां श्रियं हरेत्।

सुसिद्धसिद्धोऽध्ययनात् फलं दद्याद्यथेस्मितम्॥ ५१॥

सुसिद्धसाध्यो जापाद्यैः सिद्धये स्यादतोऽन्यथा।

सुसिद्धे तु प्रसिद्धस्तु पूर्वजन्मकृतश्रमः॥ ५२॥

तस्मात् तु सर्वसिद्धीनां साधने यो जपेन्मनुम्।

अभिचारे रिपोरेवं यदि स्वात्मविपत्तये॥ ५३॥

सुसिद्धोरिरशेषेण स्वकुलान्नाशयेत्ध्रुवम्।

अरिसिद्धः सुतं हन्यादरिसाध्यः स्वयोषितम्॥ ५४॥

अरिः सुसिद्धोमन्त्रस्तु कुलोत्सादनकृच्छनैः।
अर्यरिः स्वात्महा मन्त्रः सम्प्राप्त्यैव सुनिश्चितम्॥ ५५॥
नामाद्यक्षरसारभ्य यावन्मन्त्रादिवर्णकम्।
त्रिधा कृत्वा स्वरैर्भिन्द्यात् तदन्यद्विपरीतकम्॥ ५६॥
कृत्वाऽधिको ऋणी ज्ञेयो ऋणी चेन्मन्त्रमुत्तमम्।
स्वयं ऋणी चेतन्मन्त्रं त्यजेत् पूर्व ऋणी यतः॥ ५७॥
कथं ऋणित्वं मन्त्राणां साधकानां च मे वद।
पूर्वजन्मकृताभ्यासे पापादस्याफलाप्रिकृत्॥ ५८॥
पापे नष्टे फलावाप्तिः काले देहक्षयादृणी।
मन्त्रः सम्प्राप्तिमात्रेण प्राक्तनः सिद्धये भवेत्॥ ५९॥
सिद्धमात् गुरोर्लब्धमन्त्रो यः सिद्धिभाङ्नरः।
लक्ष्मीसदादनादृत्य मन्त्रे भोगमवाप्तवान्॥ ६०॥
सन्मन्त्रस्य ऋणी ज्ञेयो भजनं तस्य पूर्वगम्।
तस्मादृणविशुद्धिस्तु कार्या सर्वैस्तु सर्वतः॥ ६१॥
रुद्राक्षैरपि पद्माख्यैः पुत्रजीवैः कुचन्दनैः।
स्फाटिकैश्च प्रवालैश्च मौक्तिकैर्हे मनिर्मितैः॥ ६२॥
राजतैर्जपमाला स्यात् पूर्वं पूर्वं फलीद् गुरुः।
आदिक्षान्तैरक्षरैः स्यादक्षमाला यथार्थतः॥ ६३॥
अनुलोमविलोमाभ्यां मातृकान्तरितां जपेत्।

एवं सर्वगुणोपेतो जायते सर्वसिद्धिमाम्॥ ६४॥

तर्जनीरहितैः कुर्यादङ्गुल्यर्जपक्रियाम्।

अङ्गुलीपर्वसंस्पर्शादपि वा गणयेज्जपम्॥ ६५॥

अबुद्धिपूर्वं विहिते निषिद्धे कर्माणि द्रुतम्।

विद्यां कपेच्छतं तेन तत्पापान्मुच्यते ध्रुवम्॥ ६६॥

नित्यातिक्रमदोषाणां शान्त्यै विद्यां शतं जपेत्।

नैमित्तिकातिक्रमणे सहस्त्रं प्रजपेत्तदा॥ ६७॥

विशुद्धदेहवदनः शुक्लाम्बरधरः शुचिः।

विमुखः परनिन्दासु देवतादर्शनेषु च॥ ६८॥

परार्थवनिताभूमिपीडासु विगतस्पृहः।

दयान्वितः सर्वजने प्रेक्षाकारी गतस्पृहः॥ ६९

आस्तिको गुरुभक्तश्च नित्यशो नियमान्वितः।

यः स सर्वगुणोपेतो विद्यासिद्धिमवाप्नुयात्॥ ७०॥

अन्यथा वर्तमानो यो विद्याभजनवँअश्चिरम्।

न तस्य सिदभिः कुत्रापि कदाचिच्च कथञ्चन॥ ७१॥

आदौ योगो भवेदन्ते पल्लवः सम्पुतोद्वयोः।

एकान्तरं तु ग्रथनं विदर्भोत्व्य्व्यन्तरीकृतः॥ ७२॥

मन्त्रदोषांस्तु विज्ञाय गुरुः परिहरेत् क्षणात्

अन्यथा स गुरुः शिष्यं निहन्त्येवाचिरात् ध्रुवम्॥ ७३॥

तेन तत्परिहारश्च शृणु देवि समाहिता।

परिहारप्रकारन्तु वक्ष्ये योगेषु तत्त्वतः॥ ७४॥

दग्धः षट्कर्णगो मन्त्रः त्रस्तः स्यादधिकैर्जपात्।

गर्वितस्त्वविधिप्राप्तः शत्रवो वैरकोष्ठगाः॥ ७५॥

बाला लघ्वक्षरप्राया वृद्ध गुर्वक्षरान्विताः।

निर्जिता कर्मबाहुल्यादहसाः सत्ववर्जिताः॥ ७६॥

अपूर्णरूपाश्छिन्नाः स्युः स्तम्भिताः मानुनामिकाः।

अकालविनियोगेन प्रबोधः स्वापगा जपात्॥ ७७॥

मत्ताः पत्रेषु पठनादन्यवर्णैस्तु कीलिताः।

रुद्धा विसन्धिकाः प्राप्तदुःखा वैरिसमन्विताः॥ ७८॥

खण्डीभूतास्त्वंशजापादङ्गहीनास्त्वसंवृताः।

अपूर्णेनोपदिष्टाये हीनवीर्यास्तु ते मताः॥ ७९॥

सदा प्रयोगात् कुण्ठत्वं क्लि ष्टताऽतिविलम्बनात्।

गुरुणा (?) check with commentary mm

प्रलपनैर्जापादन्यमन्त्रैः सहाविलाः॥ ८०॥

उपेक्षावस्थया जापात् वैषम्यादवमानिताः।

पञ्चविंशतिरुद्दिष्टा दोषांस्तान् शमयेद्गुरुः॥ ८१॥

बन्धनं योनिमुद्राया मन्त्राणां वीर्ययोगनम्।

उभयं बोधयन् शिष्यं संरक्षेत्गुरुरात्मवान्॥ ८२॥

गुरोर्लक्षणमेतावदादिमान्त्यन्तु वेदयेत्।
आदिमान्त्यविहीनास्तु वर्णाः स्युः शरदभ्रवत्॥ ८३॥
तस्मादादित एवासौ कुर्यात्तत्तदहङ्कृतिः।
यदहङ्कारविज्ञानान्मत्समोजायते नरः॥ ८४॥
अनादिक्रमसं सिद्धमातृकाद्यन्तयोगनात्।
तादान्त्यसिद्धिं तां विद्धि सर्वमन्त्रार्हविग्रहाम्॥ ८५॥
द्विजातीनां तु संस्कारं वेदोक्तं समुदाहृतम्
तेषां च तत्र तत्रापि विद्यया विधिमाचरेत्॥ ८६॥
स विद्यास्मरणं कुर्यात् कियां सर्वत्र चोदिताम्।
तेन तन्मयतासिद्धिः सर्वत्र भवति द्रुहुवम्॥ ८७॥
अन्येषामपि वर्णानां विद्यया समुपाचरेत्।
निधने विद्यया दाहो विद्ययाऽन्यत् समाचरेत्॥ ८८॥
सम्पूज्य भोजयेदेकमनेकं वा स्वशक्तितः।
योगिनं विद्यया सिद्धं पूर्वतश्च निमन्त्रितम्॥ ८९॥
उर्मिकावसनाद्यैस्तं पूजयित्वा प्रणम्य च।
विद्यया विसृजेन्मन्त्री स्वविद्यासिद्धये शिवे॥ ९०॥
गुरोस्तु जन्मदिवसं विद्याप्राप्तिदिनं तथा।
स्वजन्मदिवसं नाथव्याप्तिवासरमेव च॥ ९१॥
अक्षरत्रयसम्पातदिनं पूर्णादिनं तथा।

षट्पर्वाणि विशिष्टानि सदर्शं सप्तपर्वकम् ॥ ९२ ॥
मासतो वर्षतो वाऽपि कुर्यादेतेषु पूर्वनम्
गुरोस्तु जीविते नित्यव्याप्ते तत्पुत्रकादिकम् ॥ ९३ ॥
पूजयेत्तत्समं तं च प्रणामाद्यैरुपाचरेत् ।
तदभावे तत्कुलीनं तद्भक्तं वा समर्चयेत् ॥ ९४ ॥
स्तुवीत पञ्चभिह् श्लोकैस्तन्नित्यं सर्वसिद्धये ।
प्रातः प्रबोधसमये जपात्सुदिवसं भवेत् ॥ ९५ ॥
नमस्ते नाथ भगवन् शिवाय शिवरूपिणे ।
विद्यावतारसंसिध्यै स्विकृतानेकविग्रह ॥ ९६ ॥
नवाय नवरूपाय परमार्थकरूपिणे ।
सर्वाज्ञानतमोभेदभानवे चिद् घनाय ते ॥ ९७ ॥
स्वतन्त्राय दयाक्लृप्तविग्रहाय शिवात्मने ।
परतन्त्राय भक्तानां भव्यानां भव्यरूपिणे ॥ ९८ ॥
विवेकिनां विवेकाय विमर्शाय विमर्शिनाम् ।
प्रकाशानां प्रकाशाय ज्ञानिनां ज्ञानरूपिणे ॥ ९९ ॥
पुरस्तात्पार्श्वयोः पृष्ठे नमस्कुर्यादुपर्यधः ।
सदा मे चित्तरूपेण विधेहि भवदासनम् ॥ १०० ॥
भुमिस्तत्त्वमयि व्याप्तिरिति सम्यक्समीरिता ।
अस्या निःफालनाच्चित्ते तत्तत्वं स्वात्मसात्तम् ॥ १०१ ॥

इति षोडशनित्यातन्त्रे श्रीकादिमते प्रथमं पटलम् ।

## अथ द्वितीय पटलम्

अथ नाथान् प्रवक्ष्यामि मद्रूपान् नित्यविग्रहान् ।
विद्यावतारमोनभूतांस्तत्पूजनं तथा ॥ १ ॥
प्रकाशोऽथ विमर्शोऽन्यस्त्वानन्दोऽपर इत्यपि ।
नामभेदादहं लोके कल्पयन् दिव्यरूपतः ॥ २ ॥
त्रयस्तेभ्यळ् सनुत्पन्नाः सिद्धाश्च त्रय एव ते ।
ज्ञानः सत्यः पूर्ण इति श्रिसुखास्ते समीरिताः ॥ ३ ॥
दिव्या मदन्तिके नित्यं सिद्धा भूमाविहापि च ।
निवसन्स्ति तत्स्तेभ्य समुत्पन्नास्त्रयस्तथा ॥ ४ ॥
स्वाभावः प्रतिभस्तह्वत् सुभगश्चेति नामतः ।
ते भूमविव स्ततं निवसन्ति मदात्मकाः ॥ ५ ॥
एवं तैर्नवभिस्तन्त्रं लोके प्रथितवेभवम् ।
अकल्पयत् कादिशक्तिस्त्वदनन्या कृते युगे ॥ ६ ॥
एते द्विनेत्रा द्विभुजा ललिताकारसंयुता ।
प्रसन्नवदनाः स्मेरा वराभयकरान्विताः ॥ ७ ॥
पूज्या एवंविधा स्वस्वमण्डलादिषु पूजने ।
देवी श्रीचक्रसंस्थास्तु देव्याकारास्तदाज्ञया ॥ ८ ॥

प्रियाक्षराभिधानास्ते सर्वेऽप्यानन्दसंयुताः ।

स्वमण्डलेषु नाथान्ताः शक्त्यन्ता देवि मण्डले ॥ ९ ॥

माया लक्ष्म्यादिकास्तद्वन्नवार्णाख्यास्तथा भवेत् ।

नवानां सर्वशक्तीनां देवतानां च पूजने ॥ १० ॥

या विद्या सर्वसन्तोषकारिणी सर्वसिद्धिदा ।

सप्ताक्षर्या तया देवि पूजयेन्नामपूर्वकम् ॥ ११ ॥

तां मे कथय विद्यां तु या सर्वप्रतियकारिणी ।

शृनु देवि महासिद्धिकरी सर्वप्रियंकरी ॥ १२ ॥

जवी मरुत्समोपेतो गोत्रा च धरया युता ।

प्राणोऽपि मरुता युक्तः स नभः स्यात् तृतीयकम् ॥ १३ ॥

पुनर्जवी क्ष्मयोपेत ज्या च वातसमन्विता ।

व्याप्तं मरुत्सखं षष्ठं नभऽग्निः सप्तमाक्षरम् ॥ १४ ॥

एवं सप्ताक्षरी प्रोक्ता शक्तितन्त्रेषु सिद्धिदा ।

सर्वासामपि शक्तिनां  देवतानां च नामभिः ॥ १५ ॥

योजयेन्नामपूर्वा सा सिद्ध्यै साधारणं तथा ।

शक्तितन्त्राद्बहिर्भूततन्त्रेषु नमसा स्थितिः ॥ १६ ॥

नवानां नव नामानि नवार्णानि पृथक् पृथक् ।

तानि सप्ताक्षरीयोगात्प्रत्येकं षोडशाक्षरम् ॥ १७ ॥

नित्याषोडशरूपाणि तानि ज्ञेयान्यनुक्रमात् ।

तेषां नवानां नामानि मण्डलीकरणं प्रिये ॥ १८ ॥

पारम्पर्य्यमिति प्रोक्तमाप्तिर्विद्यान्वयस्थितौ ।

तेन शुद्धेन शुद्धिः स्याद्विद्यायामन्यथाऽन्यथा ॥ १९ ॥

साधकानां तु नामानि दिनपर्यायतोपि वा ।

दिनाक्षराण्यपि तथा अमायोऽनन्त्यमेव च ॥ २० ॥

नाम पर्यायतः प्राप्तं कालावाप्रम्ति द्वयम् ।

प्रसिद्धं बाह्यतो यच्च त्रीणि नामानि साधके ॥ २१ ॥

तस्मात् सम्प्राप्तविद्यस्तु साधकस्तैस्त्रिभुः स्तुतम् ।

पूजाश्लोकस्तुतौः कुर्यात् पारम्पर्यप्रसिद्धये ॥ २२ ॥

गुरुमण्डलपूजां तु कुर्यात्सप्तसु पुर्वसु ।

पूर्णायां षोडशार्णानि नामान्यालिख्य पूजयेत् ॥ २३ ॥

अन्यत्र पर्वषट्के तु नवार्णान्येव लेखयेत् ।

पूजयेत्तत्र तत्रापि वदन् सप्ताक्षरीं शिवे ॥ २४ ॥

गुरुमण्डलपूज्ञासु सर्वत्र नव चोदिताः ।

उपचारास्ततस्तांस्तैः पूजयेत् शृनु तान्यपि ॥ २५ ॥

गन्धं पुष्पं तथा धूपं दीपं नैवेद्यकं  तथा ।

ताम्बूलं नमनं स्तोत्रं स्वात्मनेति समीरिताः ॥ २६ ॥

गुरुमण्डलनिर्माणं पीठे कुर्यान्महेश्वरि ।

फलकायां स्थले वापि सुशुद्धे सुसमे स्थिरे ॥ २७ ॥

प्राक्प्रत्यग्दक्षिणोदक च सूत्राणि दश विन्यसेत्।

पञ्चाङ्गुलान्तरालानि ततो देवेशि जायते॥ २८॥

एकाशीतिपदोपेतं चतुरस्रन्तु मण्डलम्।

तत्सर्वमध्ये प्रथमं द्वितीयन्त् पुरोगते॥ २९॥

तद्वामे तत्तृतीयं  चालिकेन्नवनवस्वपि।

एवं नवनवोपेतं मण्डलं सप्तपर्वसु॥ ३०॥

नवकं नवधा कृत्वा मध्ये सूत्रद्वयार्पणात्।

तेषु नामार्णनवकमालिख्याभ्यर्चयेत् क्रमात्॥ ३१॥

पूर्णा पर्वणि तन्मध्ये कृत्वा सूत्रत्रयं त्रयम्।

षोडशीकृत्य तेष्वेवं लिखेन्नामानि तानि वै॥ ३२॥

एवं पूजा गुरौ जीवत्युपेते माममूनि वै।

स्थानानि मण्डलीकृत्य तत्र चऽऽलेखने मते॥ ३३॥

एवं यः पूजयेन्नाथान् पुर्वस्ववहितः शिवे।

स देशिकवरः सिद्धः तस्माद्विद्याप्तिरुत्तमा॥ ३४॥

अन्यथाऽवाप्तिरुभयोरनर्थाय सुनिश्चितम्।

व्याधिधस्त्रादिपीडा वा चित्तभ्रान्तिर्जले मृतिः॥ ३५॥

इत्यादिव्यसनप्राप्तिर्नृपादशनितो मृतिः।

तस्मादुक्तक्रमेनाव कुर्यात् सर्वार्थसिद्धये॥ ३६॥

एकद्वित्रिचतुःपञ्चवर्षाण्यलोच्य योग्यताम्।

भक्तियुक्तान् गुणांश्चापि क्रमाद्वर्णेषु सङ्करे ॥ ३७ ॥
पश्चादुक्तक्रमेणैव वदेद्विद्यामनन्यधीः ।
अन्यथा चेद् वदेन्नाशं सशिष्यो गुरुराप्नुयात् ॥ ३८ ॥
चक्रे देव्यां तथा शिषे प्रतिष्ठ त्रिविधोच्यते ।
सा तु तत्त्वविदा कार्या सम्प्रदायानुरोधिना ॥ ३९ ॥
शिरे शुभग्रहोपेतेऽनुकूले गुणशालिनि ।
मुहूर्ते कारयेद् विद्वान् पूर्णायां वा शुभोदये ॥ ४० ॥
अक्षरत्रयसम्पातदिने पूर्णादिनत्रये ।
प्रोक्तेषु पचस्वन्येषु सर्वदा वा शुभोदये ॥ ४१ ॥
कुर्यात् प्रतिष्ठां सिद्धात्मा नत्वन्यो ज्ञानगर्वितः ।
गुर्वनुज्ञामृते मोहाल्लोभाद् वा कुरुते यदि ॥ ४२ ॥
सपुत्रदारो निधनं प्राप्नुवन्निरयं व्रजेत् ।
तस्मात् पूर्णाभिषेकेण प्राप्तानुज्ञः समाचरेत् ॥ ४३ ॥
क्षैद्राज्यदुग्धैः प्रथमं नालिकेराम्भसा ततः ।
अभिषिच्याथ तोयेन क्वथितेनाक्षरौषधैः ॥ ४४ ॥
आवाह्याभ्यर्च्य तल्लग्ने चक्रे संस्थ्याप्य पूजयेत् ।
नित्यातत्त्वाप्तिकालोत्थविद्ययाऽभ्यर्च्य ताः ख् क्रमात् ॥ ४५ ॥
स्पृशन् जपेत् कराग्रेण श्रीचक्रं पूजयेदपि ।
एवं दिनत्रयं कृत्वा ततो नित्यक्रमं भजेत् ॥ ४६ ॥

गन्धैः पुष्पैर्नवैर्धूपैर्दीपैर्नैवेद्यतर्पणैः ।

त्रिरात्रं पूजयेद्देवीं योगिनीयोगिभुः समम् ॥ ४७ ॥

एवं देवीप्रतिष्ठायां क्रमः सान्निध्यकारकः ।

गुरवे दक्षिणां दद्यात् प्रत्यक्षाय शिवात्मने ॥ ४८ ॥

सर्वस्वं वा तदर्धं वा तदर्धं वा तदाज्ञया ।

न चेत्तच्छक्तिसङ्क्रान्तिः कथमस्य भविष्यति ॥ ४९ ॥

गजाश्वमहिषीमेषपशुदासीमहीयुतम् ।

सुवर्णं भूषणं वासो भवनं वाऽन्यदीप्सितम् ॥ ५० ॥

दद्यत्स्वशक्तितां भक्त्या त्वशक्तो यदि सर्वथा ।

सर्वदासौ तदाऽयत्तस्तेन सिद्धिर्भविष्यति ॥ ५१ ॥

(

वामेशनामि संपूज्य तत्तत्फलमवाप्नुयात् ।

कार्या योगेषु योगेषु वाऽन्तरेष्वितरेष्वपि ॥

वारर्क्षतिथिसंप्रोक्तमन्त्रे वात्रेश्च दैवतैः ।

आवृत्तामर्चयेदग्निरक्षोवाग्वीशदिग्गतैः ॥

रोगशान्तिसमुद्योगफलानि समवाप्नुयात् ।

वाणामित्यधिया प्रोक्ता तिथिनक्षत्रदेवताः ॥

ऋक्षत्रक्षांस्तिथीनां च वद मे परमेश्वर ।

वह्निदस्राम्बुमाविघ्नो भुजगा षण्मुखो रविः ॥

मातरश्च तथा दुर्गा दिशो यक्षेश्वरो हरिः ।

यमो हरः शशी चेति तिथीशाः परिकीर्तिताः ॥

नक्षत्रदेवताश्चापि शृणु वक्ष्ये यथाविधि ।

अश्विनी च यमो वह्निर्धाता चन्द्रः शिवोऽदितिः ॥

गुरुसर्पाश्च पितरः अर्यमा भग एव च ।

दिनकृच्च तथ त्वष्टा मरुतेन्द्राग्निमित्रकाः ॥

इन्द्रनिर्ऋति यत्नानि विश्वे देवा हविस्तथा ।

अहिर्बुध्यस्तथा पूषा प्रोक्ता नक्षत्रदेवताः ॥

कारस्करश्चामलकोदुम्बरो जम्बुकस्तथा ॥

खदिरः कृष्णवंशौ च पिप्पली नागरोहिणौ ।

पलाशः प्लक्षकाम्बष्तः बिल्वार्जुनविकङ्कताः ॥

वरलः सरलः सर्जबकुलः पनसस्तथा ।

अर्कः शमी कदम्बश्चाभूंतो निम्बस्तथातिमः ॥

मदुकश्चेति सम्प्रोक्ता क्षाभानां क्रमादमी ।

अश्वं गजमदं मजं सर्पं सर्पिणी च विडालिक ॥

अक्षमाक्षरीमुखा मूषकि वृषमाहिषि ।

व्याघ्रश्च महिषो व्याघ्री गी मृगशुबी कपिः ॥

गोखण्डवानरा नारी तुरङ्गी च नगो (doublecheck)

गजाः ।

यदा रोगादिदुःखार्त्तिः भवेत्ततपूर्वमे सुतैः ॥

मुहूर्तैः संख्यया चेति शान्तिः स्याद्विगुणेनधीः ।
आधारे पञ्च चक्राणि स्वाधिष्ठाने चतुष्टयम् ॥
प्रोक्तेषु भावयेत्तानि तावन्ति मणिपूरके ।
अनाहते ततः पञ्च यन्त्राणि परिभावयेत् ॥
विशुद्धयाख्ये तु चत्वारि पञ्चाज्ञायोमिति क्रमात् ।
तत्तत्तिथिदिनेष्वेवं भावयेत् षोडषीं शिवां ।ह् ॥
तत्तच्चक्रगतां देवीं पूजयेत् सर्वसम्पदे ।
आधारादिषु चक्राणि भावयेद्ध्यानयोगतः ॥
ननु सर्वत्र सर्वाणि भावन्न कदाचन ।
भावयानामशक्तानां तत्तद्यन्त्राद्बहिस्तथा ॥
प्रोक्तान्याधारपद्मानि कृत्वा तत्रार्चयेद्विधिम् ।
एवं दिनेषु वारेषु पूजयेच्चक्रगतां शिवां ।ह् ॥
संपुज्य देवीमिष्टानि प्राप्नुवात् प्रोक्तवासरैः ।
बलिं च दद्यात्तेष्वेव वासरेषु यथाविधि ।
पञ्चाशन्मिथुनान्यत्र प्रोक्ते चक्रेर्द्धरात्रके (check) ॥
मध्याह्ने सन्ध्योश्चापि चक्रस्थानामपीश्वरी ॥
शक्तिचक्रं मन्त्रचक्रभानिनां गामिनां------- ।
कूतानां मन्त्ररूपाणि प्रोक्तानि स्फुटमीश्वरी ॥
वौस्तेषां तेषु कालेषु बलिं दद्यात्तथोत्तरैः ।

देव्यास्त्वनुग्रहप्रोक्तः निवैद्यैसिक्थकं महत् ॥

निधाय तस्य मधे तु कृत्वा दीपं घृतप्लुतम् ।

निधाय तत्र तन्मन्त्रैस्तु मिथुनानामनुक्रमात् ॥

प्रत्येकं देव्यानां स्तेन सिद्धिर्भविष्यति । )

उक्तलक्षनसम्पन्नं शिष्यमाचारभूषणम् ।

पञ्चषट्कूटविद्याभ्यां शोधितं बहुवासरैः ॥ ५२ ॥

कलशैरभिषच्याशु श्रीचक्रे सन्निवेश्य च ।

आधारे हृदये मूर्ध्नि चक्रं सञ्चिन्त्य मध्यतः ॥ ५३ ॥

स्वान्तादावाह्य संस्थाप्य संपूज्य न्याससंयुताम् ।

त्रिंशो विद्यां वदेत् कर्णे देव्यात्मा पूर्णमानसः ॥ ५४ ॥

देवतागुरुमन्त्रात्मतत्त्वैक्यं भावयेद्धिय (check)

।

शतं जपेत्तदग्रस्थो निकटे त्रिदिनं वसेत् ॥ ५५ ॥

नीचेत् संचारिणी शक्तिर्गुरुमेति न संशयः ।

तस्मात् तदन्तिके तस्य पूजादेशादिकृद्भवेत् ॥ ५६ ॥

तादात्म्यमात्मनो लभ्दं गुरोर्मन्त्रात्मनो यतः ।

तत्तस्तदा समारभ्य तदायत्तोधनादिभिः ॥ ५७ ॥

अथाभिषेकं द्विविधं समवाप्य तदाज्ञया ।

अनुग्रहादि कुर्वीत सिद्धये नान्यथा भवेत् ॥ ५८ ॥

विधाय चक्रं तन्मध्यो योन्यां कुम्भं निधाय तु।

क्वाथोदकैः समापुर्याभिषिच्याभिर्वदेन्मनुम्॥ ५९॥

क्रमागतसमाचारनिरते शक्तिशालिनि।

द्वितीयमभिषेकन्तु कुर्याद्दिव्यात्मसिद्धये॥ ६०॥

विरचा विपुलं चक्रं प्रतियोनि च षोडश।

त्रिकोणानि विधायात्र मध्ये कुम्भं तु विन्यसेत्॥ ६१॥

सौवर्णं राजतं ताम्रं काचं मार्तिकमेव वा।

पूरितं खारितोयेन कृतेनाक्षरौषधैः॥ ६२॥

निक्षित्प्य नवरत्नानि धान्यानि विविधानि च।

हिरण्यानि सताम्राणि वासोभ्यामभिवेष्तयेत्॥ ६३॥

रक्ताभ्यां चन्दनैश्चूतपनसाश्वत्यपल्लवैः।

शतक्रतुलताबह्यैः मातुलुङ्गफलान्वितैः॥ ६४॥

विधाय कलशानन्यानन्येष्वेकैकशोन्यसेत्।

साध्र्हं सहस्रं षट्त्रिंशत् पञ्चसंख्याः क्रमोदिताः॥ ६५॥

मध्ये चक्रेषु तोयादि कृत्वाऽऽवाह्याभिपूज्य च।

कालात्मनित्यामन्त्रांश्च जपित्वा पूर्ववासरे॥ ६६॥

जन्मर्क्षे प्रातरुत्थाय स्वनित्यां तत्र पूजयेत्।

सहस्रं प्रजपेत्यश्चाड्वोमं ?

कृत्वा समन्ततः॥ ६७॥

शृङ्गकाहलशङ्खादिवाद्यसङ्गीतनर्तनैः ।
मुदितैर्योगिनीवृन्दैरेकैकं देवतात्मभिः ॥ ६८ ॥
वृतैः सम्पूजितैः सार्द्धमभिषिञ्चेद्गुरुः स्वयम् ।
स्वक्रमं तस्य कथयेत्तदा प्रभृति सोऽपि तम् ॥ ६९ ॥
अनुतिष्ठेदविच्छिन्नं पर्यायं तस्य विच्युतौ ।
सहस्रं प्रजपेत्विद्यामभिषेकसमन्वितम् ॥ ७० ॥
अथवा षण्णवत्यस्तु कलशांस्तत्र विन्यसेत् ।
तेषु शक्तौः समावाह्य सम्पूज्यैवाभिषेचयेत् ॥ ७१ ॥
एकं वा कलशं जन्मदिने कृत्वाऽभिषेचयेत् ।
एवं नैमित्तिकं नित्यमविच्छिन्नं समाचरेत् ॥ ७२ ॥
नाथैस्तत्वैश्च नित्याभिः कालनित्या तु विद्यया ।
आधारे हृदये शीर्षे वह्नौ सूर्ये निशाकरे ॥ ७३ ॥
ध्यायंस्त्रिसन्ध्यं प्रजपेत् सवर्गे व्यञ्जनस्वरम् ।
न्यसेच्च मातृकास्थाने तदा तद्देहसिद्धये ॥ ७४ ॥
ग्रहाणां वैपरीत्येषु जन्मर्क्षे ग्रहणे द्वयोः ।
कुहूप्राप्तौ रिपुक्लेशे कुर्यादेवाभिषेचनम् ॥ ७५ ॥
तेन दोषाः स्पृशन्त्येनं न कदाचन तद्बलात् ।
क्षुद्रानि क्रूरकर्माणि कृत्याश्च रिपुकल्पिताः ॥ ७६ ॥
बलं कथं भवेत् तस्य सेकस्य परमेश्वर ।

ब्रूहि मे तद्बलं येन क्लेशा नश्यन्त्यशेषतः ॥ ७७ ॥

सोमसूर्याग्निरूपेण जलेन स्पर्शमात्रतः ।

नश्यन्त्यशेषतो दोषाः तस्मात्सेकसमो न हि ॥ ७८ ॥

सोमसूर्याग्निरूपत्वं जलस्योपरि कीर्तितम् ।

तस्मादशेषदुःखार्तिशान्त्यै स्यादभिषेचनम् ॥ ७९ ॥

सप्तसूत्रेषु कालेषु पुण्येष्वन्येषु चादरात् ।

कुर्यात्सदक्षिणां पूजां गुरोः प्रत्यब्दमेव वा ॥ ८० ॥

उक्तेषूत्पातजातेषु पूजयेत् स्वर्णपुष्पकैः ।

अभिषिक्तस्तु विधिना प्रदद्याद्दक्षिणां गुरोः ॥ ८१ ॥

गुरुं तदग्रतः प्राप्तविद्यं तदनुजं तथा ।

गुरोर्गुरुं तद्गुरुं च स्वाग्रतो लब्धविद्यकात् ॥ ८२ ॥

प्रणामपूजास्तवनसेवादिभिरुपासनैः ।

तोषयेदन्यथा शक्तिः स्वीया तद्गामिनी भवेत् ॥ ८३ ॥

चन्दचन्दनकाश्मीरलघुकस्तूरिकायुतैः ।

पङ्कैर्विदध्यात्सर्वत्र गुरुमण्डलकल्पनम् ॥ ८४ ॥

पूजान्ते मार्जयित्वा तद्भाले चोरसि चांसयोः ।

धारयेत्सर्वतो लक्ष्मीं रसस्यात्परमेश्वरी ॥ ८५ ॥

पूर्वोक्तमण्डलेष्वेव यानि स्थानानि पूजने ।

प्रोक्तानि तानि सर्वाणि पद्मानि परिकल्पयेत् ॥ ८६ ॥

पूजादाववसाने च पञ्चश्लोकान् जपेत्ततः ।

देव्यात्मत्वं गुरोर्लब्ध्वा श्लोकद्वादशकं जपेत् ॥ ८७ ॥

गणेषग्रहनक्षत्रयोगिनीं राशिरूपिणीम् ।

देवीं मन्त्रमयीं नौमि मातृकां पीठरूपिणीम् ॥ ८८ ॥

प्रणमामि महादेवीं मातृकां प्रमेश्वरीम् ।

कालहल्लोजलोल्लोलकलनाशमकारिणीम् ॥ ८९ ॥

यदक्षरैकमात्रेऽपि संसिद्धे स्पर्द्?

ते नरः ।

रविताक्ष्र्येन्दुकन्दर्पशङ्करानलविष्णुभिः ॥ ९० ॥

यदक्षरशशिज्योत्स्नामण्डितं भुवनत्रयम् ।

वन्दे सर्वेश्वरीं देवीं महाश्रीसिद्धमातृकाम् ॥ ९१ ॥

यदक्षरमहासुत्रप्रोतमेतज्जगत्रयम् ।

ब्रह्माण्डादिकटाहान्तं तां वन्दे सिद्धमातृकाम् ॥ ९२ ॥

यदेकादशमाधारं बीजं कोणत्रयोद्भवम् ।

ब्रह्माण्डादिकाटाहान्तं जगदद्यापि दृश्यते ॥ ९३ ॥

अकचादिटतोन्नद्धपयसाक्षरवर्गिणीम् ।

ज्येष्ठाङ्गबाहुहृत्पृष्ठकटिपादनिवासिनीम् ॥ ९४ ॥

तामीकाराक्षरोड्वारां सारात्सारां परात्पराम् ।

प्रणमामि महादेवीं परमानन्दरूपिणीम् ॥ ९५ ॥

अद्यापि यस्या जानन्ति न मनागपि देवताः ।

केयं कास्मात् कृत्वेनति सरूपारूपभावनाम् ॥ ९६ ॥

वन्दे तामहमक्षव्यमातृकाक्षररूपिणीम् ।

देवीं कुलकलोल्लोलप्रोल्लसन्तीं परां शिवां ॥ ९७ ॥

वर्गानुक्रमयोगिन यस्या मात्राष्टकं स्थितम् ।

वन्दे तामष्तवर्गोत्थमहासिद्धयष्टकेश्वरीं ॥ ९८ ॥

कामपूर्णजकाराद्यश्रीपीथान्तर्निवासिनीम् ।

चतुराज्ञाकोशभूतां नौमि श्रीत्रिपुरामहम् ॥ ९९ ॥

इति द्वादशभि श्लोकैः स्तवनं सर्वसिद्धिकृत् ।

देव्यास्त्वखण्डरूपायाः स्तवनं तव तद्यतः ॥ १०० ॥

तोयतत्वमयी व्याप्तिरिति सम्यक् प्रदर्शिता ।

अस्या निःफालनाच्चित्ते तत्तत्वं स्वात्मसात्कृतम् ॥ १०१ ॥

इति षोडशनित्यातन्त्रेषु श्रीकादिमते द्वितीयं पटलम् ।

## अथ तृतीयं पटलम्

अथ षोडशनित्यानां क्रमाद्विद्यास्तु षोडश ।

वाराह्या कुरुकुल्लाया आत्मनेऽष्टाक्शरस्य च ॥ १ ॥

भूतानां च बलेश्चैव क्रआन्मन्त्रांन्श्छृणु प्रिये ।

प्राच्यते साधुमङ्केतैर्लिपीनां प्रागुदीरितैः ॥ २ ॥

हृत्प्राणेलाहंसदाहवह्निखैर्ललितेरिता।
निविधा हंसभेदेन शृणु ताश्च यथाक्रमम्॥ ३॥
हंसाद्ययाऽऽद्या सध्या स्यादादिमध्यस्थहंमया।
तृतीया प्रकृतिः सैव तुर्या तैरग्त्यमायया॥ ४॥
आसु तुर्या भवेन्मुक्त्यै तिस्रोऽन्यः स्युश्च सम्पदे।
इति त्रिपुरसुन्दर्या विद्या सम्यक् समीरिता॥ ५॥
सुचिः स्वेन युतस्त्वाद्यो ललिता स्याद्वितैयहकः।
स्यन्यमग्नियुतं पस्चाद्रयि व्याम्न संयुतः॥ ६॥
प्राणो रसाग्निशिः सून्ययुग्मं चरन्वितम्।
नभो गोत्रा पुनश्चैषा दह्न समयोजिता॥ ७॥
अम्बु सच्चरसंयुक्तं वनशक्तियुतं च त्।
एषा कामेश्वरी नित्या कामदैका दशाक्शरा ॥ ८॥
कामेश्वर्यादिरादिः स्याद्रसस्चाथ स्थिरा रमः।
धरायुक् सचरा पस्चात् स्थिरा पस्चाद्रसः स्मृतः॥ ९॥
शिराशुन्येऽग्निसंयुक्ते रसः स्यात्तदनन्तरम्।
शिरा भूःसहिता गोत्रा सदाहोग्नी रसः स्थिरा॥ १०॥
नव्हश्च मरुता युक्तं रसा चरसमन्विता।
तता रसः स्थिर पस्चान्मरुता सह योजिता॥ ११॥
अम्बु हंसस्च सचरो रसिऽथ स्यात्स्थिरायुतः।

स्थिरा धरान्विता हंसो व्याप्तेन च चरेण च ॥ १२ ॥
रसः स्थिरा ततो व्याप्तं भूयुतं शून्यमग्नियुक् ।
रसः स्थिरा ततः साग्निः शून्यं जवियुतो मरुत् ॥ १३ ॥
रयः शून्यं चाग्नियुतं हृद्दाहः साम्बवतः परम् ।
रसः स्थिराऽम्बु च वियत् स्वयुतं प्राण एव च ॥ १४ ॥
दाहोग्नियुग्रसस्तस्मात् स्थिरा क्श्मा दाहसंयुता ।
सचरश्चजवी पूर्वविद्यातातिर्यतः क्रमात् ॥ १५ ॥
चतुष्टयमथार्णानां रसस्तदनु च स्थिरा ।
हृदम्बुयुक् क्श्मया दाहः सचरः स्याज्जवी च हृत् ॥ १६ ॥
दाहोऽम्बुमरुता युक्तो व्योम साग्नी रसस्ततः ।
स्थिरा तुऽपि मरुता युक्ता शून्यं साग्नि नभश्चरौ ॥ १७ ॥
हंसो व्याप्तमरुद्युक्तः शून्यं व्याप्तमतोऽम्बु च ।
दाहो गोत्रा चरयुता तथा दाहस्तथा रयः ॥ १८ ॥
हृड्वरासहितं दाहरयौ चरसमन्वितौ ।
रसः स्थिरा ततः प्राणो रसाग्निसहितो भवेत् ॥ १९ ॥
शून्ययुग्मं चरयुतं ततः पूर्वमतः परम् ।
शून्ययुग्मं च गोत्रा स्यात् दाहयुक्ताम्बुनाआ चरः ॥ २० ॥
प्राणो रसाचरयुतो गोत्रा व्याप्तमतःपरम् ।
गोत्रा दाहमरुद्युक्त त्वम्बु व्याप्तमतो भवेत् ॥ २१ ॥

वातो नभस्च भूयुक्तं वास्चरेण समन्वितम्।
रसः स्थिराऽम्ब्वग्नियुतं वायुयुग्मं चरान्वितम्॥ २२॥
ग्रासोधरायुतः पस्चाद्रसः शक्त्या समन्वितः।
ग्रासो भूःसहितो देवि रसो व्याप्तं ततश्च हृत्॥ २३॥
दाहेनाम्बु च हृत्पस्चात् रयोऽम्बुमरुदन्वितः।
शून्यं च केवलं भद्रे रसस्च सचरा स्थिरा॥ २४॥
वियदम्बुयुतं दाहस्त्वग्नियुक् स्वयुतः शुचिः।
भूमी रसाक्स्मास्वयुता पञ्चैकान्तरिताः स्थिताः॥ २५॥
तदन्तरितबीजानि स्वसंयुक्तानि पञ्च वै।
तानि क्रमात् ज्या सचरो रसो भूश्च नभोयुता॥ २६॥
हंसश्चरयुतो द्विःस्यात् ततः प्राणो रसाग्नियुक्।
शून्ययुग्मं चरयुतं हृद्दाहोऽम्बु मरुद्युतः॥ २७॥
व्योमाग्निसहितं पस्चाद्रसस्च मरुता स्थिरा।
शून्यं साग्नि नभः कुर्याच्चरेण सहितं प्रिये॥ २८
अम्बु पश्चाद्वियत्तस्मान्नभस्तु मरुदन्वितम्।
शून्यं व्याप्तं च हृद्युक्तं रयदाहस्ववह्निनिभिः॥ २९॥
हंसः सदाहोऽम्बुरसाचरस्वैः संयुतो भवेत्।
हंसः स्याद्दाहवह्निखैर्युक्तमन्त्यस्य्दीरितम्॥ ३०॥
पञ्चत्रिंशच्छतार्णैः स्यान्नित्याऽसौ भगमालिनी।

कथिता परमेशानि वनिताजनमोहिनी ॥ ३१ ॥

हंसस्तु दाहवह्निस्वैरुक्तः प्रथमनुच्यते ।

कामेश्वर्यास्तृतीयादिवर्णामष्टकं भवेत् ॥ ३२ ॥

हृदम्बु मरुता युक्तं हंसस्च मरुता युतः ।

एकादशाक्शरी नित्यक्लिन्ना नित्या समीरिता ॥ ३३ ॥

वनितानवनीतानां द्रावकोऽग्निर्जपादिना ।

जायते साधको नित्यं कन्दर्पाधिकसुन्दरः ॥ ३४ ॥

भूः स्वेन युक्ता प्रथमं प्राणो दाहिन तद्युतम् ।

रसो दाहेन तद्युक्तं प्रानो दाह वन स्व युक् ॥ ३५ ॥

कं च दाहेन तदुक्तं प्रभा दाहेन तद्युता ।

ज्या च दाहेन तद्युक्ता नित्यक्लिन्नान्ततता द्वयम् ॥ ३६ ॥

एषा नवाक्शरी नित्या भेरुण्डा सर्वसिद्धिदा ।

यस्याः स्मरणतो नश्येद्गरलं त्रिविधं क्शणात् ॥ ३७ ॥

भेरुण्डाआद्यमिहाद्यं स्यान्नित्यक्लिन्नाद्यनन्तरम् ।

ततोऽम्बु शून्यं हंसाग्नियुक्तम्बु मरुद्युतम् ॥ ३८ ॥

हृदग्निना युतं शून्यं व्याप्तेन शचिना च युक् ।

शून्यं नभःशक्तियुतं नवार्णेयमुदीरिता ॥ ३९ ॥

नित्या सर्वार्थदा वह्निवासिनी विश्वघस्मरा ।

यस्यः स्मरणतो वश्यं जायते भुवनत्रयम् ॥ ४० ॥

वितीयं वह्विवासिन्या नित्यक्लिन्ना चतुर्थकं।

पञ्चमं भगमालाद्यं भेरुण्डाया द्वितीयकम्॥ ४१॥

नित्यक्लिन्नाद्वितीयं च तृत्यं षष्ठसमतमी।

अष्टमं नवमं पस्चादितेदाद्यमितीरितम्॥ ४२॥

महावज्रेश्वरी नित्या द्वादशार्णा समीरिता।

कान्तारसागरक्रूरदुःखसण्घाततारिणी॥ ४३॥

वज्रेश्वर्यन्त्यमाद्यं स्याद्वियदग्नियुतं ततः।

अम्बु स्यान्मरुता युक्तं गोत्रा क्श्मासम्।युता ततः॥ ४४॥

रयो व्याप्तेन शुचिना युतं स्यात् तदन्तरम्।

अत्यार्णैर् वह्विवासिन्या दूती नित्या समीरिता॥ ४५॥

सप्ताक्शरी समस्तापत्तारिणी विश्वरञ्जनी।

श्रीकारी शिवतावाप्तिकारिणी सर्वसिद्धिदा॥ ४६॥

आद्यन्तु वह्विवासिन्या दूत्यादिस्तदानन्तरम्।

हंसो धारस्वसंयुक्तः तेजस्चरसमन्वितम्॥ ४७॥

वायुः प्रभा चरयुता ग्रासः शक्ति समन्वितः।

ह्वदा रयेण दाहेन वह्निः स्यादष्टमं प्रिये॥ ४८॥

हंसः क्श्मास्वयुतो ग्रासस्चरयुक्तो द्वितीयकम्।

द्युतिर्नादयुता नित्या त्वरिता द्वादशाक्शरी॥ ४९॥

लक्स्मीकान्तियशोविद्याधनारोग्यायुराप्तिकृत्।

विषुदुःखप्रशमनी सर्वाभीष्टाप्तिकारिणी ॥ ५० ॥

शुचिः स्वेन युतस्त्वाद्यो रसा वह्निसमन्वितः ।

प्राणो द्वितीयः स्वयुतो वनहृच्छक्तिभिः परः ॥ ५१ ॥

इतीरिता त्र्यक्सरी स्यानित्याऽसौ कुलसुन्दरी ।

यस्याः स्मरणमात्रेण सर्वज्ञत्वं प्रजायते ॥ ५२ ॥

हंसश्च हृत्प्राणरसादाहकुर्भिः समन्वितः ।

विद्यया कुलसुन्दर्या योजितः सम्प्रदायतः ॥ ५३ ॥

नित्या नित्या त्र्यक्सरा स्यात् षड्भिः कूटाक्शरैर्युता ।

प्रतिलोमादिभी रूपै द्वात्सप्ततिभिराहता ॥ ५४ ॥

यस्या भनतः सिद्धो नरः स्यात् खेचरः सुखी ।

निग्रहानुग्रहौ चास्य जायते स्वेच्छयाऽनिशम् ॥ ५५ ॥

त्वरितोपान्त्यमाद्यं स्याद् द्युतिर्दाहचरस्वयुक् ।

हृच्च दाहक्स्मास्वयुतं वज्रेशी पञ्चमं ततः ॥ ५६ ॥

मरुत् स्वयुक्तो मध्याद्ये दशभ्याः क्रमशः स्मृते ।

भूमी रसाक्श्मास्वयुता वज्रेशी षष्तः क्रमात् ॥ ५७ ॥

षडक्शराणि त्वरिता तृतीयं तदनन्तरम् ।

द्युतिर्दाहचर्स्वेन अस्या आद्यमनन्तरं ॥ ५८ ॥

उक्ता नीलपताकख्या नित्या सप्तदशाक्शरी ।

समरे विजयं खड्गपादुकाञ्जनस्सिद्धिदा ॥ ५९ ॥ ।

वेतालपक्शिणीचेटपिशाचादिप्रसाधनी ।
निधानविसिद्धान्नसाधनी कामदोदिता ॥ ६० ॥
रसा नभस्तथा दाहो व्याप्तं क्श्मा वनउर्विका ।
खेन युक्ता भवेन्नित्याविजयैकाक्शरी मता ॥ ६१ ॥
वादेषु समरे कृच्छ्रे व्यवहारे सदा जयम् ।
विधत्ते स्मरणादेव विजया विश्ववैभवा ॥ ६२ ॥
हृदम्बुवनयुक्तं खं नित्या स्यात् सर्वमण्गला ।
एकाक्शर्यऽबता सिद्धो जायते खेचरः क्शणात् ॥ ६३ ॥
भूःशून्ये नभसा भूश्च रसश्चाथ स्थिराम्बु च ।
रयोऽग्निना युतो ज्याऽम्बु मरुद्युक्ता रसा मरुत् ॥ ६४ ॥
नभश्च मरुता युक्तं रसाशून्येऽग्निसं।युते ।
गोत्रा चरेण सहिता अम्बु पूर्वाक्शरं तथा ॥ ६५ ॥
अम्ब्वग्नी हृत् सदाहाम्बु रसक्श्मारयहृत्स्वयुक् ।
हंसश्च मरुता दाहः प्राणश्च मरुत युतः ॥ ६६ ॥
दाहः साग्निः प्राणअरौ ज्या मरुत्सहिता रयः ।
चरेणाम्बु च गोत्रा हृत्साग्नि ज्याम्बुरस स्वयुक् ॥ ६७ ॥
रयः साग्नि ज्याम्बु रसा पुनरेतै जवी ततः ।
दाहेनानेन ते ह्विः स्यात् हंसो दाहमरुत्स्वबुक् ॥ ६८ ॥
हंसश्च दहवह्निस्वैर्दाहिक्श्मास्वयुतश्च सः ।

सप्त दाहास्ततोऽस्याः स्युरष्टमाद्यास्तु पञ्च वै ॥ ६९ ॥

उमान्त्याधःस्थितं नीलपताकाय अनन्तरम् ।

त्वरितान्त्यश्च भेरुण्डा अष्टमं नवमं तथा ॥ ७० ॥

ज्वालामालिनिनित्याऽसौ त्रिषष्ठ्यर्णससौरिता ।

वेधाकर्षणसन्तापवश्याविशकरी भवेत् ॥ ७१ ॥

वाप्राणवनस्वैः सा चित्रा स्यादक्शरद्धया ।

या सिद्धिधनधान्यात्मनिधिलाभाय कल्पते ॥ ७२ ॥

शुचिः स्वेनाथ शून्यं स्यान्नभसा भूरसः स्थिरा ।

अम्बु पश्चादयः साग्निर्मरुताऽम्बुरयी तथा ॥ ७३ ॥

इलायुतोऽग्निरेतानि पुनरम्बु मरुद्युतम् ।

दाहश्च मरुता हंसस्त्वग्निरेतत्रयम् पुनः ॥ ७४ ॥

अम्बुदाहो मौर्द्युक्तो हंसोऽथधरया नभः ।

तेजोऽग्निना पुनः पञ्च वातः स्वेन समायुतः ॥ ७५ ॥

तोयं चरेण तत्पूर्वं तोयमद्रियुतं ततः ।

शून्यं च्याप्तेन शुचिना शुन्यं शक्त्या नभोयुतम् ॥ ७६ ॥

दाहोधरास्वसिद्धितस्तोयं चरसमन्वितम् ।

एतत्पूर्वमधः प्रोक्तचतुष्टयमतः परम् ॥ ७७ ॥

ज्या स्वेन युक्ता सचरो रसश्चैतस्य पूर्वकम् ।

हंसोऽग्निना प्राक्त्रितयं हृदयं स्वसमायुतम् ॥७९ ॥

रसश्चरेण तत्पूर्वमग्निना च रसा युतः।
पस्चाद्युक्तत्रयं वाताधरया च नभः प्रिये॥ ८०॥
प्राणः स्वेन युतः पस्चाद्त्रहृदयं स्वयुतं रसः।
व्याप्तमेतत्त्रयं अस्चाद्धृद्दाहेनाबुसंयुतम्॥ ८१॥
गोत्र धरायुता स्पर्शो नादयुक्तो जवी युतः।
दाहेन पूर्वं पूर्वं च पूर्वं च मरुता युतम्॥ ८२॥
शून्यं मरुत्स्वसहितं हृद्दाहेनाबुना चरः।
स्पर्शो मरुत्स्वसहितो हृद्दाहेनम्बुसंयुतम्॥ ८३॥
ज्याग्निः स्वसंयुतो हंसः तथाम्बु मरुता सह।
हृदयेन स्वेन युतं रसश्च स्वेन संयुतः॥ ८४॥
प्राणदाहौ धरायुक्तौ पुनस्ती वह्निना वियत्।
वार्दाहयुक्तमम्बुस्याद्वियद्ययप्तस्वसंयुतम्॥ ८५॥
पूर्वद्विरुक्तवर्णौ च शुचिः स्वेन युतस्तथा।
स्थिरा रसा वनस्वेन दावू हंसो धरस्वयुक्॥ ८६॥
द्युतिर्नादवती पस्चाद् हृदम्बु मरुता युतम्।
हंसश्च मरुता विद्या दशोत्तरशताक्शरी॥ ८७॥
वाराही पञ्चमी विश्वविजया भद्रकौमुदी।
वार्ताकू चेतिविख्याता स्तम्भनाद्यखिलेष्टदा॥ ८८॥
प्राणदाहौ धरायुक्तौ पुनराद्यं रसे मरुत्।

व्याप्तं मरुच्चक्रियुतं भूःस्वयुक्ता ततस्त्रयम् ॥ ८९ ॥

अस्यादौ तु रसायुग्मं चरेण समयोजितम् ।

दाहेन वह्निशक्तिभ्यां युतो हंसस्ततःपरम् ॥ ९० ॥

नञो द्विर्हृत्सदाहाम्बु ज्या शून्यं स्वनसंयुतम् ।

अम्बु पस्चाद्वियद्युक्तं मरुता तु नभः प्रिये ॥ ९१ ॥

शून्यं व्याप्तं भुवा हंसः पूर्वान्त्यौ स्यान्मनुत्रयम् ।

अस्य षष्ठदिपञ्चार्णदन्त्यौ स्यादाद्य ईरितः ॥ ९२ ॥

एकादशाक्शारादन्त्यौ वितीयः स्मुदीरितः ।

तृतीयः पञ्चविंशार्णः प्रोक्ता मन्त्रा इति क्रमात् ॥ ९३ ॥

भूःस्वेन हंसो दाहवह्निस्वयुतः स्वेन हंसकः ।

हृन्मायया भुवा हृत्स्यात् सेवेन हंसः समन्वितः ॥ ९४ ॥

कुरुकुल्लान्त्यवर्णौ च स्यादात्माष्टक्शारः स्मृतः ।

सर्वभीष्टार्थसंसिद्ध्यै सुलभोऽयं सुरद्रुमः ॥ ९५ ॥

सङ्केतोदोरितैर्वर्णैर्डशाभिर्दशभिः पृथक् ।

प्राणाग्नीलाऽऽम्बुशाखाभिः शक्तिसप्ताक्शरीयुतैः ॥ ९६ ॥

भूतमन्त्राः समुद्दिष्टाः पञ्च सर्वार्थसिद्धिदाः ।

येषामालोकतो विश्वं वर्तते सचराचरम् ॥ ९७ ॥

पूर्वस्याद्यौ च तत् पूर्वं चतुर्दशतदन्त्यकौ ।

अम्बुनाग्निर्वाः स शून्यं प्राणो जलरयान्वितः ॥ ९८ ॥

रसः स्याद्व्याप्तमायाभ्यां तृतीयोऽस्य चतुर्थकः।
रसः क्ष्म्या रयो युक्तस्त्वरेण परमेश्वरि॥ ९९॥
रसो युक्तो व्याप्तभूम्यां हंसः क्ष्मास्वयुतस्ततः।
पूर्वान्त्यवर्णाविद्युक्तः षोड्शाऽन्तो बलेर्मनुः॥ १००॥
वह्नि तत्त्वमयी व्याप्तिरिति सम्यक् सभीरिताः।
अस्या निःकालनात् चित्ते तत्तत्वं स्वात्मसात्कृतम्॥ १०१॥
इति षोडशनित्यातन्त्रेषु श्रीकादिमते तृतीयं पटलम्।

अथ चतुर्थपटलारम्भः।
अथ षोडशनित्यानामद्याया पूजनं प्रिये।
कथयामि क्रमेणैव नित्यं सर्वार्थसिद्धिदम्॥ १॥
नैमित्तिकं तथा काम्यं शृणु त्वं तटलैस्त्रिभिः।
येनातिपापयुक्तोऽपि सिद्धिमेति सुनिश्चतम् ॥ २॥
न्यासत्रस्य मन्त्रास्च आसनानां चतुष्टयम्।
आवाहनमनुं पस्चात् समस्तार्चामनुं तथा॥ ३॥
मुद्रायुधानां बीजानि मुद्रारचनवाने।
ध्यानं सपरिवारराया नित्यपूजाविधिक्रमौ॥ ४॥
नवावरणशक्तीणां नामान्यर्चाक्रमं तथा।
मन्त्रात्मयोगमर्चाया उपचारान् जपक्रमम्॥ ५॥

वातः स्वसंयुतस्त्वाद्यं मरुत्स्वेन द्वितीयकम् ।
हृद्वनेन समयेन् तृतीयं प्रथमा त्वसौ ॥ ६ ॥
अनयोः करयोः शुद्धिं कुर्यादन्योनिन्यमार्जनात् ।
हृच्छिरश्च शिवावर्म नेत्रमस्त्रं षडङ्गकम् ॥ ७ ॥
द्वितीयया सा विज्ञेया या नित्या कुलसुन्दरी ।
तृतीया सैव शक्त्याद्या देव्यात्मासनमेतया ॥ ८ ॥
त्रिषु हंससमायोगाच्चक्रासनसुदीरितम् ।
हंसह्हृङ्भ्यां पञ्चमी च सर्वमन्त्रासनं तथा ॥ ९ ॥
ततोम्बु च रसोपेतं चरस्वसहितं च तत् ।
तस्य शक्तेश्च मध्यस्था या सा षष्ठी समीरिता ॥ १० ॥
साध्यसिद्धासनं दद्यात् तया देव्यै समर्चनात् ।
सप्तम्याऽऽवाहनं कुर्यान्निमसक्तत्रिखण्डया ॥ ११ ॥
हंसहृद्दाहसंयुक्ता सैव स्यात् सप्तमी मता ।
मध्यमे दाहयोगस्तु व्यञ्जनान्ते समीरितः ॥ १२ ॥
वियत् सदाहं वह्निस्वशक्त्याद्यं स्यात् स्वयं भवेत् ।
तदादिकाः सर्वशकीश्चक्रस्था नामभिर्जपेत् ॥ १३ ॥
दाहभूमीरसाक्रमास्वैर्वशिनीबीजमीरितम् ।
प्राणोरसाशक्तियुतः कामेश्वर्यक्शरं महत् ॥ १४ ॥
शून्यमम्बुरसावह्निस्वयोगान्मोहिनी मनुः ।

व्याप्तं रसाक्श्मास्वयुतं विमलाबीजमीरितम्॥ १५॥

ज्या नभोवह्निदाहस्वयोगैः स्यादरुणा मनुः।

हंसः सहृद्रसाम्बुः स्याद्याप्रक्श्मास्वैर्युतो मनुः॥ १६॥

जयिन्यास्तु समुद्दिष्टः सर्वत्र जयदायकः।

वादेषु व्यवहारेषु समरेषु च निस्चितम्॥ १७॥

कं नभोदाहसहितं व्याप्तक्श्मास्वयुतं मनुः।

सर्वेश्वर्याः समाख्यातः सर्वासिद्धिकरः सदा॥ १८॥

ग्रासो नभोदाहवह्निस्वैर्युक्तः कौलिनीमनुः।

एतैर्मनुभिरष्टाभिः शक्तिभिर्वर्गसंयुतैः॥ १९॥

वाग्देवतान्तैन्र्न्यासः स्याद्येन देव्यात्मको भवेत्।

मर्त्योऽपि पूज्यते देवैः सर्वैः सर्वत्र सर्वदा॥ २०॥

रन्ध्रे भाले तथऽऽज्ञायां गले हृदि तथा न्यसेत्।

नाभावाधारके पादद्वये मूलाग्रकावधि॥ २१॥

गोत्रादाहमरुत्स्वैः स्यादाद्योऽन्यो व्यत्ययादसौ।

मरुद्वह्नयोः प्राणरसावह्निस्वैः स्यात्तृतीयकः। २२॥

भूमी रसाक्श्मास्वयुता चतुर्थः शक्तिहृत्परः।

प्राणेन दाहभूस्वेनानन्तरः सप्तमः पुनः॥ २३॥

हंसो हृदा तेजसा च द्युत्या दाहचरस्वयुक्।

अष्टमो हंसहृत्प्राप्तवनखैः समुदीरितः॥ २४॥

शुचिः स्वेन युतस्तद्वन्नवमः परिकीर्तितः ।
एते एकाक्शरा मन्त्रा मुद्रारूपा महेश्वरि ॥ २५ ॥
बाणाक्शाणि देवेशि शृणु सौभाग्यदानि वै ।
व्याप्तं दाहो रसात्वम्बु हृन्मरुत्स्वयुतं पृथक् ॥ २६ ॥
मुद्राक्शराणि पञ्चादौ बाणाः स्युः सर्वजृम्भणाः ।
शाक्ताः शैवास्च विज्ञेयाः पञ्चपञ्च समीरिताः ॥ २७ ॥
शिखितोये स्वसंयुक्ते धनुषी स्त्रवमोहने ।
हंसगैर्दाहिवह्निस्वैः सस्वेन मरुता तथा ॥ २८ ॥
पाशौ तयोः समुद्दिष्टौ तथा सर्ववशङ्करौ ।
सर्वस्तम्भकरस्त्वे को मुद्रा षष्ठोऽङ्कुशस्तयोः ॥ २९ ॥
आवाहनं स्थापनं च सन्निरोधोऽवगुण्ठनम् ।
सन्निधापनसंज्ञं च हेतिमुद्रा नमस्क्रिया ॥ ३० ॥
संक्शोभद्रवणकर्षवश्योन्मादनहांकुशाः ।
खेचरी बीजयोन्याख्या शक्त्युत्थापनमित्यपि ॥ ३१ ॥
मुद्रा विंशतिरुद्दिष्टास्तासां विरचनं शृणु ।
याभिर्विराचिताभिस्तु मन्त्राः सिद्ध्यन्ति यत्नतः ॥ ३२ ॥
कृताञ्जली करौ कृत्वा व्यत्यस्येत्तदनामिके ।
तन्नखे तर्जनीग्रस्ते त्रिखण्डा ललितावहा ॥ ३३ ॥
अधोमुखौ करौ श्लिष्टौ प्रसृताङ्गुलिसंयुतौ ।

विदध्यात् स्थापनी मुद्रा सर्वा संस्थापनी मता ॥ ३४ ॥

अंगुष्ठाग्रनखाऽऽश्लिष्टकनिष्ठामध्यमुष्टिकौ ।

करौ सुस्लिष्टनखरौ मुद्रैषा सन्निरोधिनी ॥ ३५ ॥

ऋजुतर्ज्निर्मुष्टिभ्यां कराभ्यां पार्श्वबूमितः ।

व्यत्यस्यौपकराभ्रान्त्योपक्रमे तौ निवेशयेत् ॥ ३६ ॥

एषाऽवगुण्ठनी मुद्रा सन्निधानकरी पुनः ।

मुद्राञ्जलिस्तु विज्ञेया प्रसृता मुकुलापि वा ॥ ३७ ॥

बाणकोदण्डमुद्रा स्याद्दज्वङ्गुष्ठेन मुष्ठिना ।

पाशमुद्रा तु तेनैव तर्जन्यङ्गुष्ठयोगतः ॥ ३८ ॥

कनिष्ठानामिकयो पृष्ठे स्यादङ्गुष्ठस्तु तर्जनी ।

कुटिला ऋजुमध्यस्था मुद्रासावङ्कुशाभिधा ॥ ३९ ॥

खेचर्या वक्ष्यमाणावा मध्यमे करपृष्ठगे ।

तर्जन्यौ ऋजुसंश्लिष्टे मुद्रैषोक्ता नमस्कृतौ ॥ ४० ॥

कनिष्ठाऽनामिका मध्य नखैरन्योन्यसङ्गता ।

कृत्वाऽङ्गुष्ठौ कनिष्ठास्थौ ऋजू कुर्याच्च तर्जनी ॥ ४१ ॥

सर्वस ।क्शाभणी मुद्रा त्रैलोक्यक्शोभकारिणी ।

एतस्या मध्यमे देवि तर्जनीवत्कृते सति ॥ ४२ ॥

सर्वविद्रावणी मुद्रा सर्वासामपि योषिताम् ।

ताभ्यासङ्कुशरूपाभ्यां संश्लिष्टाऽऽकर्षणी मता ॥ ४३ ॥

परिवृत्ताङ्गुली कृत्वा नखाश्लिष्टतलौ करौ।
अङ्गुष्ठौ तर्जनीश्लिष्टौ नखैराविशेकारिणी॥ ४४॥
क्राग्रे प्रसृते कृत्वा व्यत्यस्येत् तत्कनिष्ठिके।
तदग्राश्लेषतो भुग्ने मध्यमेऽनामिके ऋजू॥ ४५॥
तन्नखस्थे तु तर्जन्यावङ्गुष्ठौ मध्यमोपरि।
इयमुन्मादिनी मुद्रा सर्वोन्मादनकारिणी॥ ४६॥
अस्यास्त्वनामिके भुग्ने तर्जन्यावङ्कुशाकृती।
एषा महाङ्कुशा मुद्रा स्तम्भनाऽऽकर्षकारिणी॥ ४७॥
सव्यदक्शकरौ सम्यक् व्यत्यस्तेक्कूर्परोपरि।
मणिबन्धे च बध्गीयादञ्जली मध्यपृष्ठयोः॥ ४८॥
विधाय भुग्ने तर्जन्यावङ्गुष्ठौ कारयेद्दजू।
कनिष्ठाऽनामिके कुराद्यत्यस्तेकरपृष्ठगे॥ ४९॥
इयं सा खेचरी मुद्रा ललिताप्रीतिकारिणी।
अस्या विरचनेनैव सर्वाः सिद्धयन्ति देवताः॥ ५०॥
मध्यमा मध्यपार्श्वाधः कनिष्ठाग्रे विमर्शयात्।
अनामिकेऽधोव्यत्यन्ते तर्जनुवङ्कुशाकृती॥ ५१॥
इतरे तन्नखायाग्रे बीजमुद्रेयमीरिता।
कनिष्ठाङ्गुष्ठसंश्लेषा महायोनिस्त्रिखण्डिका॥ ५२॥
कनिष्ठाऽनामिकामध्या व्यत्यस्ताः पृष्टतः क्रमात्।

वलितावूर्ध्वयोगेन ऋजुतर्जनिकौ करौ ॥ ५३ ॥

शक्तुत्थापनमुद्रैषा जपपूजासमाधिषु ।

मूर्त्तीकरणमेतस्या रचनेन समीरितम् ॥ ५४

मुद्राः स्युस्त्रिविधा देवि रचनामन्त्रतत्त्वतः ।

स्थूलसूक्ष्मपराख्याता स्तत्रैविध्यं शृणु प्रिये ॥ ५५ ॥

रचनामन्त्रयोरूपं कथितं तव साम्प्रतम् ।

तत्त्वरूपाण्यङ्गुलयो भूतान्यङ्गुष्ठतः क्रमात् ॥ ५६ ।

तत्तद्व्यत्यासरचना दर्शनेन तु कथ्यते

तव मायाबहिर्भूतस्त्वत्प्रसादादहन्त्विति ॥ ५७ ॥

मुद्रं रातीति मुद्रा स्यात्न्येनाका मुष्टिरेव तु ।

स्वल्फभेदात् कोपहर्षौ प्राणिनां जनयत्यतः ॥ ५८ ॥

तेनव सर्वदेवानां मुद्रा हर्षप्रदा मता ।

पूजाकाले दर्शनीया मुद्रास्ताः सर्वदा शिवे ॥ ५९ ।

त्रिलोहकाचमृत्पात्रेष्वेकस्मिन्नर्घ्यकल्पनम् ।

षडङ्गनित्यातातियैरेककं दशवारतः ॥ ६० ॥

जपेन विद्यारूपेण प्रोक्शयेदर्घ्यवारिणा ।

स्वात्मपूजोपकरणान्यशेषं विद्यया शिवे ॥ ६१ ।

लोहितां ललितां बाणचापपाशसृणीः करैः ।

दधानं कामराजांके यन्त्रितां मुदितां स्मरेत् ॥ ६२ ॥

काम्यध्यानोक्तरूपेण समेतां शक्तिभिर्वृताम् ।

नित्यार्चनेषु सर्वत्र प्रोक्तं नैमित्तिकार्चने ॥ ६३ ॥

मध्यप्राधानदेव्यास्तु समुल्लासात्मकत्वतः ।

नवावरणशक्तीनां ध्यानं देव्या समं भवेत् ॥ ६४ ॥

कामाङ्कयन्त्रादन्यत्र भूषावर्णयुधादिकम् ।

तत्समं परमेशानि चक्रस्थानामशेषतः ॥ ६५ ॥

अणिमा लघिमाआ पस्चान्महिमा तदनन्तरम् ।

तथेशित्वं वशित्वं च प्राकाम्या भुक्तिसंयुता ॥ ६६ ॥

इच्छारसयुताः सर्वाः कामाः स्युः सिद्धियो दश ।

बीजद्वयाद्याः सिद्धयन्ताः सप्ताक्शार्या च संयुताः ॥ ६७ ॥

ब्राह्मी माहेश्वरी पस्चात् कौमारी वैष्णवी तथा ।

वाराही च तथेन्द्राणी चमुण्डा तदनन्तरम् ॥ ६८ ॥

shloka 69 missing in Avalon edition?

महालक्श्मीति कथिताः शक्तयश्चतुरस्त्रगाः ।

एताश्चाष्टौ तद्वयाद्याः सप्राक्शार्यन्तगाः क्रमात् ॥ ७० ॥

द्वारकोणदिगासीना अध उर्ध्वे च संस्थिताः ।

प्रादक्शिण्येन ताः सर्वाः पूजयेत् प्रथमावृतौ ॥ ७१ ॥

कामं बुद्धिमहंकारं शब्दं स्पर्शं ततः परम् ।

रूपं रसं तथा गन्धं चित्तं धैर्यं स्मृतिं तथा ॥ ७२ ॥

नाम बीजं तथात्मा च अमृतं सशरीरकम् ।

बिजद्वयस्वराद्याश्च आकर्षिण्यन्तकाह् क्रमात्॥ ७३॥

नित्या ककेति च ततः सप्ताक्शर्याऽर्चयेत् क्रमात्।

पस्चाद्दलं समारभ्य वामावर्तेन सुन्दरि॥ ७४॥

कुसुमा मेखला पस्चान्मदना मदनातुरा।

रेखा च वेगिनी पस्चादङ्कुशा मालिनीति च॥ ७५॥

द्वयानङ्गादिकाः सर्वाः सप्ताक्शर्यन्तगा अपि।

प्राच्यादिदिक्शु स्वाग्रयादिकोणेष्वर्चाः प्रदक्शिणम्॥ ७६॥

अष्टस्वपि च पत्रेषु तृतियावरेणा स्थिताः।

अन्तस्चतुद्दशारादौ पस्चिमादप्रदक्शिणम्॥ ७७॥

संक्शोभणी तु प्रथमाविद्राविण्यप्यनन्तरा

आकर्षिण्याह्लादिनिका ततः सम्मोहिनीति च॥ ७८॥

स्तम्भिनी जम्भिनी पस्चद्वशङ्करी च रञ्जनी।

उन्मादिनी ततोज्ञेया ततः स्यादर्थसाधनी॥ ७९॥

सम्पत्तिपूरणी मन्त्रमयी द्वन्द्वक्शङ्करी।

द्वयसर्वादिकाः सर्व शक्तिसप्ताक्शरीयुताः॥ ७९॥

so one of the lines between this numbered incorrectly

पूज्याः क्रमेण देवेशि सर्वास्त्वन्वर्थसंज्ञिका।

अन्तर्दशारयुग्मे तु देवी सप्ताक्शरातिमिका॥ ८०॥

सिद्धिसम्पत्प्रदे पस्चात्तृतीया तु प्रियङ्करी।

चतुर्थी शक्तिराख्याता तथा मङ्गलकारिणी॥ ८१॥

कामप्रदा ततो दुःखात्प्रतस्च विमोचनी।
मृत्युप्रशमनी पस्चात्तथ विघ्ननिवारिणी॥ ८२॥
अङ्गसुन्दरिका पस्चात्तथा सौभाग्यदायिनी।
दशैताः शक्तयः पूज्या द्वयसर्वादिकाः क्रमात्॥ ८३॥
ज्ञानशक्तिः तथैश्वर्यप्रदा ज्ञानमयी मता।
प्रोक्ता सा पञ्चमी शक्ति स्तथा व्याधिविनाशिनी॥ ८४॥
प्रोक्ताऽऽधारस्वरूपाऽन्या तथ पापहराऽपरा।
उक्तैवमानन्दमयी तथा रक्शास्वरूपिणि॥ ८५॥
दशमी शक्तिरुदिता स्यादीप्सितफलप्रदा।
द्वयसर्वादिकास्चैताः षष्ठाऽऽवरणगा यजेत्॥ ८६॥
अन्तरष्टस्वपि तथ पस्चिमादप्रदक्शिणम्।
वशिनादीन् यजेत् प्राग्वत् सप्ताक्शार्या नमः पदे॥ ८७॥
मध्यं त्रिकोणमभितः शरांस्चापमथार्चयेत्।
पाशमङ्कुशमित्येतच्चतुष्कं तद्भुजान्तिके॥ ८८॥
बीजनान्युक्तानि नामानि नमोन्तानि महेश्वरि।
नाथाँ श्च पृष्ठतो देव्या जयिनीविमलान्तरे॥ ८९॥
मध्यस्थदेवी त्वेकैव षोडशाकारतः स्थिता।
यतस्मत्मात्तनौ तस्या अन्याः पञ्चदशार्चयेत् ॥ ९०॥
मध्यात्रिकोणकोणेषु पस्चिमादयप्रदक्शिणम्।

कामेश्वरी सवज्रेशीं तथाच भगमालिनीम् ॥ ९१ ॥
पुर्वद्वयं ततो विद्या त्वेकैकं पीठनाम च ।
ततो नामानि शकीनां देवीसप्ताक्शरीयुतम् ॥ ९२ ॥
तैस्ताः समर्चयेत् पस्चात् मध्ये देवीं तथऽर्चयेत् ।
द्वयं समस्तां विद्यां च पीठदेव्यभिधायुताम् ॥ ९३ ॥
देवीसप्ताक्शपेतमित्युक्तं तव पूजनम् ।
प्रतिचक्रं च मध्यस्थां विद्यया नवनामभिः ॥९४ ॥
सप्ताक्शर्या समेतं तु पूजयेच्च तथाऽर्चयेत् ।
द्वयमेता इति प्रोक्ता गुणान्योगिन्य इत्यपि ॥ ९५ ॥
अभिधामावृतेरुक्ता पूजां गृह्णन्त्विवतिक्रमात् ।
देव्या गृह्णन्त्विवति भवेत्तत्रैविध्यं शृणु प्रिये ॥ ९६ ॥
स्थूलं समस्तया नाम्ना सूक्श्मं मन्त्रतनुं तथ ।
पररूपं त्वर्पणेन विदितं पूजनं शिवे ॥ ९७ ॥
विद्या बीजत्रयं देवि तुरीयस्वरशेखरम् ।
तत्तुरीयस्वरूपं तु बिन्दुत्रयवदीरितम् ॥ ९८ ॥
तदात्मकत्वं देव्यास्ते साधकस्य च यद्भवेत् ।
तद्भावनां शृणु प्राज्ञे महोदयकरीं शुभाम् ॥ ९९ ॥
ऊद्ध्र्वं बिन्द्वात्मकं चक्रमधाबिन्दुद्वयात्मकम् ।
कुचरूपञ्च तच्छेषैः शेषाङ्गानि च भावयेत् ॥ १०० ॥

बायुतत्त्वमयी व्याप्तिरिति सम्यक् समीरिता ।

अस्या निष्फालनाच्चित्ते तत्तत्त्वं स्वात्मसात्कृतम् ॥ १०१ ॥

इति श्रीषोडशनित्यातन्त्रे कादिमते ललितार्चनं नाम चतुर्थं पटलम् ॥

## अथ पञ्चमं पटलम्

भावनेन तु तेनैव जपेद्विद्यासमाहितः ।

मन्त्रात्मनस्ते सायुज्यं सिद्ध्यत्येव न संशयः ॥ १ ॥

विद्यातृतीयखण्डेन कुर्यात्पूज्योपचारकान् ।

पाद्यार्घ्याचमनं स्नानं वसनाभरणानि च ॥ २ ॥

गन्धपुष्पं धूपदीपौ नैवेद्याचमनं पुनः ।

ताम्बूलमर्चनास्तोत्रं तर्पणं च नमस्क्रियां ॥ ३ ॥

एवं सम्पूज्य पुरतः प्रोक्तयोगसमन्वितम्

जपेत्सहस्रमथवा शतं तद्दिनजन्तु वा ॥ ४ ॥

ततो देव्याः प्रसादेन स्वात्मानं तत्समं स्मरेत् ।

न्यासत्रयं विधायाथ देव्यात्म विहरेत्सुखी ॥ ५ ॥

एवं नित्यक्रमं यस्तु कुर्वन् गुरुपरो नरः ।

न तस्य कुत्रचित् कस्चित् कदाचित् क्लेशसम्भवः ॥ ६ ॥

यस्तस्यामङ्गलं क्लेशमुपीक्शां वा समाचरेत् ।

तस्यावयोः प्रसादेन तानि स्युर्लक्शणं हि तत् ॥ ७ ॥

शृणु यैरतुला सिद्धिस्तत्तच्चक्रेषु पूजनात् ॥ ८ ॥

त्रैलोक्यमोहनं बाह्यं सर्वाशापरिपूरकम् ।

सर्वसंक्शोभणं सर्वसौभाग्यपरिदायकम् ॥ ९ ॥

सर्वार्थसाधनं सर्वरोगतो हरिमेव च ।

सर्वरक्शाकरं सर्वसिद्धिप्रदमतः परम् ॥ १० ॥

सर्वानन्दमयं मध्यबिन्दुस्थानं शिवात्मकम् ।

एवं नवानि नामानि गुणयोगीनि पार्वति ॥ ११ ॥

प्रकटा बाह्यगा गुप्तास्ततो गुप्ततरास्तदा ।

सम्प्रदायास्तदन्तस्थाः कुलकौलिनिगर्भिकाः ॥ १२ ॥

रहस्याः स्युस्तदन्तास्च परापररहस्यकाः ।

अतिपूर्वरहस्यास्तु मध्यस्थाः स्थूलविग्रहाः ॥ १३ ॥

त्रिपुरा त्रिपुरेशी स्यात्सुन्दरी सुरवासिनी ।

श्रीमालिनी च सिद्धाम्बा महात्रिपुरसुन्दरी ॥ १४ ॥

मध्यषट्के तु पुरतस्त्रिपुरेतिपदान्वितैः ।

विद्यासप्ताक्शरीमध्ययोहितैरेभिरर्चयेत् ॥ १५ ॥

पूजाक्रमं तद्विशेषान् विद्यासाधनकर्म च ।

साधकव्रतचर्यां च सिद्धिचिह्नि मेव च ॥ १६ ॥

त्रिपुरात्मानमात्मानं भावयेन्मुर्ध्नि रन्ध्रगम् ।

ज्योतिरूपं च नाथाङ्घ्रमूर्तिष्टि न्यस्तविग्रहाः ॥ १७ ॥

नानावर्णाऽऽयुधाकारबाहनाभरणाः स्त्रियः ।

सर्वदा सर्वगाः सर्वसिद्धिदा बलिदानतः ॥ १८ ॥

रक्तगन्धाम्बरः स्त्रग्वी रक्तभूषादिभूषितः ।

प्रसन्नचेताः कर्पूरवासिता स्यावराङ्गवान् ॥ १९ ॥

पद्मासनः प्राग्वदनः प्राणानायम्य संयतः ।

शोडशाक्शरमन्त्रेण बलिं दत्त्वाऽर्चयेद्गुरुन् ॥ २० ॥

मूर्ध्नि तस्याज्ञया पस्चात् पूजां कुराद्यथाविधि ।

नाथं च तन्मयीभूतं ध्यात्वाऽऽत्मानं तदात्मकम् ॥ २१ ॥

नवरत्नमयं द्वीपं नवखण्डविराजितम् ।

मातृकाद्येन तन्नाम्न नमोन्तेन समर्चयेत् ॥ २२ ॥

पुष्पं नीलं च वैडूर्य्यं विद्रुमं मौक्तिकं तथा ।

ईशान्मरकतं वज्रं गोमेदं पद्मरागकम् ॥ २३ ॥

कल्पकोद्यानमन्त्रेस्च ऋतुँश्चापि स्मर्चयेत् ।

इन्द्रियाण्यश्वऱ्उपाणि तत्र पस्चिमतो यजेत् ॥ २४ ॥

इंद्रियार्थन् गजान् पूर्वे तन्नम्नैव समर्चयेत् ।

पस्चिमादि तु मध्यान्तं विलोमान्नवरत्नकम् ॥ २५ ॥

कालो मुद्रा मातृका च रत्नं देशो गुरुस्तथा ।

तत्त्वं ग्रहाश्च मूर्तिश्च चक्रेश्वर्यन्तनामकः ॥ २६ ॥

उक्तक्रमेण सम्पूज्य तत्तच्चक्रेश्वरी प्रिये ।

करुणातोयपरिस्वं मध्येमाणिक्यमण्डपम्॥ २७॥
देशं कालं तथाऽऽकारं शब्दं कोणेषु पूजयेत्।
रूपिणिशक्तिसहितं ततह् संगीतियोगिनीः॥ २८॥
समस्तगुप्तप्रकटसिद्धयोगिनि चक्रयुक्।
सप्तक्शैरुपेतास्तु पूजयेत् सर्वमातरः॥ २९॥
रोचनाचन्द्रकाश्मीरलघुकस्तुरिकायुतम्।
हेमादिपात्रे साधारे स्थापयेदर्घ्यम्बुना॥ ३०॥
भावयेद्वह्निसूर्येन्दुभूतानि परमेश्वरि।
जपेच्च दशवारं तत्तर्पयेत्तेन योगिनी॥ ३१॥
आधारे हृदये रन्ध्रे विद्याखण्ड्त्रयं स्मरेत्।
लोहितं तत्प्रभावेधाल्लोहितं च निजं वपुः॥ ३२॥
प्राणायामं विधायाथ कृत्वोक्तकरशोधनम्।
आद्ययाऽथ तृतीयादिषष्ठ्यन्ताभिः तथासनम्॥ ३३॥
पुजयेदीनमनसोर्मध्य्शैर्नामभिर्युतम्।
ततो द्वितीयया प्रोक्तषडङ्गानि समाचरेत्॥ ३४॥
प्र्सारितलेनैव प्राणिना हृदयं शिरः।
प्रोक्ता शिखा तथा सम्यगधोङ्गुष्ठेन मुष्टिना॥ ३५॥
तथाविधाभ्यां पाणिभ्यां वर्मस्कन्धादिनाभिगम्।
तर्जनीमध्यमानामा प्रोक्त नेत्रत्रये च क्रमात्॥ ३६॥

प्रसारिततलाभ्यान्तु तालत्रयमुदीरितम्।

सशब्दं तर्जनीज्येष्ठायोगादस्त्रमुदीरितम्॥ ३७॥

दिग्विदिक्चोपरि तथ स्वाधो मध्ये च विघ्नहृत् ।

ततः कृत्वा वशिन्यादि न्यासं प्रागुक्तयोगतः॥ ३८॥

सप्तम्याऽऽवाहनं कुर्याद्विद्ययाऽथ त्रिखण्डया।

अग्रस्थमध्यचक्रस्थपिनिमध्ये निवेश्य ताम्॥ ३९॥

तथाविधां सावरणां ध्यात्वा मुद्रां प्रदर्शयेत्।

प्रोक्ताः सप्तदशाथेनामुपचारैः स्मर्चयेत्॥ ४०॥

जयिनीविमलामध्ये नाथान् नव यजेत्त्रिशः।

ततो देव्याः स्वमूर्तित्वान्नित्याः पञ्चदशापि च॥ ४१॥

देवीमूर्तौ जपेत्तत्तद्विद्याभिस्तन्मयौ क्रमात्।

आरभ्य पस्चिमद्वारदक्शशाखामर्थार्चयेत्॥ ४२॥

अभितश्चाष्टसु तथा दिक्ष्विध्र्वं तथेरिताः।

तथ ब्राह्म्यादिका अष्टौ पूजयेत् प्रथमावृतौ॥ ४३॥

मूलविद्यायुतैः प्रोक्तनामभिर्मध्यतो ययेत्।

नवस्वावृत्तिषु प्रोजैर्नवभिर्मनुभिः क्रमात्॥ ४४॥

निर्वेहेच्च तत्पूजां भद्राः कुर्यान्नवेकशः।

षोडशारे त्वष्टदले तथा तच्चतुरावृतौ॥। ४५॥

प्रोक्ताभीः शक्तिभिः प्रोक्तक्रमात्पूजां समाचरेत्।

मध्ययोनेरग्रहमूले पार्श्वयोर्बहिरर्चयेत्॥ ४६॥

बाणान् पञ्च तथा चापं पाशमङ्कुशमीश्वरि।

बाह्यादीशान्तमभितो वामावर्त्तेन संस्थितः॥ ४७॥

बाणाः स्यिस्त्रिविधाः प्रोक्ताः स्थूलसूक्श्मपरत्वतः।

स्थूलाः पुष्यमयाः सूक्श्माः मन्त्रात्मानः समीरिताः॥ ४८॥

परास्च्च वासनायां तु प्रोक्ताः स्थूलान् शृणु प्रिये।

कमलं कैरवं रक्तं कह्लारेन्दीवरं तथा॥ ४९॥

सहकारजमित्युक्तं पुष्पपञ्चकमीश्वरि।

मान्मथक्शोभजनकं पूजाहोमविधानतः॥ ५०॥

जपमन्त्रप्रयोगादौ सिद्धमन्त्रैश्च पञ्चभिः।

तथाविधं स्यात्तच्चापं स्थूलं पुण्ड्रेक्शुकाण्डजम्॥ ५१॥

मधयोन्यग्रकोणादिसंख्याः प्रोक्तक्रमात् यजेत्।

कामेश्वर्य्यादिकाः शक्तीग् तथा मध्ये शिवां यजेत्॥ ५२॥

प्रदर्श्य मुद्रानवकं चत्वारि च ततः क्रमात्।

उपचारान् विधायाथ प्रोक्तयोगसमन्वितम्॥ ५३॥

जपित्व दशवारञ्च स्वात्मानं देवतातनुम्।

स्मरेत्स्वात्मनि ताः पञ्चदश नित्याः स्मर्चयेत्॥ ५४॥

ततो भूतात्मभिः पञ्चमन्त्रैरभ्यर्च्य भक्तितः।

आत्माष्टाक्शरमन्त्रेण पूजयित्वा ततो जपेत्॥ ५५॥

सहस्रं पुरतो देव्याः शतं दद्दिनजं तु वा ।

सन्ध्यात्रयं षष्ठिसङ्ख्यमुक्तं वा प्रोक्तरूपतः ॥ ५६ ॥

ततः पुष्पाञ्जलिं ओत्वा मूलेनाभ्यर्च्य होमयेत् ।

कुण्डे स्थण्डिलमध्ये वा सम्प्रोक्ष्याघ्याम्बुना कुशैः ॥ ५७ ॥

रेखाश्चतस्रः प्रागग्रा उत्तराग्राश्च संलिखेत् ।

मध्ये तथऽग्निमाधाय क्रव्यादांशं परित्यजेत् ॥ ५८ ॥

परिषिंच्य परिस्तीर्य वह्निवीर्ये बिभावयेत् ।

प्रत्येकं सप्तजिह्वासु कुर्यान्नव घृताहुतीः ॥५९ ॥

ततः पूजाक्रमेणैव हुत्वा षोडश मूलतः ।

ततस्तां बिन्दुगे धाम्नि विलीनां परिभावयेत् ॥ ६० ॥

बलिं दद्यात्ततस्त्वग्रे कुरुकुल्लामनुत्रयात् ।

अन्नव्यञ्जनपुष्पाम्बुदानेनोक्तस्वरूपतः ॥ ६१ ॥

अभ्यर्च्य देवीं चक्रस्थां तथा तद्रूपवान् स्वयम् ।

स्वमुद्रया शक्तिचक्रं खेचर्यात्मनि योजयेत् ॥ ६२ ॥

तान्यासत्रयं कृत्वा प्राणायामपुरस्मरम् ।

जपित्वा स्तोत्रयुगलं देव्यात्मा विचरेत् सुखी ॥ ६३ ॥

पूजाविशेषान् देवेशि शृणु नित्यं क्रमोदितान् ।

अशक्तानां तु विस्तारे तथाऽऽपत्सु च शस्यते ॥ ६४ ॥

अन्यथाऽनर्थकारी स्यात् सङ्कोचार्चनमीश्वरी ।

हेतिभिर्मध्यमाद्यं स्यात् द्वितीयं नवयोनिषु ॥ ६५ ॥
चतुर्दशारान्मध्यान्ताच्चतुर्थं प्रोक्तरूपतः ।
पञ्चमं सर्वदुःखार्तिनाशनं वाञ्छितप्रदम् ॥ ६६ ॥
तत्प्रकारन्तु देवेशि कुरुकुल्लार्चने शृणु ।
इति पञ्चप्रकाराऽर्चा प्रोक्ता सर्वार्थसिद्धिदा ॥ ६७ ॥
विद्यायाः साधनं सिद्धिं तद्व्रतं वर्ज्यमेव च ।
तदाभिमुख्यचिह्नानि विघ्नानि प्राक्त नाद्यतः ॥ ६८ ॥
शृणु क्रमेण देवेशि सर्वदा प्रीतिकारकम् ।
येन मर्त्योपि सिद्ध्येत जीवन्मुक्तोभवन्मयः ॥ ६९ ॥
स्नातः सुगन्धसलिलैः प्राक्पूजाप्राक्त रूपवान् ।
गुरुं वित्तेन सन्तोष्य रक्तागारे क्रमं भजेत् ॥ ७० ॥
सन्धात्रयेऽपि जपवान् सहस्त्रं मौनसंयुतः ।
मोचागुडसितोपेतं पयःपायसमर्पयेत् ॥ ७१ ॥
नीराजनं च कर्पूरैः कुर्यात्सन्ध्यासु तास्वपि ।
होमं दशांशतः कुर्यात्तर्पणं चेन्दुमज्जलैः ॥ ७२ ॥
स्वनित्यादूर्ध्वताजाप्यं द्विसहस्त्रं दिनं प्रति ।
कुर्यात्तेन भवेत् पूर्णं लक्शं पूर्णान्तमीश्वरि ॥ ७३ ॥
एवं लक्शत्रयं प्रोक्तं प्रथमे तु कृते युगे ।
त्रेतायां द्विगुणं तद्वत् द्वापरे त्रिगुणं स्मृतम् ॥ ७४ ॥

कलु चतुर्गुणं प्रोक्तमक्शराणां च संख्यया ।

तार्तीयसप्तसङ्ख्या सा तेन स्यादेकविंशतिः ॥ ७५ ॥

तेनान्येषु युगेषु स्यात् संख्याआश्टद्विरुदीरिता ।

वनिताक्षोभतोभोगान्न विघ्नं जायते यदि ॥ ७६ ॥

तामु संख्यासु पूर्णासु सम्प्राथ्र्य स्वाश्रयेत्क्रमम् ।

वर्ज्यानि शृणु देवेशि तद्दिनेषु सदापि च ॥ ७७ ॥

नास्तिकैह् सह संलापा मैथुनं परनिन्दितम् ।

निद्राशोकौ तथाऽऽ ।लापं देशान्तरपरिभ्रमम् ॥ ७८ ॥

तद्वासरेषु वर्यानि प्रोक्तान्यन्यानि शङ्करि ।

शृणु सर्वत्र सर्वेषां सर्वदा नाशकानि च ॥ ७९ ॥

परक्षेत्रगृहस्त्रीस्ववाञ्च्छतिन्नन्दनानि च ।

स्त्रिषु राषं प्रहारं च दुष्टास्वपु न योजयेत् ॥ ८० ॥

सिद्धचिह्नानि चोक्तानि वासना मया ।

आनुकूल्यस्य चिह्नानि शृणु साधयस्तदा ॥ ८१ ॥

स्वप्ने पोतेषु वनितावृन्दैः संमेलनं निशि ।

गहाद्रिसौधशृङ्गेषु विहारो राजदर्शनम् ॥ ८२ ॥

गजानामङ्गनानां च दर्शनं नृत्यगीतयोः ।

उत् ।सवं ससुरामांसदर्शनं स्पर्शनं तथा ॥ ८३ ॥

निन्द्यानि शृणु देवेशि विघ्नानर्थकराणि च ।

कृष्णवर्णैर्भटैः स्वप्ने प्रहारस्तैललेपनम् ॥ ८४ ॥

मैथुनं परनारीभिरिन्द्रियच्च्यवनं तथा ।

राष्ट्रक्षोभो वह्निवायुजलभीबन्धुनाशनम् ॥ ८५ ॥

गुरवुपेक्षाऽसम्पत्तिर्वस्तूनां व्याधिबाधनम् ।

अन्यमन्त्रार्चनश्रद्धा विघ्नो नित्यार्चनेऽनिशम् ॥ ८६ ॥

नराणां यच्च दुष्पुण्यैः कृतैर्बहुषु जन्मसु ।

श्रद्धास्थैर्यं सम्प्रदायसिद्धिर्नित्यार्चनं भवेत् ॥ ८७ ॥

कूर्मस्थितिमविज्ञाय योजपादिविधिस्थितः ।

स नाप्नोति फलान्युक्तान्यन्यथा नाशमेति च ॥ ८८ ॥

तस्मात् कूर्मविभागं तु विज्ञायाऽखिलमाचरेत् ।

स चतुर्द्धा ततोलोके तत्प्रकारान् शृणु प्रिये ॥ ८९ ॥

प्रथम्स्तु परः कूर्म्मस्ततो देशगतस्तथा ।

ग्रामगोगृहमश्चेति चतुर्धा तद्व्यवशितिः ॥ ९० ॥

देशं ग्रामं गृहं वास्तु नवधा विभजेत्ततः ।

प्रागादि पश्चिमान्तं तु कादिमान्तानि विन्यसेत् ॥ ९१ ॥

अक्षराणि समान्येव चत्वारि परयोर्न्यसेत् ।

ईशे द्वयमथोमध्ये स्वरात्प्रागादि विन्यसेत् ॥ ९२ ॥

ईशान्ते द्विद्विशः पञ्चान्नामाद्यर्णं यतो भवेत् ।

तन्मुखं पार्श्वयोः पार्णौ कुक्षी पादौ तत्स्ततः ॥ ९३ ॥

पुच्छमेकमथो मध्ये पृष्ठमेवं षडङ्गवत् ।

मुखे सर्वार्हसिद्धिः स्यात्करयोरल्फसिद्धिकृत् ॥ ९४ ॥

कुक्षोरूनित्यनैष्फल्यं पादयाः सर्वदुःखकृत् ।

पुच्छे मृत्यस्तु नियतं पृष्ठे सर्वार्थदायकम् ॥ ९५ ॥

तस्मात्तत् साधु विज्ञाय कुर्यात् सर्वं समीरितम् ।

व्यञ्जनं देश्कूर्मे स्यात् गृहकूर्मे स्वरान्तथा ॥ ९६ ॥

ग्रामादिकूर्मे द्वितयं परकूर्मे न तत्रयम् ।

नित्यं पूर्वमुखो यन्मात्तेन तत्सिद्धिगीरिता ॥ ९७ ॥

एवं कूर्मविभागोऽयमीरितस्ते चतुर्विधः ।

मन्त्राणां तेन सिद्धिः स्यात्सर्वेषां सर्वतस्तदा ॥ ९८ ॥

सम्वध्र्यायामविस्तारं हृत्वाऽष्टाभिस्तु शेषतः ।

विज्ञाय वर्गं तेष्वेकमाद्यं नाम्नि प्रकल्पयेत् ॥ ९९ ॥

वास्तुष्वज्ञातरूपेषु प्रसिद्धं नामतो भवेत् ।

तत्तत्स्थानेषु नियतमनर्थं शून्यता तथा ॥ १०० ॥

व्योमतत्त्वमयी व्याप्तिरिति सम्यक् समीरिता ।

अस्या निष्फालदाच्चित्ते तत्तत्वं स्यात्मसात्कृतम् ॥ १०१ ॥

इति श्रीषोदशनित्यातन्त्रेषु श्रीकादिमते पञ्चमं पटलम् परिपूर्णं परामृष्टम् ।

अथ षष्ठं पटलम् ।

अथ षोडशनित्यानां नित्यार्चानिरतात्मनाम्।
नैमित्तिकं च काम्यं च वक्ष्येऽहं शृणु सुन्दरि ॥ १ ॥
नित्यं नैमित्तिकं काम्यं सापेक्षं पूर्वपूर्वतः।
अन्यथा भनं चेच्छन् करोत्यापत्परम्पराम्॥ २ ॥
नित्यार्चनरतैः सिद्धैः कार्यं नैमित्तकार्चनम्।
तद्विधानमतो वक्ष्ये चहित्राद्यं फाल्गुनावधि ॥ ३ ॥
चैत्रे तदनकैः कूर्यात् समूलैर्वाऽथ गुच्छकैः।
पूर्वक्षचतुर्दश्यां निशि संख्याप्य विद्यया ॥ ४ ॥
परेद्युर्नित्यपूजान्ते कुर्यादेतैस्तु पूजनम्।
अस्मिन्माले च पूर्णायां वसन्तोत्सवपूजनम्॥ ५ ॥
कुर्यात्तत्कालसम्भूतैः प्रसूनैश्चान्द्रचन्दनैः।
सौगन्धिकैः स्काश्मीरैः पूजां पूर्ववदुज्ज्वलाम् ॥ ६ ॥
वैशाखे मासि पूर्णायां पूजयेद्धेमपुष्करैः।
अपि वा चन्द्रकस्तूरीचन्दनैः शिशिरोदकैः॥ ७ ॥
जेष्ठे मासि च पूर्णायां कदलीपनसाम्रजैः।
फलैस्तु पूजयेद्देवीं पूर्ववत् सर्वसिद्धये ॥ ८ ॥
आषाढे मासि पूर्णायां चन्दनैः कुङ्कुमान्वितैः।
एला कक्कोलजातीव्हिरुपेतैः पूजयेच्छिवाम्॥ ९ ॥
श्रावणे मासि पूर्णायां पवित्रैः पूजयेच्छिवाम्।

तद्विधानमिदं भद्रे शृणु सौव्हाग्यदायकम्॥ १०॥
सौवर्णै राजतैर्वापि सूत्रैः पट्टसमुद्भवैः।
पार्पाससम्भवै रक्तैर्नवधा गुणितैः शुभैः॥ ११॥
पुर्यात्पवित्रं शक्तीनां सर्वासां षोडशाङ्गुलैः।
नवाङ्गुलैर्वा तत्सङ्क्ख्यै सरग्रन्थ्यादिसंयुतम्॥ १२॥
अथवा वृत्तिशक्तीनां तत्तत्सङ्ख्याङ्गुलादिकम्।
कृत्वाऽधिवासम्पूर्वं तु पूजयेत्तैर्यथाक्रमम्॥१३॥
होमे त्वेकसरग्रन्थि तन्मानं स्यात्पवित्रकम्।
अष्टोत्तरशतैः सूत्रैः कुर्याच्छत्त्या च तारकम्॥ १४॥
पूजा विष्टरसानेन वितानादवलम्बयेत्।
वाराहीकुरुकुल्लादिशक्तीनां मूलशक्तिवत्॥ १५॥
स्वमानेनात्मनः कुर्यात् पवित्रं प्रोक्तसङ्ख्या।
क्रमागमज्ञशिष्याणामात्मवत्समुदीरितम्॥ १६॥
अन्येषां योगिशक्तीनामेकग्रन्थिसरे न च।
परिधानप्रमाणेन मण्डपस्यैकसूत्रतः॥ १७॥
सरग्रन्थ्यङ्गुलैर्युक्तं षण्नवत्या तु सङ्ख्यया।
कृत्वा पवित्रत्रितयं  तानि देव्यै समर्पयेत्॥ १८॥
उक्त मानत्रयेप्येकं ग्राह्यं भवति सर्वतः।
न कुर्यान्मानसाङ्कर्यं यदि कुर्याद्विनश्यति॥ १९॥

अथ भाद्रपदे मासि पूर्णायां केतकोद्भवैः ।
प्रसूनैरर्चयेद्देवी पूरोक्तविधिना युतम् ॥ २० ॥
आश्वयुज्यां विशेषस्तु दर्शान्तप्रतिपत्तिथिम् ।
आरभ्य पूजयेद्देवीं गन्धपुष्पोपहारकैः ॥ २१ ॥
होमे शतादि तद्वृद्ध्या पूर्णयां षट्शताधिकम् ।
सहस्रं जुहुयान्नित्यं जपं चैव समाचरेत् ॥ २२ ॥
कन्यकायां समावाह्य देवीं सम्पूज्यभक्तितः ।
दत्वा मूषणवस्त्रादि दक्षिणां च स्मुद्धरेत् ॥ २३ ॥
एवमेकादिसंवृद्ध्या पूर्णान्तं पूजयेत् प्रिये ।
तेन विद्वान् भवेत्सिद्धो नृपतिं कुरुतेऽर्चकम् ॥ २४ ॥
कार्तिके मासि पूर्णयां कुङ्कुमेन समर्चयेत् ।
रात्रौ प्रदीपकैर्होमैः कुर्यात् घृतसमेधितैः ॥ २५ ॥
देव्यग्रे स्थापयेद्दीपान् विद्यया षोडश क्रमात् ।
शक्तीनामेकमेकं तु स्थापयेत्तत्तदग्रतः ॥ २६ ॥
अथवा भाजने मध्ये त्वेकं तमभितो नव ।
कृत्वा निवेदयेन्मूलविद्यया स्प्रसूनकम् ॥ २७ ॥
मार्गशीर्षे च पूर्णायां नालिकेराम्बु चन्द्रयुक् ।
निवेद्याभ्यर्चयेन्माषपिष्टापुपैर्यथाविधि ॥ २८ ॥
पुष्ये मासि च पूर्णायां शर्कराभिर्गुडेन वा ।

पूजयेदिष्टसम्सिद्ध्यै गव्यं दुग्धं निवेदयेत् ॥ २९॥

माघे मासि च पूर्णायां तिलैः सुज्लैस्तथेतरैः ।

पूजयेद्दुग्धनैर्वेद्यासितापूपादिभिः सदा ॥ ३० ॥

फाल्गुने मासि पूर्णायां पङ्कजैह् स्वर्णराजतैः ।

चुतसौगन्धिमधुकैः पूजयेदीप्सिताप्तये ॥ ३१ ॥

विषुवायनदर्शासु युगादिषु समर्चनम् ।

कुर्याद्वैशेषिकं पुण्येष्वागमोक्तेषु तेष्वपि ॥ ३२ ॥

नित्यनैमित्तिकार्चासु निरतानां यतात्मनाम् ।

प्रोच्यन्ते काम्यरूपाणि षट्कर्माणि समर्चनैः ॥ ३३ ॥

यन्त्रहोमक्रियाध्यानयोगतर्पणपूजनैः ।

प्रोक्तानि काम्यकर्माणि प्रयोगेऽन्यत्समर्चयेत् ॥ ३४ ॥

रक्षा शान्तिर्जयो लाभो निग्रहो निधनं तथा ।

षट्कर्माणि तदङ्गत्वादन्येषां न पृथक् स्थितिः ॥ ३५ ॥

तानि चैत्रादि चैत्रान्तं तिथिवारैश्च पार्वति ।

पूजाद्रव्यैर्देशकालैः कथ्यन्ते पूजयेद्वारिमण्डले ॥ ३६ ॥

रक्षायै भूपुरे शान्त्यै पुजयेद्वारिमण्डले ।

जयाय दहनागारे लाभायानिलमण्डले ॥ ३७ ॥

शेषयोर्व्योमगेहेऽस्याः पीताश्वेतारुणासितैः ।

द्रव्यैः षोढा विभयाहः क्रमाद्रात्रिं च पूजयेत् ॥ ३८ ॥

तानि चैत्रादिऋतवः खण्डानि समुदीरिताः ।

तानि पूजाविधौ प्रोक्तैर्देव्यास्तैर्नवनामभिः ॥ ३९ ॥

ललिता कामदा कामेत्येताभिर्द्वादश क्रमात् ।

चैत्रादिमासनामानि तेषु तैर्दानपूजनैः ॥ ४० ॥

अभीष्टं समवाप्नाति बलाराग्यादिसिद्धिभिः ।

व्रीहिमाषयवक्षौद्रघृततैलपयोम्भरैः । ४१ ॥

हेम रत्नं तिलं मुद्गामिति द्रव्याण्यनुक्रमात् ।

चैत्रादिषु रुतं नादं दद्याद्विद्याविदेऽर्चयेत् ॥ ४२ ॥

श्लेष्ंआन्तककरञ्हाक्षनिम्बाश्वत्यकदम्बकाः ।

बिल्वोचटश्च मातृणां पादपाः समुदीरिताः ॥ ४३ ॥

चन्दनद्यकर्पूरचूता व्युतक्रमपीठगाः ।

तेषु चैत्रादिषु यजेदाज्ञासिद्धिर्द्दढा भवेत् ॥ ४४ ॥

चैत्रादिऋतुसम्भूतैः प्रसूनैर्नित्यमर्चयेत् ।

आयुः कान्तिं श्रियं भूमिं विजयं शश्वदश्नुते ॥ ४५ ॥

प्रैतत्तिथिमारभ्य क्रमादेकाभिवृद्धितः ।

मोचं गुडं नारिकेलं पूर्णान्तं होमयेदपि ॥ ४६ ॥

ततः प्रैत्पदारभ्यदिनमेकाकशाः क्रमात् ।

दर्शे त्वेकमथैवं स्यात् ते लक्ष्म्या नृपो भवेत् ॥ ४७ ॥

रविवारेऽरुणाम्भोजैः कुमुदैः सोमवारके ।

भौमे रक्तोत्पलैः सौम्ये वारे तगरसम्भवैः ॥ ४८ ॥

गुरुवारेषु कल्हारैः शुक्रवारे सिताम्बुजैः ।

उत्पलैः शनिवारेषु पुजयेदब्दमादरात् ॥ ४९ ॥

निवेदयेत् क्रमात्तेषु रविवारादिसप्तसु ।

पायसं दुग्धकदलीनवणितं सिते घृतम् ॥ ५० ॥

एवमब्दं स्माराध्य देवीं गन्धादिभिः क्रमात् ।

ग्रहइडां विजित्याशु मुखानि च समश्नुते ॥ ५१ ॥

चतुरस्त्रं समारभ्य नव चक्राण्यनुक्रमात् ।

उन्नतोन्नतमामध्याचक्रं स्यान्निधनं धनम् ॥ ५२ ॥

त्रित्रिक्रमादुन्नतं तत्सुप्रजत्वं श्रियं लभेत् ।

एक द्विषट्क्रमोन्नामः श्रियै कीर्त्यौ च कल्पते ॥ ५३ ॥

नवानि समरूपाणि सर्वाभीष्टार्थसिद्धये ।

रत्ने हेमनि रूप्ये च ताम्रे दृषदि च क्रमात् ॥ ५४ ॥

कृत्वा श्रीचक्रनिर्माणं स्थापयेत् पूजयेदपि ।

लक्ष्मीकान्तियशःपुत्रधनारोग्यादिसिद्धये ॥ ५५ ॥

सीसकांस्यादिषु पुनः पूर्वोत्कविपरीतकृत् ।

फलकायां पटे भित्तौ स्थापयेन्न कदाचन ॥ ५६ ॥

स्थापितं यदि लोभेन मोहेनाऽज्ञानतोऽपि वा ।

कुलवित्तमपत्यं च निर्मूलयति सर्वथा ॥ ५७ ॥

पर्वाग्रे यजेद्देवीं पलाशकुकुसुमैर्निशि ।
सिद्धद्रव्यैश्च सप्ताहात् खेचरीमेलेनं भवेत् ॥ ५८ ॥
अरण्ये वटमूले वा कुञ्जे वा धरणिभृताम् ।
कदम्बजातीपुष्पाभ्यां सिद्धद्रव्यैः शिवां यजेत् ॥ ५९ ॥
मासेन सिद्धा यक्षिण्यः प्रत्यक्षा वाञ्छितप्रदाः ।
केतकीकुसुमैः सिद्धाश्चेटका वारिधेस्तटे ॥ ६० ॥
आज्ञामभीष्टां वनितां रणे मायां महाद्भुतम् ।
वसूनि मालाभूषादि ददयादस्येच्छयाऽनिशम् ॥ ६१ ॥
पीठमक्षद्रुमैः कृत्वा तत्र देवीं यजेन्निशि ।
शाल्मलीकुसुमैः सिद्धद्रव्यैर्मासं तु निर्भयः ॥ ६२ ॥
श्मशाने देवदेवेशि सिद्धयन्त्यस्य पिशाचिकाः ।
अश्मपातप्रहाराद्यैरस्य घ्नन्ति द्विषश्चिरम् ॥ ६३ ॥
निर्हने विपिने रात्रौ मासमात्रं तु निर्भयः ।
यजेद्देवीं चक्रगतां सिद्धद्रव्यसमन्विताम् ॥ ६४ ॥
मालतिजातिपुन्नागकेतकीमनुभिः क्रमात् ।
तेन सिद्धयन्ति वेतालास्ता नारुह्य स्वेच्छया चरेत् ॥ ६५ ॥
श्मशाने चण्डिकागेहे निर्जने विपिनेऽपिवा ।
मध्यरात्रे यजेद्देवीं कृष्णवस्त्रादिभूषणः ॥ ६६ ॥
षणचक्रे त्रिकृष्णां तामातिक्रुद्धाशयो जपेत् ॥

साध्ययोनिं तदग्रे तु बलिं दद्यान्निवेदयेत्॥ ६७॥

सिद्धद्रव्यसमोपेतं मासं तद्भाललोचनात्।

जायन्ते भीषणाः कृत्यास्ताभ्यः साध्यं निवेदयेत्॥ ६८॥

विश्वसंहारसन्तुष्टाः पुनर्यान्ति निजेच्छया।

देव्या ललाटनेत्राः स्युः प्रार्थनेन तिरोहिताः॥ ६९॥

रक्तभूषाम्बरालेपमालाभूषितविग्रहः।

उद्यान्ते निर्जने देवीं चक्रे सञ्चिन्त्य पूजयेत्॥ ७०॥

कह्लारचम्पकाशोकपाटलाशतपत्रकैः।

सिद्धद्रव्यसमोपेतैर्मायाः सिद्ध्यन्ति मासतः॥ ७१॥

यासां प्रसादलाभेन कामञ्उपोभवेन्नरः।

याभिर्विश्वमयोविश्व चारी विश्वविनोदवान्॥ ७२॥

षडाधाराङ्गमध्ये तु चक्रं सञ्चित्य पूजयेत्।

चन्द्रचन्दनकस्तूरीसृगनाभिर्महोदयैः॥ ७३॥

त्रिकालज्ञो भवेद्देवीं तेषु सम्यग्विचिन्तयेत्।

पूर्णप्रीतौ भव्यानि विकलेऽभव्यमीरितम्॥ ७४॥

देवीं चक्रेण सहितां चुलुके सलिले स्मरेत्।

मातृकासहितां विद्यां त्रिरावृत्त्यामृतात्मकम्॥ ७५॥

नाडीं सारस्वतीं जिह्वां दीपाकारां स्मरन् पिबेत्।

अब्दाच्चतुर्विधं तस्त पाण्डित्यं भुवि जायते॥ ७६॥

एवं नित्युमुषःकाले यः कुर्याच्छुद्धमानसः ।
स योगी ब्रह्मविज्ज्ञानी शिवयोगी तथाऽऽत्मवित् ॥ ७७ ॥
अनुग्रहोक्तचक्रस्थां देवीं ताभिर्वृतां यजेत् ।
चम्पकेन्दिर्वरैर्मासादारोग्यमुपजायते ॥ ७८ ॥
ज्वरभूतग्रहोन्मादशीतिकाकामलाक्षिरुक् ।
दन्तकर्णज्वरशिरःशूलगुल्मादिकुक्षिजाः ॥ ७९ ॥
व्रणप्रमेहछर्द्यर्शग्रहण्यन्वत्रिदोषजाः ।
सर्वे तया समं यान्ति पूजया परमेश्वरि ॥ ८० ॥
द्रव्यं चक्रस्य निर्माणे काश्मीरं समुदूरितम् ।
सिन्दूरं गैरिकं लाक्षा दरदं चन्दनेऽपिवा ॥ ८१ ॥
बिलद्वारे लिखेच्चक्रं षोडशत्यस्रसंयुतम् ।
दरदेनास्य मध्यस्थां पूजयेत्परमेश्वरीम् ॥ ८२ ॥
ताभिस्तच्छक्तिभिःसाकं सिद्दद्रव्यैः सुगन्धिभिः ।
कुसुमैर्मासमात्रेण नागकन्याः समेस्त्य तम् ॥ ८३ ॥
पातालादिषु लोकेषु रमयन्ति प्रियाश्चिरम् ।
यक्षराक्षसगन्धर्वसिद्धविद्याधराङ्गनाः ॥ ८४ ॥
पिशाचा गुह्यका वीराः किन्नरा उरगाः प्रिये ।
सिद्ध्यन्ति पूजनात्तत्र तथा तत्प्रोक्तकालतः ॥ ८५ ॥
किंशुकैर्भूषणावाप्त्यै पाटलैर्गजसिद्धये ।

रक्तोत्पलैरश्वसिद्ध्यै कुमुदैर्ग् खरसिद्धये ॥ ८६ ॥

उत्पलैरुष्ट्रसंसिद्ध्यै तगरैः पशुसिद्धये ।

जम्बीरैर्महिषावाप्त्यै लकुचैरजसिद्धये ॥ ८७ ॥

दाडिमैर्निधिसंसिद्ध्यै मधुकैर्नागसिद्धये ।

बकुलैरङ्गनासिद्ध्यै  कल्हारैः पुत्रसिद्धये ॥ ८८ ॥

शतपत्रैर्जयावाप्त्यै केतकैर्वाहनाप्तये ।

सौरभाद्यैः प्रसूनैस्तु नित्यं सौभाग्यसिद्धये ॥ ८९ ॥

पूजयेन्मासमात्रं वा द्विगुणं त्रिगुणं तु वा ।

यावत्फलाप्ति व क्षिरशार्करघृतपायसैः ॥ ९० ॥

सचक्रपरिवारां तां देवीं सलिलमध्यगाम् ।

तर्पयेत् कुसुमैः सार्घ्यः सर्वोपप्लवशान्त्यये ॥ ९१ ॥

घृतैः पूर्णायुषः सिद्ध्यै क्षौद्रैः सौभाग्यसिद्धये ।

दुग्धैररोम्यसंसिद्धये त्रिभिरैश्वर्यसिद्द्ये ॥ ९२ ॥

नालिकेरोदकैः प्रीत्यै हिमतोयैर्नृपाप्तये ।

सर्वार्थसिद्दये तोयै रभिषिञ्चेन्महेश्वरीम् ॥ ९३ ॥

पूरोद्याने यजेद्देवीं सिद्धद्रव्यैर्दिबाऽनिशम् ।

निवसंस्तत्र तत्पुष्पैर्जायते मन्मथोऽपरः ॥ ९४ ॥

पूर्णासु नियतं देविं कन्यकायां समर्चयेत् ।

कृत्वा परेरिता मन्त्रा विमुखास्तान् ग्रसन्ति वै ॥ ९५ ॥

लिङ्गत्रयगतां देवीं चक्रस्थाभिः स्वशक्तिभिः।

पूजयन्निष्टमखिलं लभतेऽत्र परत्र च॥ ९६॥

शतमानकृतैः स्वर्णपुष्पैः सौरभ्यवासितैः।

पूजयेन्मासमात्रेण प्राग्जन्माघैर्विमुच्यते॥ ९७॥

तथा रतेन्स्च नवभिः मासं मासन्तु पूजयेत्।

विमुक्तः सर्वपापैघैस्तां पश्यति च चक्षुषा॥ ९८॥

अंशजौरर्चयेद्देविं मासमात्रं सुगन्धिभिः।

मुच्यते पापकृत्यादिदुःखैर्घोरतरैरपि॥ ९९॥

देवीरूपं स्वमात्मानं चक्रं शक्तीः समंततः।

भावयन्विषयैः पुष्पैः पूजयंस्तन्मयो भवेत्॥ १००॥

गन्धतत्त्वमयी व्याप्तिरित् सम्यक् समीरिता।

अस्या निष्फालनाच्चित्ते तत्तत्वं स्वात्मसात्कृतम्॥ १०१॥

इति श्रीषोडशनित्यातन्त्रेषु कादिमते षष्ठं पटलम्

अथ सप्तमं पटलम्।

अथ षोदशनित्यासु द्वितीया या समीरिता।

कामेश्वरीति ताः सर्वकामदाः शृणु तत्त्वतः॥ १॥

तत्त्वन्यासं ध्यानभेदांस्तच्छक्तीस्तत्प्रपूजनम्।

तद्योगबेदंस्तद्यन्त्राण्यभीष्टार्थप्रदानि च॥ २॥

विद्यारूपं तु ते देवि प्रोक्तं प्रागेव तत्स्फुटम्।
मूलविद्याक्षरैरेवं कुर्यादङ्गानि षट्क्रमात्॥ ३॥
एकेन हृदयं शीर्षं तावताथोऽद्वयं द्वयात्।
चतुर्भिर्नयनं तद्वदस्त्रमेकेन चोदितम्॥ ४॥
दृक्श्रोत्रनासाद्वितये जिह्वाहृन्नाभिगुह्यके।
व्यापकस्त्वेन सर्वाङ्गे मूर्ध्वादि प्रपदावधि॥ ५॥
न्यसेद्विद्याक्षराण्येषु स्थानेषु तदनन्तरम्।
समस्तेन व्यापकन्तु कुर्यादुक्तक्रमेण वै॥ ६॥
अथ ध्यानं प्रवक्ष्यामि नित्यपूजासु चोदितम्।
येन देवी सुप्रसन्ना ददातीष्टमयत्नतः॥ ७॥
कलार्ककोटिसङ्काशां माणिक्यमुकुटोज्ज्वलाम्।
हारग्रैवेयकाञ्चीभिरूर्मिकानूपुरादिभिः॥ ८॥
मण्डितां रक्तवसनां रत्नाभरणशोभितात्।
षड्भुजां त्रिक्षणामिन्दुकलाकलितमौलिकाम्॥ ९॥
पञ्चाष्टषोडशद्वन्द्वषट्कोणचतुरस्त्रगाम्।
मन्दस्मितोल्लसद्वक्त्रां दयामन्थरवीक्षणाम्॥ १०॥
पाशाङ्कुशौ च पुण्ड्रेक्षुचापं पुष्पशिलीमुखम्।
रतपात्रं सुधापूर्णं वरदं बिभरीं करैः॥ ११॥
एवं ध्यात्त्वाऽर्चयेद्देवीं नित्यपूजासु सिद्धये।

प्रयोगादिषु सर्वत्र वक्ष्ये ध्यानानि तत्र वै ॥ १२ ॥

मदनोन्मादनौ पस्चात्तथा दीपन्मोहनौ ।

शोषणश्चेति कथिता बाणाः पञ्च पुरोदिताः ॥ १३ ॥

कुसुमा मेखला पस्चान्मदना मदनातुरा ।

अनङ्गपदपूर्वास्ताः पञ्चमी मदवेगिनी ॥ १४ ॥

ततो भुवनपाला स्यात् शशिरेखा त्वनन्तरा ।

रेखा गगन्पूर्वाऽन्या पूज्या पत्रेषु चाष्टसु ॥ १५ ॥

श्रद्धा प्रीती रतिश्चैव धृतिः कान्तिर्मनोरमा ।

मनोहराऽष्टमी प्रोक्ता देवी सऽत्र मनोरथा ॥ १६ ॥

मदनोन्मादिनी पश्चान्मोहिनी दीपनी ततः ।

शोषणी च वशंकारी सिंजिनी सुभगा ततः ॥ १७ ॥

सस्वराः षोडश प्रोक्ताः प्रियदर्शन कान्तिकाः ।

पूज्यास्ताः प्रतिपत्त्रं तु प्रत्येकं षोडशच्छदे ॥ १८ ॥

पूषावेशा सुमनसा रतिः प्रीतिर्धृतिस्तथा ।

वृद्धिसौम्या मनीचिश्च परतस्त्वंशुमालिनी ॥ १९ ॥

शशिनी चाङ्गिरा छाया ततः सम्पूर्णमण्डला ।

तुष्ट्याऽमृताख्या कथिताः कलाः स्युः सस्वरा विधोः ॥ २० ॥

षोडशेष्वपि पत्रेषु पूजयेत्ता यथाक्रमम् ।

बहिः षट्कोणकोणेषु डाकिन्याद्यास्तथाऽर्चयेत् ॥ २१ ॥

तद्बहिः चतुरस्रस्थां लिकेशां तत्समां यजेत्।
बटुकं गणपं दुर्गां क्शेत्रेशं चाभितो यजेत्॥ २२॥
अग्न्याद्यस्रेषु विद्यादि सप्ताक्षर्यन्तरास्थितौः।
तन्नामभ्भिर्बलिं तेभ्यो दद्यद्गन्धादि चोदितैः॥ २३॥
तस्तामङ्गविद्याभ्यां क्लृप्ताघ्र्यः पूजयेत्च्छिवाम्।
प्रागुक्तैरुपचाराद्यैर्होमं कुर्यात्ततस्थथा॥ २४॥
घृताक्तैर्मधुराक्तैर्वा प्रसूनैररुणैः शुभैः।
अन्नाद्याभ्यां प्रजुहुयात्ततह् प्राग्वत् समापयेत् ॥ २५॥
एवं नित्यं पूजयितुरायुरारोग्यसम्पदः।
लोकानुरञ्जनं नारीनृपावर्जनकर्म च। २६॥
अपृथत्त्वेन सिद्ध्यन्ति तद्योगान् शृणु सुन्दरि।
महाचमत्कारकरांस्त्रैलोक्यक्षोभणक्षमान्॥ २७॥
पुरा देवी पञ्च कामान् पञ्च ज्ञानात्मकान्निजान्।
ससर्ज बाणानुक्तांश्च त्रिविधान् प्रागुदीरितान्॥ २८॥
तेषां नामानि रूपाणि मन्त्रांश्च क्रमतः शृणु।
यैर्विश्वं वशमायाति क्शणात्तद्भावनादिना॥ २९॥
प्रथमः कामराजाख्यो द्वितीयोमन्मथस्तथा।
कन्दर्पस्तत्तृतीयोऽभुत्ततो मकरकेतनः॥ ३०॥
मनोभवः पञ्चमः स्यात् नामान्येतानि वै क्रमात्।

ध्यानं तेषां शृनु प्राज्ञे विश्वविक्षोभकारिणाम्॥ ३१ ॥

पीतश्वेतारुणाकारास्त्रयोऽन्यै धूम्रनीलकौ ।

सर्वे द्वोनेत्रा द्विभुजाः स्मरेवक्त्रसरोरुहाः ॥३२॥

पुण्ड्रेक्षुचापपुष्पेषुधरा भूतात्मकाः क्रमात् ।

विश्वाकारा विश्वमनोविक्षोभनियतात्मकाः॥ ३३॥

एष्ःआं मन्त्रान् शृणु प्राज्ञे क्रमादेकाक्षरानपि ।

यैरेकैकैः सङ्गतैश्च यन्त्राणि स्युः पृथक्॥ ३४॥

सहंसदाहवह्निस्वैः कामराजः समीरितः

प्राणोरासावह्नियुतस्तथा स्वेनापि मन्मथः॥ ३५॥

शुचिः स्वसंयुतः प्रोक्तः कन्द्र्पऽम्बुरसायुतम् ।

क्श्मया स्वेन च सम्प्रोक्तः सोऽयं मकरकेतनः॥ ३६॥

सहृद्रयैर्दाहवनिस्वैरुक्तीभून्मनोभवः ।

भालवक्त्रसहृन्नाभिगुह्येष न्यासतस्त्वमी॥ ३७॥

समस्तावाशगान् कुर्यबाणानिष्वेव मूलतः ।

भालान्तं विन्यसेन्नित्यं यः स सर्वाङ्गनास्मरः॥ ३८॥

एषां यन्त्राणि सर्वाणि त्रैलोक्यक्शोभणानि च ।

तानि क्रमेण कथयाम्नाकर्णय समाहिता॥ ३९॥

तेष पञ्चसु बिजेषु पुनरुक्तिविवर्जितैः ।

योजयेदष्टभिस्तैस्तैः स्वरान् षोडश मायया॥ ४०॥

अष्टाविंशतिसंयुक्तं शतं तेन भन्ति वै ।

तैर्यन्त्राणि विधेयानि पञ्चानां क्रमतः शिवे ॥ ४१ ॥

वृत्तत्रयस्थं षट्कोणं कृत्वा मध्ये स्वसक्षरम् ।

लिखेत् साध्याख्ययोपेतं षट्सु कोणेषु तत् पुनः ॥ ४२ ॥

विभज्य बिन्दुमायाभ्यामध ऊर्ध्वं लिखेत् क्रमात् ।

वृत्तान्तरालयोर्बाह्ये चतुःषष्ट्या द्विरालिखेत् ॥ ४३ ॥

एवं यन्त्राणि पञ्च स्युः पञ्चानां क्रतः शिवे ।

पञ्चभिश्चैकमस्त्यन्यद्यन्त्रं सुमहदद्भुतम् ॥ ४४ ॥

द्वितीय जठरे त्वाद्यं सनाम विलिखेत्तयोः ।

बहिस्तृतीयरूपेण षट्कोणेन प्रवेष्टयेत् । ॥ ४५ ॥

चतुर्थं विलिखेत् कोणेष्वेषु षट्स्वपि पार्वति ।

वेष्टयेत् पञ्चमेनैव तद्यन्त्रं सर्वमोहनम् ॥ ४६ ॥

तस्यापि परतो बाह्ये तैरावेष्ट्य पुरोदितैः ।

यन्त्रान्तरं तु जनयेद्बहिर्मातृकयाऽपि च ॥ ४७ ॥

यन्त्राण्यष्टौ भन्त्येवं पञ्च कामात्मकानि वै ।

तैरसाध्यं जगत्स्वेषु न किञ्चिन्न कदाचन ॥ ४८ ॥

मनुजं मनुजेशं वा महिलां वा मदाविलाम् ।

अष्टसूक्तेषु मध्यस्थं भावयेत् स्वेन तेजसा ॥ ४९ ॥

एकीभूतं जपेदेतान्यक्षराण्यपि पञ्च तैः ।

तेन ते वशगाः क्शिप्रं यावज्जीवंसुनिश्चितम् ॥ ५० ॥

तेषु मध्यस्थमाध्यस्थमात्म साध्ये जपारुणम् ।

तन्मन्त्रार्णप्रकाशेश्च तथाऽरुणतैर्वृतम् ॥ ५१ ॥

भावयन्नात्मना ग्रस्तं जपेत्तान्यक्षराण्यपि ।

तेन ते वशगाः क्शिप्रं दद्युः प्राणान् धनानि च ॥ ५२ ॥

तस्य षष्ठस्य मध्यस्थबीजे मन्त्रेण वेष्टयेत् ।

प्राग्वन्निजसुषुम्णान्तर्भावयेद्योनिमुद्रया ॥ ५३ ॥

एवं तदष्टमध्यस्थं कुम्भं कृत्वा यथाविधि ।

येनाभिषिञ्चेत् दौर्भाग्यरोगदारिद्र्यमुक्तये ॥ ५४ ॥

कुचन्दननैर्वा सिन्दूरैर्गैरिकैर्दरदैस्तु वा ।

कृत्वा चक्राष्टकं भूमौ फलकायां शिलासु च ॥ ५५ ॥

मध्य विद्यावृतं कृत्वा तत्राऽऽबाह्याभिपूज्य ताम् ।

कामेश्वरीतदग्रस्थो जपेल्लक्षं पयोव्रतः ॥ ५६ ॥

तेनास्य पूर्वजन्मान्त दुष्कृतान्यपयान्ति वै ।

अस्मिन् जन्मनि सल्लक्श्मीमवाप्य सुखमेधते ॥ ५७ ॥

नरं नारी नृपं चान्यं नगरं वाऽथ पत्तनम् ।

देशं जनपदं विश्वं तन्मध्ये प्रतिलिख्य तत् ॥ ५८ ॥

पूजयेदरुणैः पुष्पैर्गन्धैः काश्मीरसंयुतैः ।

नैवेद्यैः कदलीदुग्धशर्करापायसादिभिः ॥ ५९ ॥

मँडलं वा तदर्द्धं वा सप्तवासरमेव वा ।

कन्दर्पसमसौभाग्यो जायते नियन्तं नरः ॥ ६० ॥

सुवर्णादिषु सम्लिख्य धारणाद्धरणीतले ।

लक्ष्मीकान्तिधनारग्यैरायुः पूर्णमवाप्नुयात् ॥ ६१ ॥

अनावृत्तैस्तु विद्यार्णैः षोडशस्वरयोजनात् ।

द्वानवत्या शतं वर्णा जायन्ते मन्त्रसम्भवाः ॥ ६२ ॥

स्वराणां सर्वमेन्त्रेषु योजनं केन हेतुना ।

क्रियते परमेशान् तन्मे कथय साम्प्रतम् ॥ ६३ ॥

स्वराः षोडश देवेशि व्यञ्जनानि तथा पुनः ।

पञ्चत्रिंशत् समाख्यातं तयोरन्योन्यसङ्गतैः ॥ ६४ ॥

भारत्या देहभीतैस्तैर्व्यञ्जनैः स्वरयोजनम् ।

तत्प्राणयोजनं विद्धि रहस्यं परमेश्वरि ॥ ६५ ॥

भारत्या वर्णरूपाया हसौ नेत्रे समीरिते ।

प्राणाः श्वराः समाख्याता बिन्दुसर्गौ तु चेतना ॥ ६६ ॥

अन्यान्यवयवानि स्युरन्यानि परमेश्वरि ।

तेन तद्युक्तितो वर्णाः प्रसीदन्ति न चाऽन्यथा ॥ ६७ ॥

बिन्दुसर्गौ हसा तुर्यस्वरस्चेति च पञ्चमम् ।

भारत्या मातृकादेहे विद्धि चेतन्यजृम्भणम् ॥ ६८ ॥

तेन तैर्होनरूपास्तु मन्त्रा विद्यास्तथाऽपरे ।

निश्प्राणदेहवत् कार्यकरणेष्वक्षमाः स्मृताः ॥ ६९ ॥

तेन सर्वत्र तु मया स्वैर्योग उदीर्यते ।

ये ये मन्त्राः प्रोक्तवर्णविहोनास्तैश्च  योजयेत् ॥ ७० ॥

तेन ते बलवन्तः स्युः कार्येषु च फलान्विताः ।

तस्मात् सर्वत्र संयोगात् स्वैरैः सर्वार्थसिद्धिदाः ॥ ७१ ॥

एवं तैरेव जायन्ते यन्त्राणि सबलानि वै ।

द्वात्रिंशद्विनियोगाँश्च वक्ष्ये तेषामनुक्रमात् ॥ ७२ ॥

वृत्तद्वयान्तः षट्कोणं कृत्वा मध्ये निजेप्सितम् ।

मायागर्भं समालिख्य वेष्टयेन्मातृकाक्षरैः ॥ ७३ ॥

प्रथमे कनकावाप्तिर्वितीये भूषणोदयः ।

तृतीये कन्यकासिद्धिश्चतुर्थे भूपरिग्रहः ॥ ७४ ॥

पञ्चमे वाहनावाप्ति षष्टे स्त्रीवश्यमीरितम् ।

सप्तमे भवनावाप्तिरष्टमे धेनुसङ्गमः ॥ ७५ ॥

नवमे वशयेत्भूपं दशमे वारणं हयम् ।

एकादशेन विजयी नरः समरसीमनि ॥ ७६ ॥

वादेस्ःउ व्यवहारेषु द्यूतेषु विविधेष्वपि ।

द्वादशेऽभीप्सिताऽऽवाप्तिः परेणारिविनाशनम् ॥ ७७ ॥

गजवाजिस्वरोष्ट्राणां नरगोमृगपक्षिणाम् ।

भुजङ्गमेषमहिषवाजिनान्त्वाशु नाशनम् ॥ ७८ ॥

तत्तत्त्वचि च तद्रकैर्लिखितां तत्र तत्र च।
स्थापितं मण्डलान्मासात् सप्त्राचादथापि वा॥ ७९॥
चतुर्दशेन वृष्टिः स्यात् परेण जृम्भणं रिपोः।
क्रोधवैरसमुद्योगगमनादिरेपि ध्रुवम्॥ ८०॥
षोडशेन घृतेनाग्नौ भूताद्यैर्नैव बाध्यते।
ततः परेण यन्त्रेण खातेन धरणितले॥ ८१॥
रक्षा भवति सर्वत्र प्राणिनां भवति ध्रुवम्।
अनन्त्राभ्यां खननात् कलहोद्वेगयोर्द्वयोः॥ ८२॥
सस्यानां बहुभिः क्लेशैर्नाश स्यत्भूरुहामपि।
देशानामपि चान्योन्यकलहात् पीडनं भवेत्॥ ८३॥
अनन्तरेण यन्त्रेण विरोधो भूबुजां भवेत्।
राष्ट्रसन्धितले तस्य खननेनाल्पकालतः॥ ८४॥
एकविंशेन यन्त्रेण रोगार्ता वैरिणो ध्रुवम्।
द्वाविंशेन गवां रोगस्त्रयोविंशेन दन्तिनाम् ॥ ८५॥
चौर्विंशेन वाहानां पञ्चविंशेन भूभुजाम्।
षड्विंशेन प्रधानानां रोगावाप्रिढं भवेत्॥ ८६॥
सप्तविंशेन तेषान्तु प्रोक्तानां क्लेशनाशनम्।
अष्ट्टाविंशेन यन्त्रेण कृत्याप्रतिनिवर्तते॥ ८७॥
धारणाद्भुषु खननात् वृक्षाग्रादिषु बन्धनात्।

तडागकूअवाप्यादिष्वर्पणाद्याति सा ध्रुवम् ॥ ८८ ॥

ततः  परेण यन्त्रेण वाग्मी मूकोऽपि जायते ।

तत ऊर्ध्वेन यन्त्रेण वैर्वाक्स्तम्भनम् भवेत् ॥ ८९ ॥

एकत्रिंशेन यन्त्रेण वाहानां दन्तिनामपि ।

रक्षा भवति तद्भूष खननाद्धारणादपि ॥ ९० ॥

द्वत्रिंशेनाम्बुधै पोता न क्लिश्यन्ति कदाचन ।

पारं प्रयान्ति चाऽक्लेशाद्विचित्रा यन्त्रशक्तयः ॥ ९१ ॥

षोडशानां तु नित्यानां प्रत्येकं तिथिषु क्रमात् ।

तत्तत्तिथौ तद्भजनं जपहोमार्चनादिना ॥ ९२ ॥

घृतं च शर्करा दुग्धमपूपं कदलीफलम् ।

कोस्द्रं गुडं नालिकेरं फलं लाजां तिलं दधि ॥ ९३ ॥

पृथक चणकं मुद्गं पायसं च निर्वेदयेत् ।

प्रतिपत्तिथमारभ्य क्रमात्पञ्चदशस्वपि ॥ ९४ ॥

कामेश्वर्यादिशकीनां सर्वासामपि चोदिताम् ।

आद्याया ललितायास्तु सर्वण्येतानि सर्वदा ॥ ९५ ॥

निवेदयेच्च जुहुयाद्वह्नौ दद्यान्नृणामपि ।

विद्याशक्तिमतां नित्यसमीष्टावाप्तयेऽनिशाम् ॥ ९६ ॥

तत्तद्विद्याक्षरप्रोक्तमौषधं तत्प्रमाणतः ।

संपिष्य गुटिकां कृत्वा ताभिः सर्वत्र साधयेत् ॥ ९७ ॥

अर्घ्यवत्तर्पणं नित्यं स्नानं पानं च भोजनम्।
पटीरसंयुतं भाले धारणं सर्वसिद्धिकृत्॥ ९८॥
राज्ञाआं विशेषतो रक्षां कुर्यादेतैस्तु नित्यशः।
स्नाने पाने धारणे च गुलिकायोजनेन वै॥ ९९॥
रोगापमृत्युकृत्यादिदोषा ग्रहसमुद्भवाः।
न भादन्ते ततो नित्यमर्चयेत् स्वगृहे क्वचित्॥ १००॥
एषा रसमयी व्याप्तिरिति सम्यक्समीरिता।
अस्या निष्फालनाच्चित्ते तत्तत्त्वं स्वात्मसात्कृतम्॥ १०१॥
इति श्रीषोडशनित्यातन्त्रेषु श्री कादिमते सप्तमं पटलं परिपूर्णं परांऋष्टम्॥ ७॥

अथ अष्टमं पटलम्।
अथ षोडशनित्यासु तृतीयां भगमालिनीम्।
शृणु देवि प्रवक्ष्यामि साङ्गां सावरणां क्रमात्॥ १॥
तदङ्गान्यथ तद्ध्यानं  तदावरणदेवताः।
तत्पूजायाः क्रमं होमं यन्त्राणि विविधानि च॥ २॥
तन्मन्त्रोद्धार उदितः पूर्वमेव मया तव।
अङ्गानि मन्त्रवर्णैः स्यादाद्येन हृदुदीरितम्॥ ३॥
ततस्चतुर्भिः शीर्षं स्यात् शिखा त्रिभिरुदीरिता।
चतुष्टयत्रयैः शेषाण्यङ्गानि षडिति क्रमात्॥ ४॥

अरुणामरुणाकल्पां सुन्दरीं सुस्मिताननाम्।

त्रिनेत्रां बाहुभिः षड्भिरुपेतां कमलासनाम्॥ ५॥

कल्हारपाशपुण्ड्रेक्षुकोदण्डान्वामबाहुभिः।

दधानां दक्षिणैः पद्ममङ्कुशं पुष्पसायकम्॥ ६॥

तथाविधाभिः परितो वृतां शक्तिगणैस्तुतैः।

अक्षरोत्थाभिरन्याभिः स्मरोन्मादमदात्मभिः॥ ७॥

पञ्चत्रिंशच्छतार्णैस्तै रूपिणीशक्तिपञ्चकम्।

सप्ताक्षरीं च संयोज्य शक्तीस्तत्सङ्ख्यका यजेत्॥ ८॥

मदनां मोहिनीं लोलां जम्भिनीमुद्यमा शुभां।

ह्लादिनीं द्राविणीं प्रीतिं रतिं रक्तां मनोरमाम्॥ ९॥

सर्वोन्मादां सर्वसुखाममनङ्गा मभितोद्यमाम्।

अनल्पां व्यक्तिविभवां विविधिक्षोभविग्रहे॥ १०॥

एताः स्युः शक्तयः पञ्चपञ्चाशद्भिः शतंद्वयम्।

ताभिर्वृतां तु तां देवीं पूजयेद्वाञ्छिताप्तये॥ ११॥

अथ पूजाक्रमं देवि शृणु सर्वार्थ्दायकम्।

येन विश्वं वशे भूयादपि स्थावरजङ्गमम्॥ १२॥

चतुरस्रद्वयं कृत्वा जुर्याद्वारं तु पश्चिमे।

तन्मध्येऽब्जं पञ्चदलं कृत्वा तत्कर्णिकागतम्॥ १३॥

योनिद्वयंतयोर्मध्ये तिर्यग्रेखाविधानतः।

पञ्चत्रिंशच्छतं सङ्ख्यायोनयः परितःस्थिताः ॥ १४ ॥

अग्राद्विलोमगास्तास्तु शक्ती संस्थाप्य पूजयेत् ।

मध्ये वृत्तत्रयं कुर्यात्तत्र विंशतिरेखया ॥ १५ ॥

निष्पाद्य तावतीर्योनीर्मदनाद्याः समर्चयेत् ।

वृत्तान्तराले त्वभिता यजेदङ्गानि षट् क्रमात् ॥ १६ ॥

तन्मध्ये भगमालां तामावाह्योक्तस्वरूपिणीम् ।

संस्थापनादिभिर्युक्तामर्चयेदुपचारकैः ॥ १७ ॥

अर्घ्यमङ्गैश्च मूलेन संसाध्याभ्युक्ष्य मूलतः ।

द्वारस्य पार्श्वयोरागद्वेषशक्तीस्तथाऽर्चयेत् ॥ १८ ॥

शब्दस्पर्शौ तथा रूपं रसं गन्धं च पूर्ववत् ।

तदन्तवृत्तयोर्मध्ये षडङ्गानि तथाऽर्चयेत् ॥ १९ ॥

तदन्तर्भगमालायां मदनाद्यास्तथाऽर्चयेत् ।

मध्ये च देवीमभितो (षडे)

यजेतान्यायुधान्यपि ॥ २० ॥

ततो देवीं षोडशभिरुपचारैरुदीरितैः ।

पूजयेदाद्यवर्णेन विदध्यात्तद्विलद्वयम् ॥ २१ ॥

जपेदष्टोत्तरशतमग्रे देव्यास्तु नित्यशः ।

प्राग्वदग्निमुखं कृत्वा होमं कुर्याद्दशांशतः ॥ २२ ॥

संयोज्य बिन्दौ तां प्रायो मूलेनाभ्यर्च्य तां तथा ।

स्वात्मन्युद्वासयेदुक्तप्रकारेण महेश्वरीम् ॥ २३ ॥

देव्यात्मा वशयेद्विश्वं नरनारीनराधिपान् ।

काम्यहोममथो वक्ष्ये नानाभीष्टाप्तिदायकम् ॥ २४ ॥

त्रिमध्वक्तैः पुण्डरीकैर्होमाद्विप्रा वशं नयेत् ।

आरग्वधैस्तु राजानं करवीरैस्तु वैश्यकम् ॥ २५ ॥

उत्पलैर्वशयेच्छुद्रं वनितां जपया हुतैः ।

बिल्वैर्लक्ष्मीर्भवेद्धोमैर्भूम्याद्यैः कमलैर्हुतात् ॥ २६ ॥

कैरवैर्बाहनावाप्तिर्वरपुष्पैर्महद्यशः ।

सौभाग्यं चम्पकैः सिद्धै रक्तसौगन्धिकं हुनेत् ॥ २७ ॥

तगरैर्वस्त्रसंसिद्धयै पुन्नागैर्भूषणाप्तये ।

मधुकैः कन्यकासिद्धयै पलाशैः स्वर्णसिद्धये ॥ २८ ॥

किंशुकैरंशुकावाप्त्यै पाटलैः पशुसिद्धये ।

रक्तोत्पलैः सर्वसिद्धयै होमयेत्परमेश्वरि ॥ २९ ॥

अथ यन्त्राणि वक्ष्यामि वाञ्छितार्थप्रदानि तु ।

चन्दनागुरुकर्पूरकस्तूरीकुङ्कुमैर्लिकेत् ॥ ३० ॥

सर्वाणि सर्वतो यन्त्राण्यभीष्टावाप्त्रिकामुकः ।

सुवर्णे रजते ताम्रे त्वंशुके भूर्जपत्रके ॥ ३१ ॥

धारणं मूर्ध्नि बाह्वोर्वा कण्ठे कट्यां प्रकोष्ठके ।

निधाय क्वापि पूजां वा कुर्याद्यन्त्राण्यशेषतः ॥ ३२ ॥

षट्कोणं वृत्तयोर्मध्ये कृत्वा तन्मध्यतस्तथा ।
योनिं विलिख्य तन्मध्ये मायां साध्यसमन्विताम् ॥ ३३ ॥
विलिख्य कोणत्रितये वह्नि षट्केपि संलिखेत् ।
एकैकवृत्तयोर्मध्ये शेषार्णानि समालिखेत् ॥ ३४ ॥
बहिर्मातृकया वेष्ट्यवृत्तान्तबिन्दुयुक्तया ।
एवं यन्त्राणि मन्त्रार्णैर्दशभिर्दशभिर्भवेत् ॥ ३५ ॥
चरमेऽमृतषष्ट्यैव शेषं संपूजयेच्छिवे ।
ज्या कांदावोऽम्बु हृत्स्वेन माययाऽमृतपञ्चकम् ॥ ३६ ॥
तत्पञ्चकं स्वरैर्भेदादशीतिर्माययया तथा ।
तैः षण्ढहीनैः षष्टिः स्यान्मायया च तथा भवेत् ॥ ३७ ॥
षष्ट्या शतं समुद्दिष्टं वर्णेष्वमृतविग्रहम् ।
तेषां सर्वत्र तन्त्रेऽस्मिन् विनियोगोविधीयते ॥ ३८ ॥
चतुर्दशानां यन्त्राणां विनियोगं शृणु प्रिये ।
वश्यमाकर्षणं स्तम्भमारोग्यं विजयं श्रियम् ॥ ३९ ॥
रक्षां गजाश्वगोमेषमहिषाणामनुक्रमात् ।
नरनारीनृपाणां च प्रोक्तयोगेन साधयेत् ॥ ४० ॥
अमृतार्णैः स्वमूलार्णैः  ललितारहिस्तैस्तु तैः ।
नित्याचतुर्दशार्णैश्चाप्येकषष्टिशतेन च ॥ ४१ ॥
षटपञ्चाशत्समोपेतं चतुःशतमुदीरितम् ।

तैर्यन्त्ररचनायोगं फलानि च शृणु प्रिये ॥ ४२ ॥
त्रिकोणमष्टपत्राब्जं बहिर्वृत्तद्वयं तथा ।
विधाय मध्ये मायास्थं कृत्वा नामत्रिकोणगम् ॥ ४३ ॥
अन्तरालत्रयं त्रिस्थं बहिः पत्राष्टगामिव ।
चतुर्दशार्णमालिख्य वृत्तमध्ये तु मातृकाम् ॥ ४४ ॥
विलिख्यार्चाहुतजपसेकसिद्धानि योजयेत् ।
त्रयस्त्रिंशत्तमं यन्त्रं सशक्त्यमृतपञ्चकैः ॥ ४५ ॥
ज्वरे घोरे शीतकायां तथा चातुर्थिके गदे ।
स्फोटे मसूरिकायां च नेत्राभ्यं कुक्षिसंभवे ॥ ४६ ॥
यक्षराकसगन्धर्वपिशाचोरपीडने ।
बालग्रहार्तौ दौर्भाग्ये बन्ध्यात्वे वैरिपीडने ॥ ४७ ॥
वादे चोन्मादने राजक्रोधे चोरभये तथा ।
डाकिन्यादिगणैः षड्भिराक्रान्त्यां ब्रह्मराक्षसैः ॥ ४८ ॥
प्रमेहकामलाछर्दिदोषजेषु त्रिषु क्रमात् ।
योजयेदुक्तविधिना त्रस्त्रिंशदितीश्वरि ॥ ४९ ॥
कामेश्वर्यादिनित्यानां साधारणसमर्चनम् ।
शृणु देवि प्रवक्ष्यामि सर्वाङ्गाङ्गित्वयोगतः ॥ ५० ॥
तासां पञ्चदशानान्तु मन्त्रवर्णाः समीरिताः ।
शतद्वयं षण्णवतिं तैश्चक्रं तत्र पूजनम् ॥ ५१ ॥

प्राक्प्रत्यग्दक्षिणोदक्च रेखाविंशतिमालिखेत्।
तेन कोष्ठानि जायन्ते चतुरस्त्राणि पार्वति ॥ ५२ ॥
शतत्रयं त्वेकषष्ट्यां तेष्वीशादिप्रदक्षिणम्।
प्रदेशगत्या विलिखेद्यावत्सङ्ख्यं यथान्तरम्॥ ५३ ॥
पञ्चषष्तिस्तेषु दिक्षु प्रागादिषु चतुष्टयम्।
अवशिष्टं भवेत्तेषु दि ।ह्स्थेष्वेकीकृतेषु च ॥ ५४ ॥
मायां चतुष्टयान्तस्थमालिखेद्वाञ्छितं क्रमात्।
एकोनपञ्चाशत्कोष्टेश्वेकीभूते(न)षु तत्र वै ॥ ५५ ॥
पद्मं चतुर्दशदलं बहिर्वृत्तद्वयं तथा।
लिखित्वा कर्णिकामध्ये योनिं मायोदरां लिखेत्॥ ५६ ॥
दलेष्वपि तथा शक्तिं चतुर्दशसु संलिखेत्।
भगमालां मध्यशक्त्यामावाह्याभ्यर्चयेद्बहिः ॥ ५७ ॥
पश्चिमादि तु वाय्वन्तमन्या आवाह्य पूजयेत्।
यथाक्रममिदं चक्रमासां साधारणं भवेत्॥ ५८ ॥
मध्ये मध्ये (तथा)
तु या पूज्या शेषास्तत्र दलाश्रिताः।
यथाक्रमेण चित्रान्ताः पूजयेदुक्तविग्रहाः ॥ ५९ ॥
चतुरस्त्रद्वयं बाह्ये कृत्वा द्वाराणि दिक्षु च।
द्वाराणां पार्श्वयोः कोणेष्वर्चयेद्द्वादश क्रमात्॥ ६० ॥

ब्राह्मी माहेश्वरीं द्वारे पश्चिमे सव्यदक्षिणे ।

कोमारीं वैष्णवीं सौम्ये वराह्यैन्द्रीं च पूर्वगे ॥ ६१ ॥

चामुण्डासु महालक्ष्मीर्याम्ये वाय्वादिकोणगाः ।

देशकालौ तथाकारशब्दौ प्रोक्तक्रमेण वै ॥ ६२ ॥

पूजयेत्प्रोक्तरूपैस्तु (श)

प्रोक्तरूपाश्च ताः क्रमात् ।

उपचारैरासवैश्च मांसैर्मत्स्यैः सुसंस्कृतैः ॥ ६३ ॥

अपूपैः पायसैर्दुग्धैः सुशृतैः सितसंयुतैः ।

कदलीपनसाद्यैस्च फलैर्मधुभिरेव च ॥ ६४ ॥

नैवेद्यैः प्रीणयेदेवीं नृत्यगीतादिभिस्तथा ।

एकरात्रं त्रिरात्रं वा पञ्चरात्रं तु सप्त वा ॥ ६५ ॥

नवरात्रं तथ पक्षं मासं पूर्णादिकं तु वा ।

वर्षं वा फाल्गुनान्तं व स्यात्समस्तार्तिनाशनम् ॥ ६६ ॥

ग्रहाणां प्रातिकूल्येषु दीर्घरागेषु वैकृते ।

देवतानामथोत्पाते त्रिविधे त्वभिचारके ॥ ६७ ॥

दारिद्र्यविजयप्राप्तां दुर्भिक्षे शत्रुपीडने ।

कृच्छ्रेष्वन्येषु घोरेषु पूजैषा सर्वकामदा ॥ ६८ ॥

पीठे वा सुसमे कृत्वा वेदिकामण्डने तु वा ।

कृत्वैतत्प्रोक्तरूपं च प्रोक्तद्रव्यैस्तथाऽर्चयेत् ॥ ६९ ॥

नमेरुचम्पकाशोकपुन्नागबकुलाम्बुजैः।

मल्लिकाकामालतीजातीशतपत्रोत्पलादिभिः॥ ७० ॥

सुगन्धिभिस्तथाऽन्यैश्च पूजयेत्पूर्णमानसः।

एतद्विद्याभक्तिरूपास्तियुनानन्यांश्च पूजयेत्॥ ७१ ॥

वंषुते सष्वरे तु वा चेतत्ताकं वांपि(त)परस।

यजाधाहीना पूविब्रुतु(वा) चावल्पस्यनं (सका) शकं॥

ङ्गेमिणुथपाया श्रुकं न(म) स कम्पल्पगावर्सं(ण)श्वी

ध्वाथाडी (धीष्ठीस्थाली) मयैतगै।

तित्रिविधंवं (त्वे) तस्मृत(वित्यो)

वितवलीं माषुधीगौचते॥ ७४ ॥

जंद्विपिष्टेष्टस्वाचसेद्यंद्यन्दोड (स्वादोलकामादु)

षामत्वगौण्डुतनाथशृप्री

(स्तोकेल) मनत्वाक्षि(त)मुदग्रपेत् द्यान्निमाक्षिलोविसत्मिक्

चपेतेतकामध्वजः सुनोतरकीमधास्तु।

(मौध्यात्वथो) त्वायो भूसंरवासाक्षोमूरेयसम्यकस्मिन्।

त्रेतेसतमागमातंरसिमदुग्नेजनिन।

पूयेषोन्ते ध्वज(श)सन्तः गुयो

(लिगलालपैः)मावयोमस एष्टीण्डध्वी प्रियैशृनायोद्विणे।

ध्यतेर्धनु अनैःत्तलं पशयेडुश्रस्मिन् योते।

न तत्रषिंदिपेत् रजः(यं)

षिकुरसातेकतम्।

न वामे धृदितः स्थाये वां तने पनिश्चात् लोतं॥

दयकेलि(ऊ)ड्धुपैकं लिमतं ष्टिगानि स्फूर्जं।

क्षये जंलवृधुविते विमधंद्यद्विज्ञेणंण्डं।

(रोसाणुत्रि) विप्रार्माशृतंयदानालस्वात्मयरंवाषाद्वी।

जूञ्ञथमृवा(प्यथा)ष्कलालं पिषुमफेस्वास्यासिधू।

क्षिकभमतं धीशेतषिम(वश्रि)चशृन(शैं)सलेस।

(से)शेध्वाच प्राकया(न्)

त् दिसलिद्वतं व मिहं स्वापुलि।

आतं दुगाभं यरं नोशुल्कमस्यनाकेर्क्षं।

रन्तु लिवातः स्याताताललथहिंधडाततम्।

लदुकां सप्तर्हद्योसाभंवसरनिस्थरलां।

लितकेफना तेशनालियुतेशिसथंगल।

रद्रक्कापुफ आयेत् क्षितासयनिरप्यतस ए।

तवैद्य आवदतं शतं वपि दाते रेणुस।

दिवेभि श्रायेत् वावेध्यार्दर्थं निरध्योत्वातव्यै।

स्मकृतदेयं द्वातद्यात् द्वसियदानिरताध।

हाकोयसास्थचेत्मास्वधिपिसङ्धोचित् चेत्कसि।

दापिनतन्अवेवेदित्तनिपिततताकुर्नवी ।
चकत्त्यायः त्तनोवलन्ममयाद्यः रोचैत्तत्स ।
कति नवं भवति तध्रुकी चपान्यत् गुसिवष्ठा ।
नारुदेया समावसन्नावपि स्वरादन्तडयः ।
कीजपा च स ए द्याचपांनवितत्धयोध्य ।
रेसाकसान्तं च मीम्परिसेसवाङ्कं सदाद्ध ।
प्रोस्यर्वशिवेत् त्वयोतोभसो न्मया ॥ ९० ॥
अथान्यं शृणु देवेशि चक्रमद्भुतदर्शनम् ।
योन्यर्णवाख्यं वनितागवपर्वतवज्रकम् ॥ ९१ ॥
षड्विंशाङ्गुलमानेन कृत्वा योनिसमे तले ।
तत्र ह्यङ्गुलमानेषु सूत्राण्येकादशार्पयेत् ॥ ९२ ॥
तेनात्र योन्योजायन्ते त्रिकोणानि शतात्परम् ।
चत्वारिंशाच्च चत्वारि तेषु मन्त्राक्षराणि तु ॥ ९३ ॥
प्रादक्षिण्यप्रवेशे(न) तु विलिखेत्तु निरन्तरम् ।
मधेऽवशिष्टनवके नववर्गसमन्विते ॥ ९४ ॥
नाथान्नव लिखेत् पस्चात्साध्याख्याकर्मसंयुतम् ।
सर्वत्र विलिखेदद्भूयो भूयोस्त्वावर्तनेन तु ॥ ९५ ॥
अर्द्धरात्रे तु तां साध्यां स्मरन्मदनवह्निना ।
दह्यमानां हृतस्वांतां मस्तकस्थापिताञ्जलिम् ॥ ९६ ॥

विकीर्णकेशीमालोललोचनमरुणारुणाम् ।

वायुप्रेङ्कत्पताकाख्यपटोपामकलेवराम् ॥ ९७ ॥

विवेकविधुरां मत्तां मानलज्जाभयातिगाम् ।

चिन्तयेन्नार्चयेच्चक्रमध्ये देवीं दिगम्बराम् ॥ ९८ ॥

जपादाडिमबन्धूककिंशुकाद्यैः समर्चयेत् ।

अन्यैः सुगन्धिशे(षत्)

फालि कुसुमाद्यैः सुगन्दिभिः ॥ ९९ ॥

त्रिसप्तरात्रादायाति प्रोक्तरूपा मदाकुला ।

यावच्छरीरपातन्तु छायेवाऽनपगाऽस्य सा ॥ १०० ॥

रूपतत्त्वमयी व्याप्तिरिति सम्यक् समीरिता ।

अस्या निष्फालनाच्चित्ते तत्तत्त्वं स्वात्मसात्कृतम् ॥ १०१ ॥

इति श्रीषोडशनित्यातन्त्रेषु श्रीकादिमतेऽष्टमं पटलम् ॥ ८ ॥

## अथ नवमं पटलम्

अथ षोडशनित्यासु चतुर्थिं शृणु पार्वति ।

नित्यक्लिन्नाविधानानां तन्मन्त्रं प्रागुदीरितम् ॥ १ ॥

तदङ्गानि च तद्ध्यानं तच्छक्तीस्ताभिरर्चनाम् ।

होमतर्पणभेदांश्च यन्त्राणि फलभेदतः ॥ २ ॥

निर्दिष्टं क्रमतो वक्ष्ये समस्तं परमेश्वरि ।

आद्येन मन्त्रवर्णेन हृदयं समुदीरितम्॥ ३॥

ततो द्वाभ्यां पौरद्वभ्यां द्वाभ्यां द्वाभ्यां द्वयेन च।

कुर्याच्छेषाणि चाङ्गानि कर्योश्च न्यसेत् क्रमात्॥ ४॥

तन्त्रे षडङ्गमन्त्रोक्तं तत्र तत्र करद्वये।

न्यसेदङ्गुष्ठमूलादि कनिष्ठाग्रान्तमूर्ध्वगम्॥ ५॥

शेषं तलद्वये न्यस्त्वा हृद्वत्स्तोत्रेण सार्द्धयोः।

वचि ध्वजे च पायौ च पादयोर्वर्णकं न्यसेत्॥ ६॥

अरुणामारुणाकल्पामरुणांशुकधारिणीम्।

अरुणासृग्विलेपां तां चारुस्मेरमुखाम्बुजाम्॥ ७॥

नेत्रत्रयोल्लसद्वक्त्रां भाले धर्माम्बुमौक्तिकैः।

विराजमानां मन्दारलसदर्द्धेन्दुशेखराम्॥ ८॥

चतुर्भिर्बाहुभिः पाशमङ्कुशं पानपात्रकम्।

अभयं विभ्रतीं पद्ममध्यासीनां मदालसाम्॥ ९॥

ध्यात्वैवं पूजयेन्नित्य क्लिन्नानित्यां स्वशक्तिभिः।

क्षोभिणिमोहिनीलोलात्रिकोणाश्रिषु शक्तयः॥ १०॥

नित्या निरञ्जना क्लिन्ना क्लेदिनी सदनातुरा।

मदद्रवा द्राविणी च विधानाचाष्तपत्रगा॥ ११॥

मदाविला मङ्गला च सन्मथार्ता मनस्विनी।

मोहाऽऽमोदा मानमयी मायामन्दामनोवतीः॥ १२॥

चतुरस्रगताः पूज्या मदारुणचलीक्षणाः।

मध्यनित्या समाकारवर्णबाहायुधान्विताः॥ १३॥

चतुरस्रद्वयं कृत्वा प्राक्प्रत्यग्द्वारसंयुतम्।

तन्मधेऽष्टदलं पद्मं तन्मध्ये त्र्यस्रकं तथा॥ १४॥

अर्घ्यं षडङ्गमूलाभ्यां कृत्वा तां प्राङ्मुखोऽर्चयेत्।

चतुरस्रे पश्चिमादिनिर्ऋत्यन्तं यजेच्च ताम्॥ १५॥

द्वारपार्श्वेषु कोणेषु दिक्षु ता दश पूजयेत्।

तदन्तराऽष्टपत्रेषु पश्चिमादिप्रदक्षिणम्॥ १६॥

अर्चयेदष्टशक्तीस्तास्तदन्तर्योनिकोणगाः।

अग्रात् प्रदक्षिणं तिस्रः शक्तीश्चोक्तविधानतः॥ १७॥

कर्णिकायोनिमध्यस्थदेशे वाय्वीशवह्निषु।

निर्ऋत्यां पुरतोदिक्षु यजेदङ्गानि षट् क्रमात्॥ १८॥

ततो देवीं तु तां नित्यक्लिन्नानित्यामुदीरयेत्।

उपचारैरर्चयेच्च बलिं दद्याच्च पूर्ववत्॥ १९॥

तदग्रतो जपेद्विद्यां सहस्रं यदि वा शतम्।

ततोऽभ्यर्च्य शिवां होमं कुर्यादुक्रमेण तु॥ २०॥

आज्यसिक्तांधसाऽऽज्येन पुष्पैर्वा सौरभान्वितैः।

जुहुयात्प्राग्वदुदितसङ्ख्यं प्राग्वत्समाप्य तत्॥ २१॥

अभर्च्य देवीमथ तां स्वात्मन्युद्वास्य पूर्ववत्।

न्यासं कृत्वा स्तोत्रयुगं जपित्वा तन्मयश्चरेत्॥ २२ ॥

विद्यायाः साधनं सम्यक् समीहितफलप्रदम्।

शृणु देवि प्रवक्ष्यामि प्रयोगार्हो यतो भवेत्॥ २३ ॥

जितेन्द्रियो हविष्याशी त्रिसन्ध्याचाररतो जपेत्।

प्राग्वल्लक्षं तद्दशांशं कुर्याद्धोमं च तर्पणम्॥ २४ ॥

मधूकपुष्पैर्मध्वक्तैर्बकुलोत्थैरथापि वा।

चन्द्रचन्द्रनकस्तूरीवासितैस्तर्पयेज्जलैः॥ २५ ॥

ततोनित्या प्रयोगार्होनित्यार्चानिरस्तथा।

सहस्रजापी तद्भक्तः कुर्यादुक्तं न चाऽन्यथा॥ २६ ॥

पद्मैरक्तैस्त्रिमध्वक्तैर्होमाल्लक्ष्मीमवाप्नुयात्।

तथैव कैरवैरक्तैरङ्गनास्तु वशं नयेत्॥ २७ ॥

समानरूपवत्सायाः शुक्लायाश्च पयःस्नुतैः।

मल्लिकामालतीजातीशतपत्रिहुतैर्भवेत्॥ २८ ॥

कीर्तिविद्याधनारोग्यासौभाग्यविजयादिकम्।

आरग्वधप्रसूनैस्तु क्षोद्राक्तैर्हवनाद्भवेत्॥ २९ ॥

स्वर्णाप्तिः स्तम्भनं शत्रोः नृपादीनां क्रुधोऽपि वा।

आज्याक्तैः करवीरोत्थैः प्रसूनैररुणैर्हुतैः॥ ३० ॥

रक्ताम्बराणि वनिताभूपमर्त्यवशं तथा।

भूषावाहनवाणिज्यसिद्धयश्चास्य वाञ्छिताः॥ ३१ ॥

लवणैः सर्षपैर्गौरैररिततैर्वा(स्य)

ऽथ होमतः।

तत्तैलाक्तैर्निशामध्ये त्वानयेद्वाञ्छितां वधूम्॥ ३२॥

तैलाक्तैर्जुहुयात्कृष्णा दरपुष्पैर्निशान्तरा।

मासादरातेः तीव्रार्तिज्वरेण भवति ध्रुवम्॥ ३३॥

आरुष्करधृताभ्यक्तैस्तद्बीजैर्निशि होमतः।

शत्रोर्देहे ब्रणानि स्युदुःसाध्यानि चिकित्सकैः॥ ३४॥

तैरेव ज्वलिताङ्गस्तु रिपुर्याति यमालयम्।

तथा तत्तैलसंसिक्तैर्बीजैरङ्गारकैरपि॥ ३५॥

मरीचैः सर्षपाद्याक्तैर्निशि होमात्तु मासतः।

वाञ्छितां वनितां कामज्वरार्तामानयेद् ध्रुवम्॥ ३६॥

मरीचैः सर्षपोपेतैः सप्तवाराहुतैर्निशि।

धैर्यमानकुलैर्नित्यं दुष्प्रापामानयेद्वधूम्॥ ३७॥

अन्नाज्यैर्जुहुयान्नित्यं शतमष्टोत्तरं तु वा

तेनान्नपूर्णभुवनोभोक्ता च भवति प्रिये॥ ३८॥

शालीभिराज्ययुक्ताभिर्होमात्छाकीमवाप्नुयात्।

मुद्गैः मुद्गं धृतैराज्यमिष्टैरिष्टं हुतैर्भवेत्॥ ३९॥

साध्यर्क्षवृक्षसंभूतां पिष्टपादरजःकृताम्।

राजीमरीचलणोत्थां पुत्तलीं जुहुयान्निशि॥ ४०॥

प्रप्रदाभ्यां च जङ्घाभ्यां जानुभ्यामूरुयुग्मतः।

नाभेरधस्ताद्धृदयाद्भिन्नेनाकण्ठतस्तथा॥ ४१॥

शिरसा च सुतीक्ष्णेन छित्वा शत्रेण वै क्रमात्।

एवं द्वादशधा होमान्नरनारिनराधिपाः॥ ४२॥

वश्या भवन्ति सप्ताहाज्ज्वरार्ता चास्य वाञ्छया।

प्रयान्ति निधनं चास्य्स वाञ्छयाऽनन्ययोगतः॥ ४३॥

पिष्टेन गुडयुक्तेन मरीचैर्जीरकैर्युताम्।

कृत्वा पुत्तलिकां साध्यनामयुक्तामथो॥ ४४॥

सनामहोमसंपातघृते संपाच्य ते पुनः।

रपृशन्निजकराग्रेण सहस्त्रं प्रजपेन्मनुम्॥ ४५॥

अभ्यर्च्य तत् घृताभ्यक्तं भक्षयेत्तद्धिया जपन्।

नरनारीनृपास्तस्य वश्याः श्यूर्मरणावधि॥ ४६॥

तैरेव पिष्टेर्वृत्तं तु कृत्वा तन्मध्यतस्तथा।

साध्य्नाम स्फुटं कृत्वा प्राग्वत् संपाच्य भक्षणात्॥ ४७॥

वश्यास्ते वत्सरं भूयुः तन्नामार्णन्वितैस्तथा।

कृत्वाऽभिपाच्य भक्ष्यात्तु वशयेत्तास्तदर्द्धकम्॥ ४८॥

नालिकेरफलाम्भोभिस्तर्पणाद्वनिता वशाः।

कर्पूरवासितैस्तोयैर्मनुष्याः स्युर्वशे स्थिताः॥ ४९॥

तर्पणाल्लवणाम्भोभिः सर्वे स्युस्तस्य किङ्कराः।

तथा लवणयुक्तेन तोयेन वनिता वशाः ॥ ५० ॥

शुद्धेन वारिणा मासं तदर्द्धं सप्तरात्रकम् ।

तर्पयेद्यस्य नाम्नैव स तस्य स्याद्वशोऽनिशम् ॥ ५१ ॥

केतकीवासितश्चेन्दुयुक्तैः केरफलोदकैः ।

तत्प्रणाद्वनिता वश्या दद्युः प्राणान्नितं धनम् ॥ ५२ ॥

नमेरुवासितैस्तोयैस्तर्पणात् भूमिपा वशाः ।

चम्पकैर्वासितजलैः तर्पणं सर्वरञ्जनम् ॥ ५३ ॥

पाटलीशतपत्राभ्यां वासितैस्तर्पणैर्जलैः ।

सर्वलोकचमत्कारकारी भवति नित्यशः ॥ ५४ ॥

कस्तूरीवासिताम्भोभिस्तर्पणं सर्वसिद्धिकृत् ।

इन्दुचन्दनसौरभ्यवासिताम्भःप्रतर्पणम् ॥ ५५ ॥

वाञ्छितार्थस्य संसिद्धिं मण्डलात् कुरुते ध्रुवम् ।

सकुमिश्रजलैराढ्यो धनधान्यादिभिश्चिरम् ॥ ५६ ॥

गुडमिश्रजलैर्ह् रात्रौ तर्पणं विघ्ननाश(क)

नम् ।

चिञ्चाफलरसोपेतैर्जलैर्द्वेषाय तर्पयेत् ॥ ५७ ॥

उष्णोदकैः समरिचैस्तर्पयेद्वैरिमृत्यवे ।

केवलोष्णोदकैस्तस्य तीव्रज्वरसमुद्भवः ॥ ५८ ॥

निम्बपत्ररसोपेतैरम्बुभिस्तर्पणाद् द्विषाम् ।

जायतेऽन्योन्यवैरस्यं तेन ते नाशमाप्नुयुः ॥ ५९ ॥

तथैव सर्षपतिलैस्तर्पणाद्वैरिणिभृशम् ।

अतिसारादिभिर्दोषैरौद्रैः क्लेशमावहेत् ॥ ६० ॥

अथ यन्त्राणि देवेशि शृणु वाञ्छाप्रदानि वै ।

यैः कृतैः सिद्धयो हस्ते भवन्ति भजनादपि ॥ ६१ ॥

षट्कोणं वृत्तयोर्मध्ये कृत्वा मध्ये सनामकम् ।

विद्याद्यावर्णं विलिखेद्द्वितीयादीनि षट् क्रमात् ॥ ६२ ॥

षट्सु कोणेषु विलिखेच्छष्टवर्णचतुष्टयम् ।

वृत्तयोरन्तरा दिक्षु विलिखेत्कोणान्तरालतः ॥ ६३ ॥

भूताक्षारणि क्रमशो दश द्वित्रिक्रमेण तु ।

एवमेकादशविधं मध्येऽन्येषां निवेशनात् ॥ ६४ ॥

भूताक्षराणां प्रत्येकं योगात्पञ्चाशताऽन्वितम् ।

पञ्चकं परमेशानि शृणु तानि यथाक्रम् ॥६५ ॥

एषु सर्वत्र तद्बाह्ये वृत्तं कृत्वा च मातृकाम्

विलिकेदभितः पस्चाद्विनियोगमथोच्यते ॥ ६६ ॥

वश्ये त्रयमथाकर्षे द्वयं शान्त्यां द्वयं तथा ।

मध्ये नामाक्षरन्यासभेदात्तद्भेदकल्फनम् ॥ ६७ ॥

एवं तत्फलभेदस्तु सप्तविंशतिधा भवेत् ।

शेषाणि शृणु देवेशि क्रमेण विनियोगतः ॥ ६८ ॥

स्तम्भनं मोहनं पस्चाद्विद्वेषोच्चाटनं तथा ।

मारणं व्याविभिः क्लेशं कुलोत्सादकरं तथा ॥ ६९ ॥

गजाश्वोष्ट्रखराणां च रक्षा महिषमेषयोः ।

गवां नराणां नारीणां विजयः समरद्विषाम् ॥ ७० ॥

द्वन्द्वयुद्धे तथा वादे व्यवहारेषु सर्वतः ।

द्यूते च रक्षानगरग्राममङ्गलके तथा ॥ ७१ ॥

विद्यायां पुनरुक्तानि हित्वा वर्णानि तान्यपि ।

एकादश स्युस्तैः प्राग्वत् स्वरयोगान्महेश्वरि ॥ ७२ ॥

षट्सप्तत्या शतं प्रोक्तं वर्णानां मन्त्रगामिनाम् ।

प्रोक्तयन्त्रेषु विलिखेदेजादशविभागतः ॥ ७३ ॥

मातृकाविद्ययाऽऽवेष्ट्य कुर्यात्तन्नामयोजनम् ।

षोडशानां च यन्त्राणां विनियोगमथोच्यते ॥ ७४ ॥

प्रथमेन तु यन्त्रेण कन्यकाः स्ववशं नयेत् ।

तेनैव तासाआर्त्तिं च शमयेत्सेकधारणैः ॥ ७५ ॥

स्वस्थावेशं च तेनैव कुर्यान्मन्त्रजपं तथा ।

तन्मयीं(तत्स्थां च )

भावयेत्कन्यां धूपैः सर्ज्जरसैर्दहेत् ॥ ७६ ॥

आविष्टे तां समभ्यर्च्य प्रोक्तैस्तैरुपचारकैः ।

पृच्छेत्स्ववाञ्छितानर्थानाचष्टे साऽऽत्मनः सदा ॥ ७७ ॥

ततोऽभ्यर्च्यात्मना योज्यं तां तदात्मा भवेत्।स्वयम्।

तासामवस्थामन्यैश्च शमयेदस्य धारणात्॥ ७८॥

द्वितीयेन तु यन्त्रेण कर्पटे गौरिकद्रवैः।

लिखेत्तेन जयेद्वादे प्रतिवादिनमन्तरा॥ ७९॥

स्थापनात्तस्य नियतमतिप्रौढोऽपि तत्क्षणात्।

स्तब्धजिह्वो निरुद्योगः शुष्कास्यो लीललोचनः॥ ८०॥

विलोकयन् दशादिशस्त्यक्तलज्जः पलायते।

पतेद्वा पादयोः क्षिप्रं जितोऽस्मीति त्वया वदन्॥ ८१॥

तृतीयेन निशापिष्टतोयेन लिखितेन तु।

कर्पटे खर्परे वापि स्थापितेनोष्णभूतले॥ ८२॥

चुल्ल्यधो वा दिनैर्द्वत्रैः स्तम्भयेत्सुदृढं (?)

रिपोः।

रोषं गतिं मतिं जिह्वां समरं सर्वमेव च॥ ८३॥

आयान्तमग्रतोरात्रौ मार्गमध्ये खनन्निदम्।

बलिं दद्यात्तु तद्योन्या तन्नक्षत्रोक्तया पुनः॥ ८४॥

तेन तत्पृतना भ्रष्टा रुग्णा गतस्मुद्यमा।

भीता न तन्मुखा जातु घटते यन्त्रवैभवात्॥ ८५॥

चतुर्थेनारिनक्षत्रवृक्षोत्थफलकातले।

लिखितेन पुरोक्तेन स्थापितेन पुरं रिपोः॥ ८६॥

नाशमेति रिपुः कृच्छ्रैर्वैरिरोगादिसम्भवैः ।
तेषु तेषु प्रयोगेषु कुर्याद्रक्षामथात्मनः ॥ ८७ ॥
पञ्चमेनाथ षष्टेन सप्तमेनाष्टमेन च ।
नवमेन च कुर्वीत रक्षां राष्ट्रपुरालये ॥ ८८ ॥
प्रागादिषु चतुर्दिक्षु बाह्यादिष्वष्टदिक्ष्वपि ।
मध्ये च स्थापेत्यन्त्रं ताम्रपट्टेषु कल्पितम् ॥ ८९ ॥
क्रमेण पञ्चमं मध्ये स्थापेयेत्तत्प्रयोगतः ।
स्वराष्ट्रे नगरे राजगृहे प्रोक्तक्रमात् खनेत् ॥ ९० ॥
तेन वैरिकृताः कृत्याप्रयोगाः क्रूरविग्रहाः ।
प्रवेष्टुमत्राशक्तास्ते नाशयन्ति प्रयोजकम् ॥ ९१ ॥
दशमे राजते पट्टेविलिख्य कवचं दधात् ।
रणं वीरः प्रविश्याशु नाशयेद् द्रावयेच्च तत् ॥ ९२ ॥
एकादशं निशातोये घृष्टगैरिकलेखनात् ।
लर्पटे स्थापितं शीघ्रं शमयेद्धभृतां रणम् ॥ ९३ ॥
द्वादशेनेन्दुकाश्मीरलिखितेन धृतेन तु ।
भूर्जपत्रपुटे सम्यक् सर्वरक्षा भवेन्नृणाम् ॥ ९४ ॥
त्रयोदशेन यन्त्रेण तालपत्रकृतेन तु ।
ताललिप्तेन कुड्यान्तः स्थापितेनार्चितेन च ॥ ९५ ॥
गृहरक्षा भवेद्याधिचोरग्रहभुजङ्गमात् ।

राजतो वैतों बाधादन्यक्षुद्रादितस्तथा ॥ ९६ ॥

चतुर्दशेन यन्त्रेण भूर्जपत्रे स्थितेन वै ।

भृतेन कामिनीनां तु सौभाग्यमतुलं भवेत् ॥ ९७ ॥

तथा पञ्चदशेनापि स्वर्णपट्टधृतेन तु ।

वन्ध्यापि लभते पुत्रं गुणाढ्यं दीर्घजीविनम् ॥ ९८ ॥

षोडशेनोक्तरूपेण साभिषेकं धृतेन वै ।

सपत्नीष्वपि कान्तेन भरुः साऽत्यन्तवल्लभा ॥ ९९ ॥

भूर्जस्थेन धृतेनावं सवेषामपि सर्वदा ।

रक्षा भवति मर्यानां राजचौरग्रहादितः ॥ १०० ॥

स्पर्शतत्त्वमयी व्याप्तिरिति सम्यक्समीरिता ।

अस्या निष्फालनात्त्चित्ते तत्तत्त्वं स्वात्मसात्कृतम् ॥ १०१ ॥

इति श्रिषोडशनित्यातन्त्रेषु श्रिकादिमते नवमं पटलम्

अथ दशमपटलम्

अथ षोडशनित्यासु भेरुण्डा पञ्चमी तु या ।

तद्विधानं शृणु प्राज्ञे कथयामि यथाविधि ॥ १ ॥

मन्त्रोद्धारः तृतीयेऽभूदङ्गान्यावृतिदेवताः ।

पूजाक्रमं च यन्त्राणि तथैव रिपुनिग्रहम् ॥ २ ॥

किलप्रयोगान्विजयं समरेषु महीभृताम् ।

रक्षां पुरगजाश्वानां राज(ज्य)रक्षां च वै क्रमात्॥ ३॥

आद्यन्तद्वयमध्यस्थैः षड्भिः कुर्यात् षडङ्गकम्।

रन्ध्राज्ञामुखकण्ठेषु हृन्नाभ्याचारपद्द्वये॥ ४॥

न्यसेन्मन्त्रार्णवकं मातृकान्यासपूर्वकम्।

ततः शक्तीराद्दतिस्था (?)

ध्यानं च शृणु पार्वति॥ ५॥

बाह्यावृत्तौ तु ब्राह्माद्या युगशक्तीस्तु पूजयेत्।

तदन्तरष्टपत्रेषु विजयां विमलां सुभाम्॥ ६॥

विश्वां विभूतिं विनतां विविधां विरतां क्रमात्।

तदन्तरष्टकोणेषु कमलां कामिनीं तथा॥ ७॥

किरातां तीर्तिसहितां कुट्टनीं कुलसुन्दरीम्।

कल्याणीं कालकोलां च पूजयेदुक्तयोगतः॥ ८॥

डाकिनीं राकिनीं तद्वल्लाकिणीं काकिनीं तथा।

साकिनीं लाकिनीं षट्सु कोणेषु परितोऽर्चयेत्॥ ९॥

इच्छाज्ञानक्रियाशक्तीरर्चयेदन्तरावृत्तौ।

अष्टकोणान्तरालेषु पूजयेदायुधाष्टकम्॥ १०॥

चतुरस्रद्वयं कृत्वा दिक्षु द्वारसमन्वितम्।

तदन्तरष्टपत्राब्जं वृत्तयुग्ममथान्तरा॥ ११॥

अष्टास्रं भूपुरद्वन्द्वात्तच्च वृत्तसमन्वितम्।

तदन्तस्तादृशं कुर्यात् षट्कोणं वा तु विग्रहम् ॥ १२ ॥

तदन्तस्तादृशीं कुर्याद्योनिं तन्मधतोयजेत् ।

भेरुण्डां पञ्चमिं नित्यामुक्तशक्तिभिरावृताम् ॥ १३ ॥

अर्घ्यं षादञ्गमूलाभ्यां संसाध्य प्राङ्मुखो यजेत् ।

बलिं च षोडशार्णेन दद्यादाद्यन्तयोः क्रमात् ॥ १४ ॥

अथ ध्यानं प्रवक्ष्यामि देव्याः सर्वार्थसिद्धिदम् ।

तदावृत्तिस्थशक्तीनां क्रमेण शृणु पार्वति ॥ १५ ॥

तप्तकाञ्चनसङ्काशदेहां नेत्रत्रयान्विताम् ।

चारुस्मिताञ्चितमुखीं दिव्यालङ्कारभूषिताम् ॥ १६ ॥

ताटङ्कहारकेयूररत्नवस्त्रकमण्डिताम् ।

रसनानूपुरोर्म्यादिभूषणैरतिसुन्दरीम् ॥ १७ ॥

पाशाङ्कुशौ चर्मखड्गौ गदावज्रधनूशरान् ।

करैर्दधानामासीनां पूजायामन्यदा स्थिताम् ॥ १८ ॥

शक्तिश्च तत्समाकारतेजोहेतिभिरन्विताः ।

पूजयेत्तद्वदभितः स्मितसौम्यमुखः सदा ॥ १९ ॥

एवं देवीमावृतिभिरावृतामर्चयेत्तथा ।

बलिमाद्यन्तयोर्दद्यात् पूर्वोक्तविधिना युतम् ॥ २० ॥

स्नातीमौनी पयोभक्षः प्रजपेन्नवलक्षकम्

तद्दशांशं हुनेदग्नौ त्रिमध्वक्तैः जुशेशयैः ॥ २१ ॥

तावच्च तर्पयेत्तोयैरिन्दुचन्दनवासितैः ।

अर्चयेन्नित्यशो देवीं सहस्त्रं प्रजपेदपि ॥ २२ ॥

ततः स्वगुरुणोद्दिष्टप्रयोगान्विधिना चरेत् ।

अन्यथा निष्फलं भूयात् प्रतुतैनं निहन्ति च ॥ २३ ॥

द्वितीयाद्यैस्त्रिभिर्बीजैः षष्ठेन च समीरितम् ।

निग्रहार्थमथान्यैस्तु त्रिभिरन्त्यद्वयेन च ॥ २४ ॥

षट्कोणं वृत्तयुग्मं च कृत्वा तन्मध्यतोलिखेत् ।

द्वितीयार्णं साध्ययुतं कोणेष्वन्यत्रयं लिखेत् ॥ २५ ॥

अधरेषु समायानि तानि लेख्यानि सर्वदा ।

वृत्तयोरन्तरा साध्यसमेतैः पवनार्णकैह् ॥ २६ ॥

संवेष्ट्य तानि संजप्य रिपोरष्टमरःशिगे ।

श्मशाने स्थापयेत्तत्र लग्ने विद्वेषणं भवेत् ॥ २७ ॥

निम्बपत्ररसे पिष्टा श्मशानाङ्गारलेखनात् ।

पृषदाखुत्वचि च वतत्सहस्रद्वयजायत ॥ २८ ॥

द्वीपिवक्रत्वचि लिखेत्तद्यन्त्रं गोमुखत्वचि ।

समालिख्य स्वसंज्ञां तु पूर्वस्मिन्नुत्तरे रिपोः ॥ २९ ॥

उत्तराधरमाधाय शिलाधः सन्ध्ययोर्जपेत् ।

जपित्वा प्रोक्तसङ्ख्य च जयेत्तं प्रतिवादिनिनम् ॥ ३० ॥

एतन्मुखावलोकेन प्रतिपादी हतोद्यमः ।

निरुत्तरः पलायेत जितेन्ऽस्मीति वदेत्तु वा ॥ ३१ ॥

हरितालेन घृष्टेन निशारसयेतेन तु ।

विलिखेद्वा(द्)रविजये(द्यु)युक्तमुक्तमेण वै ॥ ३२ ॥

रुरुचर्मणि(रक्तेन)

तद्रक्त लिखितं तद्रिपोर्गृहे ।

प्रोक्तकाले खनेदुक्तक्रमपूजाजपान्वितः ॥ ३३ ॥

उच्चाटयेद्रिपुं मासान्नियतं यन्त्रवैभवात् ।

नृचर्मणि च तद्रक्तलिखितं तच्छ्मशानके ॥ ३४ ॥

पूजाजपक्रमोपेतं निखनेदुक्तकालतः ।

मासेन याति वैरी तु दाहज्वरयुतो यमम् ॥ ३५ ॥

तृतीयं मध्यतः कृत्वा त्वितरान् परितो लिखेत् ।

साध्यर्क्षयोनेस्त्वचितन्मधूच्छीष्टेन पीडितम् ॥ ३६ ॥

श्मशानभस्मलिखितं निक्षिप्तं नष्टकूपके ।

प्रोक्तकालसमोपेतं नाशयेत्सलिले रिपुम् ॥ ३७ ॥

तदेव वह्निमूलेन पिष्टेन मनुजासृजा ।

लिखितं गोत्वचि क्शिप्तं चुल्ल्यामुपरि वह्निना ॥ ३८ ॥

ज्वलितेनानिशं मासादग्निनाऽग्नै पतेद्रिपुः ।

तृतीयेन तु मध्येन वेष्टितैरितरैरपि ॥ ३९ ॥

उलूककाकपक्षाभ्यं प्रथोक्तेन संलिखेत् ।

गर्दभत्वचि तत् खात्वा कुण्डमध्ये तदूर्ध्वतः ॥ ४० ॥

साध्यवृक्षेन्धने वह्नौ बीजैरुन्मत्तसम्भवैः ।

कटुतैलप्लुतैर्होमान्मत्तोऽरिर्म्रियते ध्रुवम् ॥ ४१ ॥

साध्यर्क्षवृक्षकीलं तु प्रोक्तयन्त्रसमन्वितम् ।

खरस्नायुभिराबद्धं खातं वैरिपुरे निशि ॥ ४२ ॥

राशौ तदष्टमे मासात्ततपुरं पितृकाननम् ।

काकोलूकबकश्येनङ्कतित्तिरिपादयोः ॥ ४३ ॥

विलिख्य यन्त्राण्युक्तानि प्रेतचीरे निबध्य तत् ।

खनेन्मङ्गलवारे तु प्रोक्तकाले चतुष्पथे ॥ ४४ ॥

त्रिसप्ताहाद्व्रजेद्वैरी स्यादुन्मत्तो दिशे दश ।

तान्येव तत्तच्चर्स्थं तदालयभुवि स्थितम् ॥ ४५ ॥

नाशयेद्गजमर्त्याश्वगोखरोष्ट्राजसैरिभान् ।

सप्ताहात्तद्व(द्ध)

यान्मासा नियतं यन्त्रवैभवात् ॥ ४६ ॥

तच्छान्तिं शृणु देवेशि यन्त्रध्यानाभिषेकतः ।

तन्मन्त्रवर्णैर्यन्त्रशैश्चिन्तामन्त्रार्थवैभवात् ॥ ४७ ॥

पद्ममष्टदलं कृत्वा मधे त्वाद्यं स्नामकम् ।

लिखित्वाऽष्टसु पत्रेषु चतुष्कं तद्विरालिखेत् ॥ ४८ ॥

बहिर्वृत्तान्तरा कुर्यान्मातृकाक्षरवेष्टनम् ।

प्रागुक्तैरेव तैर्द्रव्यैः संपूज्य विनियोगतः ॥ ४९ ॥

तत्तत्क्लेशविनाशः स्यात् तथा मन्त्रानुभावतः ।

विजयं समरे राज्ञां शृणु वैरविनाशतः ॥ ५० ॥

मन्त्राक्षराणि प्रत्येकं योजयेत्षोडशस्वरैः ।

तेन मन्त्राक्षराणि स्युः सङ्ख्या च शतं पुनः ॥ ५१ ॥

चत्वारिंशच्च चत्वारि तैर्यन्त्ररचनं  शृणु ।

येन सर्वत्र समरे विजयोभवति ध्रुवम् ॥ ५२ ॥

प्राक्प्रत्यग्दक्षिणोदक्च कुर्याद्रेखास्त्रयोदश ।

तेन तावन्ति कोष्ठानि सम्भवन्ति समन्ततः ॥ ५३ ॥

कृत्वाऽआश्टास्त्रं ततो बाह्ये वृत्तयुग्मं ततोलिखेत् ।

अक्षराणि शिवाद्यन्तु निरृत्यन्तमनुक्रमात् ॥ ५४ ॥

तत्र मन्त्रार्णकोष्ठेषु नवस्वाख्यां समालिखेत् ॥ ५५ ॥

अन्तरालेषु विलिखेदाद्यं वृत्तद्वयान्तरा(न्)

।

तान्येव मातृकाख्याभिर्विदद्भिर्तमथो न्यसेत् ॥ ५६ ॥

एतत् पटे समालिख्य ध्वजीत्य रणोद्यमे ।

दर्शयेत्तेन रिपवः पलायन्ते दिशो दश ॥ ५७ ॥

प्रणमेयुर्निजां लक्ष्मीं प्राभृतीकृत्य तत्क्षणात् ।

तदेव वैरिशिबिरे निखनेदुदये शनेः ॥ ५८ ॥

सद्यस्त्वनोन्यकलहान्नाशमेति सुनिश्चितम् ।
तदेव स्वपुरे मध्ये स्थापयेद्विषणोदये ॥५९॥
प्राभिचारकृत्यादिदुरितानि न तत्र वै ।
संस्पृशन्ति पुरान्तस्थाद्यन्त्रशक्त्यनुभावतः ॥ ६० ॥
तद्यन्त्रं ताम्रपट्टे तु विलिख्याभ्यर्च्य तत् पुनः ।
स्थापयेत् साध्यभूभर्तुरेकादशसमुद्यमे ॥ ६१ ॥
गजवाजिगृहेष्वस्य(स्वस्थ)भाण्डागारेऽस्त्र(स्व)मण्डपे ।
अन्तःपुरे गनर्यास्तु दिक्षु मध्ये च तत् खनेत् ॥ ६२ ॥
यत्र संस्थापितं यन्त्रं तत्रार्चा नित्यशोनृपः ।
कारयेत्तेन तत् सर्वं शश्वतं वृद्धये भवेत् ॥ ६३ ॥
बीजानि तानि प्रत्येकमष्टपत्रसरोरुहे ।
मध्ये दलेषु परितो लिखेदेकैकशः क्रमात् ॥ ६४ ॥
बहिर्मातृकयाऽऽवेष्ट्य सञ्जप्याभ्यर्च्य नित्यशः ।
स्वजन्मर्क्षादिनवके कुर्याच्छान्तिमनुक्रमात् ॥ ६५ ॥
यन्नक्षत्रे भवेदस्य ग्रहतो राजतोऽथ(पि) वा ।
रोगतो वैरितो वाऽपि तस्मिन् तत्तेन शामयेत् ॥ ६६ ॥
मन्त्रार्नोप्यथ भस्मस्थं यन्त्रं कृत्वा तु तेन तु ।
रक्षां कुर्वीति सर्वेषांअर्वापत्तारणाय वै ॥ ६७ ॥
तत्तद्यन्त्रं तद्दिनेषु स्नानपानासनादिना ।

ग्रहजं वैरिजं दुःखं शाम्यत्वेव न संशयः ॥ ६८ ॥

क्रमेण नवयन्त्राणि नवग्रहमयानि तु ।

तस्मातत्तद्ग्रहक्लेशं तत्तद्यन्त्रं (न) (च) शामयेत् ॥ ६९ ॥

सङ्काशते (सेकासन) बिभूत्यादिप्रयोगगैरुदितैः क्रमात् ।

विविधानि विषाण्येभिर्यन्त्रैर्जलनिवे(शितैः)

शनैः ॥ ७० ॥

नाशतेत्पान(से)काभ्यां धारणेनार्च्ननेन च ।

एभिस्तु नवभिर्यन्तैर्य(त्तत्)न्न साध्यं न कुत्रचित् ॥ ७१ ॥

देशे वा नगरे ग्रामे मङ्गले पर्वतादिके ।

प्रथमं मध्यतः खात्वा प्रागादिषु ततोऽष्टसु ॥ ७२ ॥

द्वितीयादीनि तु खनेत् तत्र लक्ष्मीरिति स्थिरा ।

धर्मार्थौ चातिसंवृद्धौ भवेतामुक्तयोगतः ॥ ७३ ॥

द्वितीयं मध्यतः खात्वा त्वितराण्यभितः खनेत् ।

धार्मकास्तेन तत्रस्थाः प्रसीदन्ति च देवताः ॥ ७४ ॥

सप्तस्वन्येषु च तथा कान्त्यारोग्ययशोधनैः ।

पुत्रज्ञानधैश्वाढ्याः प्रभवन्ति च नित्यशः ॥ ७५ ॥

दृष्टेषु घोरैः प्रणभिः नवभिर्नवरन्द्रगैः ।

ध्यानैर्मृतोऽपि माहात्म्यान्मन्त्रस्योत्तिष्ठते ध्रुवम् ॥ ७६ ॥

अश्विन्यादिषु ऋक्षेषु नवानि नवसु क्रमात् ।

विलिख्य देवीं तत्रस्थां नवाकारां नवस्वपि ॥ ७७ ॥

पूजयेदुपचारैस्ता नित्यशोभक्तिसंयुतः ।

प्रागुक्तपरिवारादिरहितां पूजयन्नपि ॥ ७८ ॥

सिद्धिमेति नरो भक्त्या परया चेत्समन्वितः ।

स्त्रीबालवृद्धाशक्तानां गतिरेषा च (स्व)

सिद्धये ॥ ७९ ॥

भेरुण्डा वर्णयोर्जप्याद्विषार्तस्य तैव सः ।

निर्विषो जायतेऽचिन्त्या मन्त्राणां शक्तयः शिवे ॥ ८० ॥

त्रैलोक्यमोहनी विद्या सर्वतो भवास्तुता ।

न कदाचित्तु सा प्रोक्ता तां मे ब्रूहि महेश्वर ॥ ८१ ॥

सर्वेषाएव मन्त्राणां विद्यानां च यशस्विनि ।

व्याप्तरूपं प्रवक्ष्यामि शृणु त्वमिदमद्भूतम् ॥ ८२ ॥

येन नारीनरनृपदेवताः सर्वजन्तवः ।

भजन्त्येनं यथा मां त्वं तत्प्रयोगबलाद्ध्रुवम् ॥ ८३ ॥

अकारादिक्षकारान्तैर्मातृकार्णैः सविन्दुभिः ।

प्रत्येकं पुटितान् कृत्वा मन्त्रान्विद्या अथापि च(वा) ॥ ८४ ॥

प्रोक्तं तद्यन्त्रनवकं कुम्भे संस्थाप्य चैतया ॥ ८५ ॥

जपतर्पणहोमार्चासिद्धया सेक ईरितः ।

कुचन्दनैर्गौरिकैर्वा दरदैश्चन्दनेस्तथा ॥ ८६ ॥

सिन्दूरैस्तण्डुलैर्मुद्गैस्तिलैः कृष्णैः सितैरपि ।

नवानां नवभिः कुरादेबिर्यन्त्रप्रकल्पनम् ॥ ८७ ॥

चैत्रादिविषुवद्वन्वे तथैवायनयोर्द्वयोः ।

रक्षोत्तराक्षयोर्जन्मत्रितये वर्षयोः क्रमात् ॥ ८८ ॥

राजा वा राजमहिषी सेनापत्याधिपोऽथवा ।

अन्योवाश(भ)

क्तिशीलाढयः कारयेदभिषेचनम् ॥ ८९ ॥

दक्षिणामभिषेके तु दद्याद्भूरि स्वशक्तितः ।

वित्तशाठ्यं न कुर्वीत यदि कुर्वीत लोभतः ॥ ९० ॥

संदहेत्येपाकवत्पुत्रलक्ष्मीकलत्रकैः ।

तस्मात्सर्वत्र तन्त्रेऽस्मिन् वित्तशाठ्यं न चितयेत् ॥ ९१ ॥

अभिषेकफलं देवि शृणु वक्ष्ये यथाविधि ।

सोमसूर्याग्निरूपेण जलेनेप्सितमन्त्रतः ॥ ९२ ॥

जपपूजादिना सिद्धवैभवेनाभिषेकतः ।

दुर्लक्षणसमुत्थानि तथा दुष्कर्मजानि च ॥ ९३ ॥

तद्वद्दुर्नीतजनितान्यन्यानि दुरतानि च ।

नाशयेत्ततत्क्षणाद्देवी सलिलैरिव पावकः ॥ ९४ ॥

अपुत्रोवित्तविद्यायुरारोग्यादिसमन्वितान् ।

लभते च बहून् पुत्रान् सुखी च चिरमेधते ॥ ९५ ॥

केमद्रुमादियोगेषु जन्म तत् प्राक्तनाद्यतः।
योभृशं नित्यदा विद्यात् क्लिष्टः सोऽपि श्रियैधते॥ ९६॥
प्राग्जन्मसञ्चितैः पापैरपथ्यादिनिषेवणैः।
अनीत्या वैरविहितैरभिचारादिभिस्तु वा॥ ९७॥
ये रोगाः पीडयन्त्येनं ते विनश्यन्त्यशेषतः।
कान्तिलक्ष्मीधनारोग्यविद्याविजयकीर्तिभिः॥ ९८॥
सुचिरं जीवति ख्यातः पुत्रपौत्रादिभिर्युतः।
नवाभिषेकं नवसु प्रोक्तेषु विधिना चरन्॥ ९९॥
अपमृत्युं विजित्यास्मात् भक्तः शुद्धान्तमानसः।
जीवन्मुक्तश्चिरं योगी भुवि जीवति मन्मथः॥ १००॥
शब्दतत्त्वमयी व्याप्तिरिति सम्यक् समीरिता।
अस्या निष्फालनात् चित्ते तत्तत्वं स्वात्मसात्कृतम्॥ १०१॥
इति श्री षोडशनित्यातन्त्रेषु श्रिकादिमते दशमं पटलम्।

## एकादशपटलम्

अथ षोडशनित्यासु या षष्ठी समुदीरिता।
सा विद्या वह्निवासिन्याः कथितां ते नवाक्षरा॥ १॥
तदङ्गानि लिपिन्यासं ध्यानं शक्तिभिरर्चनम्।
तत्साधनविद्थिं तस्याः प्रयोगान्वीविधानमि॥ २॥

होमयन्त्रविभेदैश्च कथयामि शृणु प्रिये ।
विद्याद्वितीयबीजेन स्वरान् दीर्घान्नियोजयेत् ॥ ३ ॥
मायान्तान् षड्भिरेवाङ्गान्याचरेत् स्वकराङ्गयोः ।
नवाक्षराणि विद्याया नवरन्ध्रेषु विन्यसेत् ॥ ४ ॥
व्यापकं च समस्तेन कुर्याद्दिव्यात्मसिद्धये ।
सर्वास्वपि च विद्यासु व्यापकं तत् समाचरेत् ॥ ५ ॥
तेन तत्तन्मयो भूयात्साधस्तेन सिद्धयः ।
तस्याचिरेण देवानां प्रसादात् सम्भवन्ति च ॥ ६ ॥
माओकायाः षडङ्गं च मातृकान्यासमेव च ।
सर्वासां प्रथमं कृत्वा पस्चात्ततत्रोय्दितं न्यसेत् ॥ ७ ॥
ललितायास्तु वर्गैस्तत्प्रोक्तमष्टाभिरेव च ।
तेन तस्यास्तु लिपिशो न्यासन्नैव[?]
समीरितम् ॥ ८ ॥
तप्ताञ्चनसङ्काशां नवयौवनसुन्दरीम् ।
चारुस्मेरसुखाम्भोजां विसलन्नयनत्रयाम् ॥ ९ ॥
अष्टाभिर्बाहुभिर्युक्तां माणिक्याभरणोज्ज्वलाम् ।
पद्मरागगिरीटांशुसम्भेदारुणिताम्बराम् ॥ १० ॥
पीतकौशेयवसनां रत्नमञ्जीरमेखलाम् ।
रत्नमौक्तिकसंभिन्नस्तबकाभरणोज्ज्वलाम् ॥ ११ ॥

रक्ताञ्जकम्बुपुण्ड्रेक्षुचापपूर्णेन्दुमण्डलाम्।

दधानां बाहुभिर्वामैः कह्लारं हेमशृण्गकम्॥ १२॥

पुष्पेषु मातुलिङ्गं च दधानां दक्षिणैः करैः।

स्वसमानाभिरभितः शक्तिभिः परवारिताम्॥ १३॥

एवं ध्यावाऽर्चयेद्वह्निवासिनीं विश्वविग्रहाम्ह्।

ज्वालिनीविस्फुलिङ्गिन्यौ मङ्गला सुमनोहरा॥ १४॥

कनकाङ्कितवाविश्वाविविधाचेतिशक्तयः।

अष्टकोणेषु सम्पूज्यास्तदग्रात्तु(त्सु)

प्रदक्षिणम्॥ १५॥

दलेषु द्वादशस्वेता राशिशक्तीः समर्चयेत्।

मेषां वृषाह्द्वयां शक्तिं मिथुनां कर्कटीमपि॥ १६॥

सिंहां कन्यां तुलां कीटां चापां च मकरामपि।

कुम्भां मीनां यजेत्प्राग्वदग्रादारभ्य शाङ्करि॥ १७॥

चतुरस्रेषु द्वारेषु पार्श्वयोः कोणदिक्षु च।

अन्ययेश्व दिशोः शक्तिः प्रोक्ता दश समर्चयेत्॥ १८॥

मायासप्ताक्षरीमध्ये गतिर्नामभिरीतितैः।

घस्मरा सर्वभक्षा च विश्वासा विविधोद्भवा॥ १९॥

चित्ररूपा निःसम्पन्ना निरातङ्का च पावनी।

अचिन्त्यवैभवा रक्ता दशमी परिकीर्तिता॥ २०॥

बलिदेवीति सम्प्रोक्ता कुरुकुल्लाद्यविद्यया ।

यत्र नोक्ता देवता तु बलिकर्मणि तत्र ताम् ॥ २१ ॥

सप्ताक्षर्या समोपेतां विदध्याद्बलिदेवताम् ।

वृत्तयोर्नवयोनिं तु कृत्वा तद्बहिरम्बुजम् ॥ २२ ॥

द्वादशछदसंयुक्तं विदध्याद्वृत्तयुग्मकम् ।

तद्बहिश्चतुरस्रे द्वे द्वारद्वयसमन्विते ॥ २३ ॥

पूर्वास्चिमयोरत्र देवीं चक्रे तथाऽर्चयेत् ।

अनुक्तेष्वङ्गमूलाभ्यामर्घ्यं संसाधयेत्तथा ॥ २४ ॥

द्रव्यानुक्तौ होमविधौ घृतमन्नाद्यमेव च ।

सङ्ख्यानुक्तौ सहस्रं स्याच्छतं वा तन्त्रचोदितम् ॥ २५ ॥

पूजासमाप्तिरप्येवमनुक्ता प्राग्वदीरिता ।

विद्यायाः साधनं तद्वत्तन्त्रेऽस्मिन् परमेश्वरि ॥ २६ ॥

अन्य मन्त्रानपेक्षित्वात्पूर्णत्वं नामुन क्षतम् ।

काम्यहोमविधिं वक्ष्ये शृणु वाञ्चितदायकम् ॥ २७ ॥

शालितण्डुलमादाय प्रस्थं भाण्डेनवे क्षिपेत् ।

समानवर्णवत्साया रक्ताया गोपय (?)

स्तथा ॥ २८ ॥

द्विगुणं तत्र निक्षिप्य श्रपयेत् संस्कृतेऽनले ।

घृतेन सिक्तं सिक्थं तु कृत्वा तस्मसितं करे ॥ २९ ॥

निधाय विद्यामष्टोर्ध्वं शतं जप्त्वा हुनेत्ततः।
एवं होमो महालक्ष्मीमावहेत्प्रतिपत्कृतः॥ ३०॥
शुक्रवारेऽप्यपि तथा वर्षान्नृपसमोभवेत्।
पञ्चम्यां तु विशेषेण प्राग्वद्धोमं समाचरेत्॥ ३१॥
तस्यां तिथौ त्रिमध्वक्तैर्मल्लिकाद्यैः सितैर्हुतैः।
अन्नाज्याभ्यां तु नियतं हुत्वान्नाद्योभवेन्नरः॥ ३२॥
यदद्धि वाञ्छितं वस्तु तानि सर्वाणि सर्वदा।
घृतहोमादवाप्नोति तथैव तिलतण्डुलैः॥ ३३॥
पञ्चमीषु विशेषेण पूजां कुर्याद्व्रती भवेत्।
प्रतिपत्तिथिमारभ्य पञ्चदश्यन्तमम्बिके॥ ३४॥
कामेश्वर्यादिचित्रान्ता देव्यस्त्वेकैकविग्रहाः।
यतस्तेन स्वस्वतिथौ तास्ता पूज्या हुतादिभिः॥ ३५॥
प्रीणयेद्व्रतसङ्कल्फसमेतो भक्तिसंयुतः।
तेनायुःश्रिधनारोग्यविद्याकीर्तिसमन्वितः॥ ३६॥
जीवेद्वर्षशतं भूमौ स्वतुल्याग्रयश्च तद्बली।
यत्तिथौ या समाख्याता सुता सममवाप्नुयात्॥ ३७॥
विद्याविधिवद्देवैताः प्रोक्ताः पञ्चदशापि च।
सम्प्राप्य जपहोमार्चायोगतर्पणसेकतः॥ ३८॥
विद्यया देवतात्मानं सम्प्राप्याऽखिलमाचरेत्।

विद्याप्राप्तिविधिं देव ब्रूहि सम्यक् ममाधुना ॥ ३९ ॥

आसां पञ्चदशानां च येनैताः साधकोन्मुखाः ।

शृणु वक्ष्यामि ते देवि विद्याप्राप्तिविधिं शुभम् ॥ ४० ॥

येन विद्यादेवताभ्यामैक्ययोगेन सिद्ध्यति ।

तद्भावमाययोरैक्यरूपमानन्दविग्रहम् ॥ ४१ ॥

यद्वाप्तुं ततन्तेऽद्याप्यनेके मुनयोऽम्बिके ।

कुचन्दनैः कुङ्कुमैर्वा सिन्दूरैर्गौरिकैः शुभैः ॥ ४२ ॥

विदध्याद्विपुलं चक्रं व्यक्तरेखं सुशोभनम् ।

यस्या यच्चक्रमाख्यातं नित्यपूजाविधिक्रमे ॥ ४३ ॥

तत्र कुम्भं निधायान्तर्जले सम्पूज्य देवताः ।

प्रोक्तक्रमसमोपेतं पूर्वेद्युर्गीतनृत्यकौ ॥ ४४ ॥

कृत्वोत्सवमथान्येद्युः प्राग्वदभ्यर्च्य तां तथा ।

तत्तिथौ प्राङ्मुखं शिष्टमुक्तलक्षणसंयुतम् ॥ ४५ ॥

तथाविधा गुरुः कुम्भजैलैस्तमभिषेचयेत् ।

तज्जलं प्रागुदङ्मध्यादिक्षुगं सर्वसिद्धिदम् ॥ ४६ ॥

अन्यासु क्रमतोऽनिष्टान्यवाप्नोति सुनिश्चितम् ।

वह्निदाहं मृतिं रोगं दारिद्र्यं देशमोचनम् ॥ ४७ ॥

क्रमाद्वन्ह्यादि वाय्वन्तं फलानि स्युरिमानि वै ।

ततोऽसौ परिधायासु शुम्भेशुद्धेव वाससी ॥ ४८ ॥

समाचम्य निर्हैश्चित्तैः सम्स्तैर्वा पुरोदितैः।

अभ्यर्च्य पादयोर्नाथं पञ्चश्लोकैः स्तुवंस्त्रिशः॥ ४९॥

प्रणम्योत्थाय पुरतोबद्धाञ्जलिकरोभवेत्।

ततोगुरुस्तंमाहूय चक्रम्ध्ये निवेश्य च॥ ५०॥

मनसा भावयेन्नैक्यमात्मानं देवतात्मना।

प्रोक्तक्रमेण तां देवीं विद्यारूपां महाद्युतिम्॥ ५१॥

समावाह्यास्य मूर्द्धादित्रिषु स्थानेषु तु क्रमात्।

संस्थाप्य प्रोक्तरूपां तां ध्यात्वाऽभ्यर्च्य वदेन्मनुम्॥ ५२॥

जीवकर्णे त्रिशः पूर्णो देवतात्मा समाहितः।

तस्तत्रैव तां विद्यां शतं जप्यात्तदात्मवान्॥ ५३॥

पुनस्तदाज्ञयोत्थाय पुष्पैरभ्यर्च्यतं स्तुवन्।

प्रणम्य त्रिरुपासीत मूर्द्धबद्धाञ्जलिः स्तुपन्॥ ५४॥

आहूय क्रममाचारं प्रोक्ता सम्यक् भजेति तम्।

आदिशेद्देशिकस्तस्माद्दिनादारभ्य सोऽपि ताम्॥ ५५॥

नित्यशोजमपूजाद्यैरुपासीत शिवां गुरुम्।

एवं पञ्चदशानां च नित्यानां क्रम ईरितः॥ ५६॥

विद्याप्राप्तिविधौ देवि सर्वं सम्यक् समीरितम्।

तासां नैमित्तिकं काम्यं ललितोक्तविधानतः॥ ५७॥

कुर्यात्प्रतिष्ठाद्यमेवं यत एतास्तु तन्मया।

आसामनोन्यमङ्गानि पूजासु परमेश्वरि ॥ ५८ ॥

एकाङ्गित्वे स्थिताऽन्यास्तत् परिवारास्तथाविधाः ।

अन्यदा प्रोक्तरूपास्तास्तत्रतत्रार्चने मताः ॥ ५९ ॥

तासां काम्यकलावाप्तिध्यानं तत्पटलोदितम् ।

एवं सर्वं समाख्यातं साधारणविधानकम् ॥ ६० ॥

विद्यामन्त्रा इति प्रोक्तं यत्तद्भेदं वद प्रभो ।

शृणु देवि विशेषन्तु सन्दर्भं वै समेऽपि वा ॥ ६१ ॥

वर्णानां देवताभेदा द्विधाः स्युस्ते त्वशेषतः ।

त्वद्दैववत्याः स्मृता विद्या मद्देवत्यास्तु मन्त्रकाः ॥ ६२ ॥

पुनरस्यास्तु यन्त्राणि तत्फलानि शृणु प्रिये ।

विद्याक्षरेष्वनावृत्तान्यक्षराण्यष्त तस्तैथा ॥ ६३ ॥

स्वराणां सङ्गमा द्वष्टविंशत्या शतमीरितम् ।

विधाय वृत्तयोर्मध्ये त्वष्टकोणे ततोद्वयम् ॥ ६४ ॥

कृत्वा तेषु न्यसेद्वर्णानष्टस्वष्टौ  तु मध्यतः ।

मायां नामान्वितां कृत्वा तां तारेण प्रवेष्टयेत् ॥ ६५ ॥

अन्तवृत्तान्तराले तांल्लिखेद्वर्णान् दशक्रमात् ।

कर्मानुरूपान् पञ्चाशल्लिखेदुक्तक्रमेण वै ॥ ६६ ॥

वृत्तान्तरा प्राग्वदादिरादिक्षान्ताक्षराणि च ।

एवं षोडश यन्त्राणि जायन्ते तैर्यथाक्रमम् ॥ ६७ ॥

तैर्यन्त्रैः साधयेन्नित्यं मनीषितमशेषतः ।
प्रथमं खर्परे रक्तवह्निमूलेन संयुतम् ॥ ६८ ॥
सिन्दुरं तद्रसे पिष्ट्वा धत्तूररससंयुते ।
लिखित्वा खदिराङ्गारे तापयेन्निशि जापवान् ॥ ६९ ॥
नारी नरोनृपोऽन्योवा समायाति च तद्बलात् ।
तद्देवतेन ताम्रे वा वा कांस्यो वा प्राग्वदालिखेत् ॥ ७० ॥
तत्तापनादपि भवेत् पूर्वोक्तं फमश्वरि ।
द्वितीयं खर्परे तेन विलिख्य निशि तापयेत् ॥ ७१ ॥
नारी वश्या समायाति जन्माचारविलङ्घिनी ।
तृतीयं तेन तत्रैव विलिखित्वा निशि तापयेत् ॥ ७२ ॥
श्मशानाग्नौ मुक्तकेशा क्षणाद्वैरिज्वरातुरा ।
तदेव दम्पती दग्धवन्ःयागारं तु निम्बजे ॥ ७३ ॥
रसे पिष्ट्वा लिखित्वाऽग्नौ संताप्य निरकर्नैत्ततः ।
श्मशाने वैर्णां प्रोक्तकाले क्रुद्धाशयो जपेत् ॥ ७४ ॥
मनुं तदेव सम्भ्रान्तः पिशाचातिर्रिपुर्भवेत् ।
चतुर्थं विलिखेत्कृष्णपट्टचीरेऽसिताम्बरे ॥ ७५ ॥
पूर्ववत्तत्र निखनेद्रात्रावुक्रक्रमेण च ।
दाहज्वरेण सप्ताहाद्रिपुर्याति यमालयम् ॥ ७६ ॥
पञ्चमेऽप्यथ वा षष्ठे द्वयोनार्मं लिखेद्द्वयोः ।

कालोलूकजपक्षोत्थलेखन्या खर्परद्वये ॥ ७७ ॥

श्मशाने निखनेत् प्राग्वन्नदीतीरद्वये द्वयम् ।

नद्यांतु वारिणा पूर्णा यां द्वेषास्यात्तयोर्मिथः ॥ ७८ ॥

सप्तमे नाम संलिख्य सिसपट्टेयथाविधि ।

शिरःकपाले निःक्षिप्य श्मशाने निखनेन्निशि ॥ ७९ ॥

रिपोः पुरोक्तकाले तु पिशाचैर्ग्रस्यते रिपुः ।

अष्टमं खर्परे कृत्वा रिपुद्वारे खन्नेन्निशि ॥ ८० ॥

सप्ताहात्तङ्गृहाद्वैरी प्रयुतुच्चाटितोऽन्यतः ।

नवमं हेम्नि कृत्वा तदुर्मिकायां वरे दिने ॥ ८१ ॥

सिद्धयोगे शुबे लग्ने धिषणोदय एव वा ।

कृत्यापमृत्त्यूरोगादिदुखेभ्योमुच्यते नरः ॥ ८२ ॥

दशमं राजते पट्टे कृत्वा वेश्मनि कुत्रचित् ।

निधाय पूजयेद्वेश्मन्यस्मपातादिशान्तये ॥ ८३ ॥

तथा भूतग्रहार्तश्च रक्षेदेतस्य धारणात् ।

एकादशे लिखेद्भूर्जे पाटीरेन्दुद्रवेस्तु तत् ॥ ८४ ॥

उत्क्रमसमोपेतं गुलिकीकृत्य तां पुनः ।

सितसिक्थमये लिङ्गे संस्थाप्याभ्यर्च्य तत् पुनः ॥ ८५ ॥

स्थापयेत् क्षौद्रमध्ये तु पूजयेन्नित्यशश्च तत् ।

सन्ध्यासु मुसितैः पुष्पैः सौरभाद्यैर्विधानतः ॥ ८६ ॥

मासात्तदर्द्धात्सप्ताहद्दशे स्युः शत्रवो ध्रुवम् ।
भवेयुर्व्याधितास्तेन घृतेनारोग्यमाप्नुयः । ८७ ॥
जवरार्तास्तु विशेषेण मुखिताः स्युरयत्नतः ।
अम्लसौवीरमध्यस्थे विद्वेषयति वैरिणौ ॥ ८८ ॥
तत्रैव कथनाद्रोगं तयोरुत्पादयेदपि ।
शुण्ठीमरीचपिप्पल्यः सुसूक्ष्माः  परिचूर्णिताः ॥ ८९ ॥
लकुचस्य रसोपेताः तन्मध्ये तद्विनिक्षिपेत् ।
तापयेत् त्रिषु सन्ध्यासु यन्त्रारातिस्तु तन्मुखम् ॥ ९०
प्रोक्तकाले ज्वरैरार्तस्तापतृष्णासमन्वितः ।
द्वादशं खर्परे रात्रिरसेनालिख्य तत्पुनः ॥ ९१ ॥
इष्टकातुग्मध्यस्थं कृत्वा तत् श्लेषयेद्दृढम् ।
स्थापतेच्चण्डीकाग्रेहे शास्तुरायतनेऽपि वा ॥ ९२ ॥
स्वगृहे भित्तिमध्ये वा शयनस्थापनतोऽपि वा ।
स्तम्भयेद्वैरिणोरोषमुद्योगं वाऽथ चिन्तनम् ॥ ९३ ॥
व्यवहारं ऋणं चान्यद्यद्यदस्याहितात्मकम् ।
त्रयोदशेन भूर्जस्थेनाशु धारणतोऽङ्गना ॥ ९४ ॥
वन्ध्यापि लभते पुत्रं विचित्रा यन्त्रशक्तशयः ।
चतुर्दशगतं नाम कृत्वा भूर्जे चतुष्पथे ॥ ९५ ॥
सिक्स्थमध्यगतं कृत्वा तन्निशीथेऽभितापयेत् ।

सप्ताहाद्वशमायान्ति स्त्रियो वा पुरुषा नृपाः ॥ ९६ ॥

गजा हया मृगास्त्वन्ये ये जीवा भूतलाश्रयाः ।

परेण नाम्ना युक्तेन फल्कालिखितेन वै ॥ ९७ ॥

सुखप्रसूतिः स्यात् स्त्रीणां तत्पूजाप्तेक्षणादिना ।

षोडशे नाम संलिख्य धारणात्प्राणिनां तथा ॥ ९८ ॥

रक्षा भवति सर्वत्र ग्रहरोगभादिषु ।

तदेव स्वर्णपट्टस्थं विधाय विधिना युतम् ॥ ९९ ॥

ऊर्मिकाङ्गदभूषादौ मूर्ध्नि वा बिभृयात्ततः ।

आधिव्याधिविनिर्मुक्तोनिःसपत्नोजितेन्द्रियः ॥ १०० ॥

भोक्ता भक्तश्च पुण्यानां जीवेद्वर्षशतं भुवि ।

योनितत्त्वमयी व्याप्तिरितिसम्यक् समीरिता ॥ १०१ ॥

अस्या निष्फालनाच्चित्ते तत्तत्त्वं स्वात्मसात्कृतम् ।

इति श्रीषोदशनित्यातन्त्रेषु श्रिकादिमताख्यस्य परिपूर्नस्यतन्त्रस्य् एकादशपटलं परिपूर्णम् ॥ ११ ॥

## द्वादशपटलम्

अथ षोडशनित्यासु सप्तमी या समीरिता ।

तस्या विधानं वक्ष्यामि शृणु सर्वर्थसाधकम् ॥ १ ॥

प्रोक्तैव विद्या प्रागेव द्वादशाक्षरविग्रहा ।

तदङ्गानि लिपिन्यासं ध्यानं शक्तिभिरर्चनम् ॥ २ ॥

साधनं होमकर्माणि (सर्वत) यन्त्राणि फलभेदतः ।

प्रोक्तक्रमेण सकलं कथयामि यथाविधि ॥ ३ ॥

द्वयमेकमथ च द्वयं द्वयमथो द्वयम् ।

मायया पुटितं कृत्वा कुर्यादङ्गानि षट्क्रमात् ॥ ४ ॥

प्रत्येकं शक्तिपुटितैर्मन्त्राञ्चैर्दशभिर्न्यसेत् ।

दृक्श्रोत्रनासावाग्वक्षोनाभिगुह्येषु च क्रमात् ॥ ५ ॥

रक्तां रक्ताम्बरां रक्तगन्धमालाविभूषणां ।ह् ।

चतुर्भुजां त्रिनयनां माणिक्यमुकुटोज्ज्वलाम् ॥ ६ ॥

पाशाङ्कुशाविक्षुचापं दाडिमीसायकं तथा ।

दधानां बाहुभिर्नेत्रैः दय (पर)

 दमसुशीतलैः ॥ ७ ॥

पश्यन्ती साधकं त्रस्त्रषट्कोणाञ्जनमहीपुरे ।

चक्रमध्ये सुखासीनां स्मेरवक्त्रसरोरुहाम् ॥ ८ ॥

शक्तिभीः स्वस्वरूपाभिरावृतां पोतमध्यगे ।

सिंहासनेऽभितः प्रेङ्खत्प्रोतस्थाभिः स्वशक्तिभिः ॥ ९ ॥

वृत्तान्ताभिर्विनोदानि यातायातादिभिः सदा ।

कुर्वाणमरुणाम्भोधौ चिन्तये (द्वज्) न्मन्त्रनायिकाम् ॥ १० ॥

इच्छाज्ञानक्रियास्तत्र त्रिकोणस्थाश्च शक्तयः ।

डाकिन्याद्याः षडस्त्रस्थः पद्मद्वादशपत्रगाः ॥ ११ ॥

हृल्लेखा क्लेदिनी क्लिन्ना क्षोभिणी मदनातुरा ।

निरञ्जना रागवती तथैव मदनावती ॥ १२ ॥

मेखला द्राविणी वेगवती द्वादशशक्तयः ।

ततः षोडशपत्रस्थाः शक्तीराकर्णयाम्बिके ॥ १३ ॥

कमलां कामिनीं कल्पां कलां कलिककौतुके ।

किरातां कालकदने कौशिकां कम्बुवाह्निनीम् ॥ १४ ॥

कातरां कपटां कीर्तिकुमारीं कुङ्कुमामपि ।

चतुरस्त्रस्थितां चापि शक्तीराकर्णय क्रमात् ॥ १५ ॥

जम्भिका वेगिनी नाम्नी चपला पेशला सती ।

रतिः श्रद्धा बोगलोभमदोन्मत्ते मनस्विनी ॥ १६ ॥

दिक्षु द्वारेषु (पार्श्वेषु) कोण (अदि) दिक्षु च संस्थिताः (ननाः)

।

द्वादशैता महादेवि चतुरस्त्रेऽभितोजपेत् ॥ १७ ॥

कृत्वाऽर्घ्यमङ्गमूलाभ्यां प्रोक्तरूपं ततोऽर्चयेत् ।

शोणाब्धिं हेमपोतं च सिंहासनमनान्तरम् ॥ १८ ॥

तत्र चक्रं ततो देवीं प्राग्वदावाह्य शक्तिभिः ।

मायासप्ताक्षरीमध्यंगतैर्नामभिरर्चयेत् ॥ १९ ॥

बलिं च दद्यात्तदनु सप्ताक्षर्या पुरोक्तया ।

देव्यास्तु कुरुकुल्लाया होमं कुर्याद्यथाविधि ॥ २० ॥

घृताक्तैररुणैः पुष्पैर्घृतैर्वा होममाचरेत्।

प्राग्वत् समापयेदित्थमर्चनं ते समीरितम्॥ २१ ॥

वसन्तकाले ग्रीष्मे वा पूर्णामारभ्य साधयेत्।

हविष्याषी पयोभक्षः फलमूलाशनोऽथ वा ॥ २२ ॥

स्नातः सुगन्धिसलिलैररुणांशकवान् शुचिः।

चन्द्रचन्दनकाश्मीरचर्चालोहितविग्रहः ॥ २३ ॥

अञ्जनाक्ताक्षियुगलस्ताम्बुलारुणवक्त्रवान्।

मुखार्पितेन्दुशकलो हृष्टचेता जितेन्द्रियः ॥ २४ ॥

मौनी त्रिकालपूजासु कृतसङ्कल्पसाधनः।

नक्ताशी हुतशिष्टेन जपेद्विद्यां समाहितः ॥ २५ ॥

नित्यशोभो जपेद्विद्याभक्तान् भजनकौतुकान्।

त्रयादहीन मधुरं पायसं भोज्यभक्तिमान्॥ २६ ॥

प्रणम्याभ्यर्च्य विसृजेन्नित्यशस्तद्दिनेषु तु।

गुरुजीवं समासाद्य प्रणम्ब्याऽसकृदात्मवान्॥ २७ ॥

धनधान्याम्बराद्यैस्तं सन्तोष्य तदनुज्ञया।

कृतारम्भो नित्यशश्च पूजयेत्तं च भक्तितः ॥ २८ ॥

अन्ते च चित्तैः स्तोत्रैश्च तं संतोष्य कृती भवेत्।

वित्तशाट्यं च दर्पं च दम्भं चासत्यमेव च ॥ २९ ॥

न कदाचिच्च कुर्वीत विशेषाद्गुरुसन्निधौ ।

एवं लक्षत्रयं जप्त्वा तद्दशांशं हुनेत् घृतैः ॥ ३० ॥

आरग्वधप्रसूनैश्च प्रसूनैर्बजुलाद्भवैः ।

मधूकहैश्चम्पकैर्वा त्रिमध्वक्तैश्च नित्यशः ॥ ३१ ॥

चन्द्रचन्दनकस्तूरीकाश्मीरसुरभीकृतैः ।

तर्पयेत् सलिलैस्तावद्दिनशोभक्तिमान् दृढः ॥ ३२ ॥

एवं संसिद्धमन्त्रस्तु कुर्यात्काम्यानि साधकः ।

गुरुभक्तोनित्यकृत्यकृतसङ्कल्पसंयुतः ॥ ३३ ॥

सहस्रजापी स्थिरधीर्मन्त्रवीर्यविदात्मवान् ।

यः सोऽपि काम्यान् कुर्वीत प्रयोगान्नान्यथा शिवे ॥ ३४ ॥

यद्यज्ञानेन मोहेन चापलेनापि वाऽऽचरेत् ।

अनर्थान् क्लेशनाशादि पीडां प्राप्नोति निस्चितम् ॥ ३५ ॥

अरुणैः पङ्कजैर्होमं कुर्यात्त्रिमधुराप्लुतैः ।

मण्डलाल्लभते लक्ष्मीं महतीं श्लाघ्यविग्रहम् (हाम्) ॥ ३६ ॥

कह्लारैः क्शौद्रसंसिक्तैः पौर्णाद्यं (त्रि)तद्दि दिनावधि ।

जुहुयान्नित्यशोभक्त्या सहस्रं विकचैः शुभैः ॥ ३७ ॥

तत्तद्दिनेषु पूर्वोक्तान् (पू)भोजयेदुक्तरूपतः ।

तावच्च जप्याद्धोमान्ते यावत्सङ्ख्याहुतं कृतम् ॥ ३८ ॥

चम्पकैः क्षोद्रसं(सि)

युक्तैः सहस्रहवनाद्ध्रुवम् ।

लभते स्वर्णनिष्काणां शतं मासेन पूर्ववत् ॥ ३९ ॥

पाटलैर्घृतसंसिक्तैः त्रिसहस्रं हुतैः तथा ।

दर्शादिसासँआल्लभते (check this) चिताणि वसनानि च ॥ ४० ॥

कर्पूरचन्दनादीनि सुगन्धीनि च मासतः ।

वस्तूनि लभते हृद्यैरन्यैर्भोगोप(भो)

योगिभिः ॥ ४१ ॥

शालिभिः क्षीरसिक्ताभिः सप्तमिषु शतं हुनेत् ।

तेन शालिसमृद्धिः स्यात् मासैः षड्भिरसंशयम् ॥ ४२ ॥

तिलैर्हुतैस्तद्दिवसे वर्षादारोग्यमाप्नुयात् ।

स्वजन्मसु त्रिषु तथा दूर्वाभिर्जुहुयात्तथा ॥ ४३ ॥

निरातङ्को महाभोगः शतं वर्षाणि जीवति ।

गुडूचीतिलदूर्वाभिस्त्रिषु जन्मसु वा हुनेत् ॥ ४४ ॥

तेनायुःश्रीर्यशोभोगापुण्यनिध्या दिभाग्भवेत् ।

घृतपायसगुद्धैस्तु हुतैस्तेषु त्रिषु क्रमात् ॥ ४५ ॥

आयुरारोग्यविभबवैनृपमान्योभवेत्तथा ।

सप्तम्यां कदलीहोमात् सौभाग्यं लभते वृतः ॥ ४६ ॥

दूर्वात्रिकैस्तु प्रादेशमात्रैस्त्रिस्वादुसंयुतैः ।

जुहुयाद्दिनशोघोरे सन्निपातज्वरे गदे ॥ ४७ ॥

महारोगेषु दूर्वाभिः तिलैश्छिन्नोद्भवैस्तथा ।

त्रिभिर्वा नित्यशोहोमं कुर्यात्त्रिस्वादुसंयुतैः ॥ ४८ ॥

षण्मासादब्दतो वाऽपि रोगान्मुक्तः सुखी भवेत् ।

तद्दिनेषु जपेद्विद्यां नित्यशः सलिलं स्पृशत् ॥ ४९ ॥

सहस्रवारं तत्तोयैः स्नानं पानं स्माचरेत् ।

पाकाद्यमपि तैरेव कुर्याद्रोगविमुक्तये ॥ ५० ॥

साध्यर्क्षवृक्षं संचुर्ण्य लवङ्गं सर्षपं तिलम् ।

पिष्टं च साध्यपादोत्थ रजसा च समन्वितम् ॥ ५१ ॥

कृत्वा पुत्तलिकां तैस्तु हृदये नाम संयुताम् ।

प्राग्वच्छित्त्वाऽऽयसैस्तीक्ष्णैः शस्त्रैः पुत्तलिकां हुनेत् ॥ ५२ ॥

एवं दिनैः सप्तभिर्वा त्रिभिर्वैकदिनेन वा ।

साध्यो वशो भवेच्छीघ्रमपि दूरस्थितो दृढः ॥ ५३ ॥

तथाविधां पुत्तलिकां कुण्डमध्ये खनेद्भुवि ।

उपर्यग्निं निधायात्र विद्यया दिनशो(वं)

हुनेत् ॥ ५४ ॥

त्रिसहस्रं त्रिनामायां सर्षपैस्तद्रसप्लुतैः ।

शतयोगनदूरादप्यानयेद्वनितां बलात् ॥ ५५ ॥

तां तु पुत्तलिकामार्द्रमधूच्छिष्टसमन्विताम् ।

कृतप्राणप्रतिष्टां च श्मशाने निखनेन्निशि ॥ ५६ ॥

साध्ययोनिं च तत्रैव छित्वा दत्वा बलिं ततः ।

कृताभिषेकस्तां विद्यां प्रजपेच्च शतत्रयम् ॥ ५७ ॥

अरातेरष्टमे राशौ मासान्नानाविधैरपि ।

रोगैर्भूतादिसंक्लेशैर्नाशमेति सुनिश्चितम् ॥ ५८ ॥

यद्यन्तरा समुद्धृत्य सलिले तां खनेन्निशि ।

क्लेशैस्तैः स विनिर्मुक्तः सुखी जीवति भूतले ॥ ५९ ॥

साध्यवृक्षेण कृत्वा तां सर्षपाज्ये निवेशिताम् ।

तोयमध्ये निधायैतत्कृत्वाथयेदुक्तवासरैः ॥ ६० ॥

वैरी तीव्रज्वरेणर्तः कृते प्राग्वत् सुखी भवेत् ।

तामेव चण्डिकागेहे तथा बलियुतं खनेत् ॥ ६१ ॥

साध्यो नरश्चेत् नारी चेत् शास्तुरायतने खनेत् ।

तद्विधानेन सहितं शत्रुरुन्मादवान् भवेत् ॥ ६२ ॥

महावज्रं च वज्रं च यन्त्राण्यन्यान्यनुक्रमात् ।

प्रयोगानपि वक्ष्यामि सनाहितधिया शृणु ॥ ६३ ॥

प्राक्प्रत्यक्दक्षिणोदिक् च विंशत्सूत्राणि पातयेत् ।

तेन कोष्ठानि जायन्ते त्वेकषष्ट्या शतत्रयम् ॥ ६४ ॥

तेषु कोण(उपात्तेषु)चतुष्क्तेऽपि मार्जयेत् पञ्चकेन च ।

चत्वारिंशत्तत्र शेषं वज्राकारं यथा भवेत् ॥ ६५ ॥

दिक्षु चत्वारि चत्वारि मार्जयित्वा त्रिकोणकम् ।

कुर्याच्छेषाणि कोष्ठानि पञ्चषष्ट्या शतं भवेत् ॥ ६६ ॥

तेषु पूर्वादिपरितो लिखे(दा)द्विद्याक्षराणि तु ।

प्राग्वत्स्वरविभिन्नानि प्रागुक्तविधिना तथा(तः)

॥ ६७ ॥

चत्वारिचत्वारिंशच्च शतं तेषां तु मध्यतः ।

एकविंशतिकोष्ठानि शिष्टानि पुनरम्बिके ॥ ६८ ॥

तेषु पर्यायनित्याणुवर्णषट्कसमन्वितम् ।

घटिकायुगवर्णौ चलिकेत् प्रागुक्तयोगतः ॥ ६९ ॥

शिष्टेषु विद्यावर्णांश्च लिखेद्द्वादशशेषयोः ।

साध्याख्यमालिखेदुक्तक्रमेण पुटयोर्द्वयोः ॥ ७० ॥

चतुर्दिक्षु लिखेत्कोणेष्वभितो भौतिकाण्कान् ।

द्वित्रिक्रमेण प्राक्प्रत्यक्कोणयोस्तु त्रयं त्रयम् ॥ ७१ ॥

एतत् प्रोक्तेषु संलिख्य संपूज्य विधिना युतम् ।

स्पृशन् जपेन्मनुं पश्चात्त्रिसहस्रं तस्तसु तत्(तम्)

॥ ७२ ॥

विनियुंज्याद्यथोक्तेषु कार्येषु क्रमतः शिवे ।

भूताक्षराणि च पुनर्लिखेत्कार्यानुरूपतः ॥ ७३ ॥

महावज्रमितिख्यातं सर्वत्रैवापराजितम् ।

विजयस्तम्भविद्वेषवशोच्चाटनकर्मसु ॥ ७४ ॥

रक्षयेत् पुष्टिशान्त्यै च तथैव रिपुनिग्रहे ।

देशराष्ट्रपुरग्रामनिवेशादेर्विशेषतः ॥ ७५ ॥

घोरेषुत्पातजातेषू भूमौ संलिख्य गरिकैः ।

मध्ये देवीं समावाह्य पूजयेन्नित्यशः शिवाम् ॥ ७६ ॥

सध्यासु तिसृषु प्रोक्तक्रमान्नीराजनं तथा ।

कुर्यात् त्रिरात्रं द्विगुणं त्रिगुणं काम्यरूपतः ॥ ७७ ॥

राज्ञां वैरिविरोधेन पुरीमात्रावशेषिते ।

विभवे मण्डपे तस्य प्रोक्तवजं लिखेन्महत् ॥ ७८ ॥

दरदेनार्चयेत्तस्य मध्ये देवीं शुचिस्मिताम् ।

नृगीतादिभीः सार्द्धं सन्ध्यासु च विशेषतः ॥ ७९ ॥

एवं प्राग्वद्दिनैरुक्तैर्विजयी नृपतिर्भवेत् ।

वैरिनाशेन वा तस्य भङ्गाद्यसनतोऽपि वा ॥ ८० ॥

ततस्तन्मार्जयित्वा तु भाले कृत्वा पुरीं बलैः ।

प्रतीया(परीया)द्देशिकं त्वग्रे गजे जिवेच्चिरं सुखी(म्) ॥ ८१ ॥

निःसपत्नो निरातङ्कः षडङ्गः ख्यातवैभवः ।

एवमेतस्य वज्रस्य वैभवं कोनु वर्णयेत् ॥ ८२ ॥

अथान्यद्वज्रनिर्माणं विधानं च शृणु प्रिये ।

येन हस्तगतेन स्युः सिद्धयोऽपि स्वहस्तगाः ॥ ८३ ॥

प्राक्प्रत्यग्दक्षिणोदक्च दशसूत्राणि पातयेत् ।

तेनैकाशीतिकोष्ठानि जायन्ते त(च्च)वच्च पूर्ववत्॥ ८४ ॥

मार्जयेद्दशकोणेषु शिष्टेषु विलिखेत्तथा।

त्रिकोणानि चतुर्दिक्षु तेषु ता(न्येव)

वच्च पूर्ववत्॥ ८५॥

विलिखेदवषिष्टेषु मन्त्रार्नास्तद्विशस्तथा।

एकस्मिन्मध्यमे शक्तिः जठरे साध्यमालिखेत्॥ ८६ ॥

एतच्च पूर्वमुक्तेषु विनियुञ्ज्यान्निजेच्छया।

न भेदस्त्वनयोरस्ति प्रयोगेषु तु सर्वतः॥ ८७ ॥

एतद्वज्रस्य मध्यस्थं नाम कृत्वा महिभुजः।

दशके हृदये शीर्षे संस्थाप्य समरे कृते॥ ८८ ॥

निहत्य वाहिनीं शत्रोश्चतुरङ्गां महीभुजः।

अक्षतारगसर्वाङ्गो यशोलक्ष्मीधनान्वितः॥ ८९ ॥

निर्वर्त्य सुचिरं जीवेद्भोगी भूमौ निजेच्छया।

एतत्ताम्रतले कृत्वा स्थापयेदभिवृद्धये॥ ९० ॥

विधाय वृत्तयोर्मध्ये षट्कोणं तस्य मध्यतः।

बाह्ये कृत्वा च विद्याया बीजमाद्यमथान्तिम्॥ ९१ ॥

षटसु कोणेषु तु पुनरग्रपश्चिमयोर्लिखेत्।

एकैकं पार्श्वकोणेषु द्वे द्वे वृत्तान्तरा पुनः॥ ९२ ॥

मातृकां विलिखेदादिक्षान्तां बिन्दुसमन्वितम्।

मध्यबीजस्य मध्यस्थं लिखेत्तं निजवाञ्छितम् ॥ ९३ ॥

भर्तुर्दमनभीतानां कुमारीणामिदं भुजे ।

कण्ठे वा धारयेत्सद्यो वल्लभा तस्य जायते ॥ ९४ ॥

स्वरप्रसारितैर्मन्त्रवर्णैः पद्मानि कारयेत् ।

वृत्ताष्टपत्रयुक्तानि षोडशानि मनोहरम् ॥ ९५ ॥

कर्णिकासु च पत्रेषु लिखेदेकैकमक्षरम् ।

कर्णिकार्णस्य मध्यस्थं कुर्यान्नाम निजेप् सितम् ॥ ९६ ॥

घटिकाक्षरसंयुक्तं विनियुञ्ज्यात्तु नित्यशः ।

अहोरात्रं षोडशधा कृत्वा तां तेषु योजयेत् ॥ ९७ ॥

समस्तं वाञ्छितं तत्तत्तन्मध्ये विलिखेत्तदा ।

धारयेदभिषिञ्चेच्च ज(युर्ज)

पेदिष्टार्थसिद्धये ॥ ९८ ॥

प्राक्प्रत्यक्दक्षिणोदक् च पञ्च सूत्र निपातनात् ।

कोष्ठानि षोडशानि स्युस्तेषु पद्मानि कारयेत् ॥ ९९ ॥

प्रागुक्तेषु विधायैवमर्चयेद्यामतः क्रमात् ।

देवीं तु स्थापयेद्भूमौ सर्वसम्पदवाप्तये ॥ १०० ॥

पायुतत्वमयी व्याप्तिरिति सम्यक् समीरिता ।

अस्या निष्फालनाच्चित्ते तत्तत्त्व स्वात्मसात्कृतम् ॥ १०१ ॥

इति श्रीषोडशनित्यातन्त्रेषु श्रीकादिमते द्वादशपटलं परिपूर्णं परामृष्टम् ॥ १२ ॥

अथ त्रयोदशपटलम्

अथ षोडशनित्यासु या प्रोक्ता त्वष्टमी तदा ।

तद्विधानं शृणु प्राज्ञ समीहितफलप्रदम् ॥ १ ॥

विद्योद्धारः कृतः पूर्वमथ न्यासक्रमं तथा ।

तदावरणशक्तिश्च तद्ध्यानं तत्प्रपूजनम् ॥ २ ॥

तत्साधनं तत्प्रयोगान् होमयन्त्रादिभिस्तथा ।

प्राणप्रतिष्ठां विद्यां च तद्विधानं च तत्फलम् ॥ ३ ॥

क्रमेण वक्ष्ये संप्रोक्तान्यशेषेण महेश्वरि ।

यैर्मन्त्रैर्भुवने ख्यातो निग्रहानुग्रहक्षमः ॥ ४ ॥

कुर्यात् प्राग्वत् षडङ्गानि विद्याद्येनोक्तमार्गतः ।

तेनैव पुटितैरर्णैर्न्यसेच्छ्रोत्रादिपञ्चसु ॥ ५ ॥

षष्ठं मनसि विन्यस्य व्यापकं विद्यया न्यसेत् ।

प्राग्वदर्घ्यं समुद्दिष्टं तच्छक्ती शृणु पार्वति ॥ ६ ॥

विह्वला कर्षणि लोला नित्या मदनमालिनी ।

विनोदा कौतुका पुण्या पुराणा चतुरस्रगाः ॥ ७ ॥

वागीशा वरदा विश्वा विभवा बिघ्नकारिणी ।

वीरा विघ्नहरा विद्येत्युक्ता यन्त्राष्टशक्तयः ॥ ८ ॥

सुमुखी सुन्दरी सारा समरा च सरस्वती ।

समया सर्वगा सिद्धेत्युक्ता अष्टास्रशक्तयः ॥ ९॥

डाकिन्याद्याः षड्स्रेषु सर्वास्त्वग्रात्प्रदक्षिणम्।

मूलदेवीसमाकारवर्णायुधसमन्विताः॥ १० ॥

शिवां वाणीं दूरसिद्धां त्यैविग्रहवतीमपि।

नादां मनोमथीं षट्सु पत्रेषु परितोऽर्चयेत्॥ ११ ॥

इच्छाज्ञानकिर्याशक्ती स्त्रिषु कोणेषु पूजयेत्।

मध्ये देवीं हेतिवृत्तां उजयेदष्टमीं शिवाम्॥ १२ ॥

तस्या ध्यानं शृणु प्राज्ञे यन्मयं विश्वमीरितम्।

तथापि भक्तसन्त्राणहेतोः क्लृप्तां परां तनुम्॥ १३ ॥

निदाघकालमध्याह्नदिवाकरसमप्रभाम्।

नवरत्नकिरीटां च त्रीक्षणामरुणाम्बराम्॥ १४ ॥

नानाभरणसम्भिन्नदेहकान्तिविराजिताम्।

शुचिस्मितमष्टभुजां स्तूयमानां महर्षिभिः॥ १५॥

पाशं खेटं गदां रत्नचषक वामबाहुभिः।

दक्षिणैरङ्कुषं खड्गं कुठारं कमलं तथा॥ १६ ॥

दधानामाधुकाभीष्टदानोद्यमसमन्विताम्।

ध्यात्वैवं पूजयेद्देवीं दूतीं दुर्नीतनाशिनीम्॥ १७ ॥

बृत्तद्वयं बहिस्त्र्यस्त्रं तद्द्वयं षाद्लाम्बुजम्।

तथा षडस्रमष्टास्त्रं तद्वदष्टदलाम्बुजम्॥ १८ ॥

भुपुरे वह्निवासिन्या कृत्वा तन्मध्यगां शिवाम्।

आवाह्याभ्यर्च्य ताः शक्तीः प्रागुक्तविधिना स्थिताः॥ १९॥

जप्त्वा हुत्वा नमस्कृत्य स्वात्मन्युद्वासयेत्तथा।

साधनं चोक्तमार्गेण कुर्याल्लक्षमतन्द्रितः॥ २०॥

काम्यहोमविधिं देवि शृणु सङ्कल्पसिद्धिदम्।

येनासौ वाञ्छितं क्षिप्रमवाप्नोति सुनिश्चितम्॥ २१॥

वशयेद्वनितां होमाद्गुग्गुलैर्मधुमिश्रितैः।

नालिकेरफलोपेतैर्गुडैर्लक्ष्मीमवाप्नुयात्॥ २२॥

तथाह्यसिक्तैः कह्लारैः क्षीराक्तैररुणोत्पलैः।

त्रिमध्वक्तैश्चम्पकैश्च प्रसूनैर्बकुलोद्भवैः॥ २३॥

मधूकजैः प्रसूनैश्च हुतैः कन्यामवाप्नुयात्।

पुन्नागजैर्हुतैर्वस्त्राण्याहैरिष्टमवाप्नुयात्॥ २४॥

माहिषैर्माहिषानाह्यै राज्यैर्गव्यैश्च गास्तथा।

अवाप्नोति हुतैः साज्यै रत्नै रत्नं च साधकः॥ २५॥

शालिपिष्टमयीं कृत्वा पुत्तलीं सितसंयुताम्।

हृद्देशन्यस्तनाभार्णां पचेत्तैलाज्ययोर्निशि॥ २६॥

तामनश्नन् दिवा रात्रौ विद्याजप्तां तु भक्षयेत्।

सप्तरात्रप्रयोगेन नरो नारी नृपोऽथ वा॥ २७॥

दासवद्वशमायाति वित्तप्राणादिमर्पयेत्।

हयारिपुष्पैररुणैः सितैर्वा जुहुयात्तथा ॥ २८ ॥

त्रिसप्तरात्रान्महतीमवाप्नोति श्रियं नरः ।

छागमांसं त्रिमध्वक्तैर्होमात्स्वर्णमवाप्नुयात् ॥ २९ ॥

क्षीराक्तैः सस्यसम्पन्नां भुवमाप्नोति मण्डलात् ।

पद्माक्षैर्हवनाल्लक्ष्मीमवाप्नोति त्रिभिर्दिनैः ॥ ३० ॥

अथ यन्त्राणि वक्ष्यामि नानाभीष्टप्रदानि तैः ।

शृणु तेषु विधानानि समाहितमनां शिवे ॥ ३१ ॥

तृतीनित्याक्षरेषु स्युरनावृत्तानि वे दश ।

तैः षोडशस्वरयुतैः षष्ट्याशतमुदीरितैः ॥३२ ॥

चतुरस्रद्वयं कृत्वा तदन्तर्वृत्तयुग्मकम् ।

तदन्तरष्टकोणं च तदन्तर्वृत्तयुग्मकम् ॥ ३३ ॥

कृत्वा तत्र लिखेन्मध्ये विद्यायं नाससंयुतम् ।

वृत्तयोरन्तराशेषं बहिः कोणेषु चाष्तसु ॥ ३४ ॥

लिखेद्द्वेद्वेऽक्षरे तेषु बाह्यवृत्तद्वयान्तरा ।

कर्मानुरूपान् भूतार्णान् दशभूपुरमध्यतः ॥ ३५ ॥

मातृकां विलिखेद्दिक्षु द्वादश द्वादश क्रमात् ।

अन्त्यं चतुर्षु कोणेषु शेषाणां च विलेखने ॥ ३६ ॥

स्वरैर्बिन्दुंसमायोज्य योजयेद्व्यञ्जने परम् ।

एवं यन्त्राणि जायन्ते दशसिद्ध्या स्पदानि वै ॥ ३७ ॥

प्रथमं गैरिकैः कृत्वा तत्रावाह्य शिवां यजेत्।
सप्तम्यां त्रिषु सन्ध्यासु सितापूपसमन्वितम्॥ ३८॥
कृत्वा निवेद्यं पयसः प्रातर्मध्यन्दिने तथा।
दधिभक्तन्तु सायन्तु क्षीरं मोचाफलं तथा॥ ३९॥
एवं मण्डलमर्द्धं वा कुर्यात् पूजां समाहितः।
वाञ्छितं प्राप्नुयाद्देव्याः प्रसादेनाल्पयत्नतः॥ ४०॥
द्वितीयं दरदैह् कृत्वा तत्रावाह्याथ तद्दिने।
सुपक्वं छागमांसेन क्षौद्रमन्नं निवेदयेत्॥ ४१॥
ताद्धजेन्महीपालं वशे कुर्तुमयत्नतः।
तथैव वनितां हृद्यां वशयेद्यावदायुषः॥ ४२॥
तृतीयमपि सिन्दूरैर्विधायावाह्य तत्र ताम्।
तावद्दिनं तथाऽभ्यर्च्य वशयेद्विविधान् रिपून्॥ ४३॥
चतुर्थं कुङ्कुमैः कृत्वा तत्र मध्येऽर्चयेत्तथा।
सप्ताहादापदः सर्वाः प्रयान्त्यस्याः प्रसादतः॥ ४४॥
पञ्चमं चन्दनैः कृत्वा तन्मध्ये पूजयेच्छिवाम्।
केवलं पायसं मोचां सितां घृतसमन्विताम्॥ ४५॥
निवेदय।स्त्रिसन्ध्यासु मासाद्रोगानशेषतः।
जित्वा सुखी चिरं जिवेच्छेषमायुर्निरामयः॥ ४६॥
अभिषिञ्चेच्च तत्रैव कुम्भं संस्थाप्य तैर्यजन् (जयम्)।

कृत्वा तस्मै दक्षिणां च दद्या(द्द्रव्यं)
द्भूरि स्वशक्तितः ॥ ४७ ॥
प्राणप्रदात्रे तस्मै तु दद्यात्सर्वस्वमेव वा ।
येनासौ तोषमायाति तावद्वित्तं समर्पयेत् ॥ ४८ ॥
षष्ठं कर्पूरसंयुक्तं पटीरैरालिखेत्ततः ।
मसृणे वा शिलापट्टे पीठे वा सौधभूतले ॥ ४९ ॥
अन्नाज्यं पायसापूपव्यञ्जनानि निवेदयेत् ।
पूजयेत्त्रिषु सन्ध्यासु जपन्विद्यां तथा वशी ॥ ५० ॥
त्रिसप्तरात्रमात्रेण ज्वराद्भीमाभिचारजात् ।
मुच्यन्ते प्राणिनोऽचिन्त्याः शक्तयो मन्त्रयन्त्रयोः ॥ ५१ ॥
सप्तमं ताम्रपट्टे तु कृत्वाऽऽवाह्याभिपूज्य वा ।
स्थापयेन्मन्दिरे तस्मिल्लक्ष्मीरास्तेऽतिसुस्थिरा ॥ ५२ ॥
अष्टमं राजते कृत्वा बिभृयात् सर्वसम्पदे ।
नवमं हेमगं कृत्वा भूषादौ धारयेच्छिवे ॥ ५३ ॥
दशमे सर्वकार्याणि साधयेदर्चयन् शिवाम् ।
यद्यद्धि वाञ्छितं कार्य्यं तत्तन्मध्यगतं तथा ॥ ५४ ॥
कृत्वा तां पूजयेत्तत्र तत्कार्यं हृदये स्मरन् ।
तद्दिनैस्तदवाप्नोति नात्र कार्या विचारणा ॥ ५५ ॥
दशैव तानि यन्त्राणि भूर्जे कृत्वाऽभिपूज्य च ।

सि ।हृथनिर्मितपात्रस्थक्षौद्रमध्ये निवेश्य तत् ॥ ५६ ॥

त्रिसन्ध्यमर्चयेद्रक्तगन्धपुष्पैः समाहितः ।

साध्यस्याभिमुखो विद्यां जपन्नित्थमनुस्मरन्(रेत्) ॥ ५७ ॥

पाशेन कण्ठमाबध्य यान्ति(पाति)

तं निजपादयोः ।

न्यस्ताञ्जलिकरं शीर्षे दासोहमितिवादिनम् ॥ ५८ ॥

त्रिसप्तरात्राद्वश्याः स्युर्नरनारीनृपादयः ।

तदेव कोष्णं कृत्वा च सन्ध्यासु त्रिषु नित्यशः ॥ ५९ ॥

कामार्ता वनिताः कामज्वरतप्ताशयात् शनैः ।

कुलं लज्जां विवेकं च परित्यज्यास्य किञ्कराः ॥ ६० ॥

भवेयुरिति यन्त्राणां प्रयोगास्ते समीरिताः ।

प्राणप्रतिष्ठाविद्यां ते वक्ष्येऽहं शृणु पार्वति ॥ ६१ ॥

वातोनभोधरायुक्तं स्पर्शो व्याप्तेन संयुतः ।

हवी दाहमरुद्युक्तो व्योमापि मरुता युतम् ॥ ६२ ॥

अग्निर्हेएसस्च पूर्वाणौ पस्चादादित्रयं तथा ।

ज्यावह्नियुक्तार्थोऽम्बु स्यात् षष्ठसप्तमहौ पुनः ॥ ६३ ॥

हृच्छख्यग्नियुतं माया रयगादित्रयं पुनः ।

हृदाहाम्बुचरैः स्वेन गोत्रादाहाग्निभिः परम् ॥ ६४ ॥

व्याप्तं मरुत्समोपेतं व्योमाग्निगमनन्तरम् ।

पुनराद्यत्रयं चाम्बुमरुद्द्यु नभसा युतम् ॥ ६५ ॥

Mistake in text numbering shlokas?, MM

शून्यं मायान्वितं पश्चाच्चतुर्थं पञ्चमं तथा ।

अग्निर्हंसो मरुद्युक्तो व्याप्तं च मरुता युतम् ॥ ६७ ॥

स्वं स्याद्रयधरायुक्तं हृदम्बुमरुदन्वितम् ।

हंसश्च मरुता युक्तश्चत्वारिंशल्लिपिर्मनुः ॥ ६८ ॥

यादिसप्ताक्षरैः कुर्यात् षडङ्गानि द्वियोगतः ।

त्वगादिषु च तान्येव न्यसेच्छक्तिपुटस्थितम् ॥ ६९ ॥

ध्यायेद्देवीं प्राणशक्तिमरुणामरुणाम्बराम् ।

अरुणाकल्पमुकुटामरुणाधरपल्लवाम् ॥ ७० ॥

अरुणायतनेत्राब्जयुग्मचारुस्मिताननाम् ।

प्रसूनपिण्डं पाशं च दधानां पाणियुग्मतः ॥ ७१ ॥

स्वसमानाभिरभितो वेष्टितां दशशक्तिभिः ।

अनन्तशक्तियुक्ताभिः पूजयेत्पद्ममध्यतः ॥ ७२ ॥

प्राणापानसमानाश्च व्यानोदाना च शक्तयः ।

नागा कूर्मा सककरा देवदत्ताधनञ्जया ॥ ७३ ॥

चतुरस्रद्वयं कृत्वा तदन्तर्वृत्तयुग्मकम् ।

तदन्तर्दशपत्राब्जं तदन्तस्तद्द्वयं तथा ॥ ७४ ॥

कृत्वा मध्ये समावाह्य कृतार्घ्यैः पूजयेच्च ताः ।

लक्षं जपेत्पयोभक्षस्तद्दशांशं हुनेत्तथा ॥ ७५ ॥

तिलैः सुद्धैः सर्षपैश्च सितैर्मधुरसंयुतैः ।
तर्पयेत्सौरभाद्येन जलेनत्थं सुसाधयेत् ॥ ७६ ॥
तन्त्रेऽस्मिन् यास्तु पुत्तल्यो यन्त्राण्युक्तानि सर्वतः ।
अनया विद्यया साध्य प्राणांस्तत्र नियोजयेत् ॥ ७७ ॥
यन्त्र मस्याः शृणु प्राज्ञे सद्यः प्रत्यकारकम् ।
येन पुत्तलिका जीवस्पन्दयुक्ता मनोर्बलात् ॥ ७८ ॥
प्राक्प्रत्यक्दक्षिणोदक्च सूत्राण्यष्टौ निपातयेत् ।
कोष्ठान्येकोनपञ्चाशज्जायन्ते तेषु विन्यसेत् ॥ ७९ ॥
प्रागुत्तरं समारभ्य परितोपि प्रवेशतः ।
शिष्टेषु मध्यनवसु लिखेदङ्गादितः क्रमात् ॥ ८० ॥
ततः शिष्टद्वये साध्यनामालिख्याथ साधकम् ।
सञ्जप्य विद्यां हस्तेन सजीवेन स्पृशन् शतम् ॥ ८१ ॥
तेन पुत्तलिकाः कुर्यात्सिद्धये नान्यथा भवेत् ।
साध्यजीवाद्यानयनं शृणु वक्ष्यामि तेऽद्भुतम् ॥ ८२ ॥
मन्त्रवीर्यं स्मृतिं कुर्वन् तया तद्देहगर्भतः ।
ज्ञानकर्मेन्द्रियाण्यर्थान् भनोजीवं तनुं तथा ॥ ८३ ॥
तस्मात्साध्यशरीरान्तात्पुत्तल्या नामभिस्तथा ।
रक्तरज्ज्वाशक्तिमध्या(ध्या) तान्यानीयार्पयेद्धिया ॥ ८४ ॥
विद्यायास्त्र्यक्षरान्तेषु साध्यनामानि योजयेत् ।

एवं नियोजितां विद्यां सहस्त्रं प्रजपेत्स्पृशन्॥ ८५॥

जीवहस्तेन(म)

तच्चित्ते निशामध्येषु साधकः।

एवं संस्थापितप्राणा पुत्तली स्पन्दतेऽब्दतः॥ ८६॥

सध्यस्य जन्मनक्षत्राण्याकर्णय वदामि ते।

तज्जन्मलग्नसञ्जातनवां(ष्ट)

शर्क्षप्रधानकम्॥ ८७॥

अन्यानि च नवर्क्षाणि नवग्रहसमन्वयात्।

तेषु तेषु प्रयोगेषु वक्ष्याम्यपरहोमके॥ ८८॥

रिपोर्नकञ्च केशञ्च चरणोत्थं रजस्तथा।

अन्यानि चाङ्गरोमाणि पुत्तल्यां योजयेन्मृतौ॥ ८९॥

वश्यादिषु च सर्वत्र पुत्तल्यं प्रोक्तया तया।

एवं सर्वं समाख्यातं प्राणाकर्षणकर्म ते॥ ९०॥

अनया विद्यया कृत्वा प्राणाकर्षणमुक्तया।

ततोनिर्दिष्टपुत्तल्यां तत्र तत्रोक्तमाचरेत्॥ ९१॥

सर्वत्र मारणे प्रोक्ते साध्यर्क्षग्रहसंस्थितम्।

उक्तानां तु न वर्क्षाणं तथैवाष्टकवर्गकम्॥ ९२॥

दशास्थितिं च संवीक्ष्य कुर्यान्मारणमात्मवान्।

अनवेक्ष्य कृतं कर्म स्वात्मानं हन्ति तत्क्षणात्॥ ९३॥

ब्राह्मणं धार्मिकं भूपं वनितामास्तिकं नरम् ।
वदान्यं सदयं नित्यमभिचारे न योजयेत् ॥ ९४ ॥
योजयेद्यदि वैरेण प्रत्यगेनं निहन्ति तत् ।
अभिचारस्य विषयानाकर्णय वदामि ते ॥ ९५ ॥
पापिष्ठान्नास्तिकँ आश्विरान् देवब्राह्मणनिन्दकान् ।
प्रजानां धातकान् सर्वक्लेशकर्मसु संस्थितान् ॥ ९६ ॥
क्षेत्रवित्तधनस्त्रीणामाहर्तारं कुलान्तकम् ।
निन्दकं समयानां च पिशुनं राजघातकम् ॥ ९७ ॥
विषाग्निक्षुरशस्त्राद्यैर्हिंसकं प्राणिनां सदा ।
नियोजयेन्मारणेषु कर्मस्वेतैर्न पातकी ॥ ९८ ॥
कृत्वाऽऽशु मारणं कर्म तदन्ते स्वधनार्द्धतः ।
पादतोवा गुरुं विप्रानाराध्य स्वेन नित्यया ॥ ९९ ॥
अभिषिंच्य ततोविद्यां जपेल्लक्षं हविष्यभुक् ।
जन्मत्रये प्यब्दमात्रमभिषेकं समाचरेत् ॥ १०० ॥
सदूर्वाहोममब्दन्तु तत्पापैरेष मुच्यते ।
एतत्ते कथितं सर्वं दूतीनित्याविधानकम् ॥ १०१ ॥
इति श्रीषोडशनित्यातन्त्रेषु श्रीकादिमते त्रयोदशपटलम् ।

## अथ चतुर्दशपटलम्

अथ षोडशनित्यासु नवमी या समीरिता।
प्रोक्तैव त्वरिता विद्या प्रगेव द्वादशाक्षरा॥ १॥
तद्विधानं शृणु प्राज्ञे होम तन्त्रादिभिः सह।
येन मन्त्री मन्माथाभो विक्षोभ्यति भूतलम्॥ २॥
विद्याचतुर्हवर्णादिसप्तभिस्त्वक्षरैस्तथा।
कुर्यादङ्गानि युग्मार्णैः षट्क्रमेण जराङ्गयोः॥ ३॥
शिरोललाटकण्ठेषु हृन्नाभ्याधारके तथा।
ऊर्विर्जान्वोर्जङ्घयोश्च पादयोश्च क्रमेण वै॥ ४॥
द्वितीयोपान्त्यमध्यस्थैर्मन्त्रार्णैरितरैर्न्यसेत्।
ताराद्यैः शृणु तद्ध्यानं तच्छक्तीस्तत्प्रपूजनम्॥ ५॥
श्यामवर्णां शुभाकारां नवयौवनशोभिनीम्।
द्विद्विक्रमादष्टनागैः कल्पिताभरणोज्ज्वलाम्॥ ६॥
ताटङ्कमङ्गदं तद्वद्रशनानूपुरान्वितैः।
विप्रक्षत्रियविट्शूद्रजातिभिर्भीमविग्रहैः॥ ७॥
पल्लवांशुकसंवीतां शिखिपुच्छकृतैः शुभैः।
वल्यैर्भूषितभुजां माणिक्यमुकुटोज्ज्वलाम्॥ ८॥
बर्हिर्बर्हकतापीडां तच्छत्त्रां तत्पताकिनीम्।
गुञ्जागुणलसद्वक्षःकुचकुङ्कुममण्डनाम्॥ ९॥
त्रिनेत्रां चारुवदनां मन्दस्मितमुखाम्बुजाम्।

पाशाङ्कुशवराभीतिलसद्भुजचतुष्टयाम् ॥ १० ॥

ध्यात्वैवं तोतलां देवीं पूजयेच्छक्तिभिर्वृताम् ।

तदग्रस्थां च स्फाट्कारीं शरचापकरोज्ज्वलाम् ॥ ११ ॥

प्रसादे फलदाने च साधकानां त्वरान्विताम् ।

यतः सा त्वरितेत्युक्ता मायानित्या नवम्यसौ ॥ १२ ॥

कृष्णवर्णोगदापाणिर्वर्वरोर्द्धशिरारुहः ।

किङ्करश्चाग्रतस्तस्याः पूज्यः सर्वार्थसिद्धये ॥ १३ ॥

तद्वारपार्श्वयोः पूज्ये जयाविजयसंज्ञिके ।

शक्ती तत्सदृशे स्वर्नवेत्रवेल्लत्कराम्बुजे ॥ १४ ॥

हुङ्कारी खेचरी चण्डा छेदिनी क्षेपणी ततः ।

स्त्रीहुङ्कार्यौ क्शेमकरी लोकपालसमा इमाः ॥ १५ ॥

पूज्यः पद्माष्टपत्रेषु स्थिता मन्त्रार्णशक्तयः ।

याभिर्नित्यार्चिताभिः स्यान्नरोनारीषु मन्मथः ॥ १६ ॥

शृणु पूजाविधिं तस्या स्त्वरिताया महेश्वरि ।

प्राग्वदर्घ्यं विधायेशामष्टसिंहाङ्घ्रिके शुभे ॥ १७ ॥

आसने हेमरचिते विदध्याट्भूपुरद्वयम् ।

पश्चिमद्वारसंयुक्तं तदन्तर्वृत्तयुग्मकम् ॥ १८ ॥

तदन्तरष्टपत्राञ्जं विधायात्र परां शिवाम् ।

प्राग्वदावाह्य परितः शक्तिभिर्वेष्टितां तथा ॥ १९ ॥

मुद्रादर्शनपूर्वं तु पूजयेत्तां यथोदितम् ।
अग्रपत्राग्रके वृत्तमध्ये वाऽर्च्यौ पुरोदितैः ॥ २० ॥
किञ्करस्य बलिं दद्यादेव्यग्रे प्रागुदीरितैः ।
स्वसमानगणाकीर्णमण्डलस्थस्य भक्तितः ॥ २१ ॥
एवं पूजां विधायाग्रे जपेद्विद्यां सहस्रकं ।
शतं वा कृतहोमस्तु पूजां प्राग्वत्समापयेत् ॥ २२ ॥
ततः साधितविद्यस्तु प्रयोगानाचरेन्नरः ।
बैल्वैर्दशांशां जुहुयात्पत्राद्यैः साधने जपे ॥ २३ ॥
एवं संसिद्धमन्त्रैस्तु मन्त्रितैश्चुलुकोदकैः ।
फणिदंष्ट्रामृतानान्तु मुखे सन्ताड्य जीवयेत् ॥ २४ ॥
तत्कर्णयोर्जपेद्विद्यां यष्ट्या वा जपसिद्धये ।
सन्ताड्य शीर्षे सहसा मृतमुत्थापयेदिति ॥ २५ ॥
काम्यहोमविधिं देवि शृणु वक्ष्ये यथाविधि ।
कृत्वा योनिं कुण्डमध्ये तत्राग्नौ विदिवज्जुहुनेत् ॥ २६ ॥
तिलसर्षपगोधूमशालिधान्ययवैर्हुनेत् ।
त्रिमध्वक्तैरेकशोवा समेतैर्वा समृद्धये ॥ २७ ॥
बकुलैश्चम्पकैरब्जैः कह्लारैररुणोत्पलैः ।
कैरवैर्मल्लिकाकुन्दमधुकारिन्दिराप्तये ॥ २८ ॥
अशोकैः पाटलैर्बिल्वैर्जातीविचकिलैः सितैः ।

नवैर्नीलोत्पलैरश्वरिपुजैः कर्णिकारजैः ॥ २९ ॥

होमाल्लक्ष्मीं च सौभाग्यमायुर्वित्तं यशोनिधिम् ।

यद्याद्धि वाञ्छितं सर्वमवाप्नोति सुनिश्चितम् ॥ ३० ॥

दूर्वागुडूचीमश्वत्थं वटमारग्वधं तथा ।

सितार्कं प्लक्षजं हुत्वा रोगान्मुक्तोनरोऽचिरात् ॥ ३१ ॥

इक्षुजम्बूनारिकेलमोचागुडसितैर्हुतैः ।

अचलां लभते लक्ष्मीं भोक्ता च भवति ध्रुवम् ॥ ३२ ॥

एतैरुदीरितैराज्यमधुक्षीरप्लुतैर्हुतैः ।

एकैकैर्वनिता वश्या यावज्जीवं धादिभिः ॥ ३३ ॥

तैस्तैराज्यप्लुतः भूपा वश्याः स्युर्हवनात्प्रिये ।

क्षिरक्तैस्तैर्हुतैर्मर्त्या वशे तिष्ठन्त्यशेषतः ॥ ३४ ॥

सर्षपाज्यैर्हुनेन्मृत्युकाष्ठाग्नौ वैरमृत्यवे ।

तदक्तैर्वैरियोन्युत्थमांसैरपि च तत्कृते ॥ ३५ ॥

अक्षेन्धनाग्नी योन्युत्थक्षतहोत्पाचितं चरुम् ।

आरुष्करघृतोपेतं फणिशीर्षस्रुचा हुनेत् ॥ ३६ ॥

कृष्णांशुकशिरोवेष्ट्य खड्गपाणिश्च रोषवान् ।

निशामध्ये हुनेत्सद्यो निहन्तुं वैरिणं हठात् ॥ ३७ ॥

मृत्युकाष्ठानले तस्य फलैः पत्रैश्च होमतः ।

सप्तरात्रादरातेस्तु गजाश्वा रोगमाप्नुयुः ॥ ३८ ॥

चरुरङ्गुलजैर्होमाच्चतुरङ्गं बलं रिपोः।
सप्ताहाद्रोगदुःखार्तं भवत्येव न संशयः॥ ३९॥
एवमस्यास्तु विद्याया वैभवं कोनु वर्णयेत्।
तथापि दद्दिशा किञ्चिद्वर्ण्यते तच्छृणु प्रिये॥ ४०॥
अथ यन्त्राणि वक्ष्यामि समस्ताभीष्टसिद्धये।
तानि सर्वाणि देवेशि कुरु चित्ते क्रमेण वै॥ ४१॥
प्राक्प्रत्यक्दक्षिणोदक्ँह सूत्रानि द्वादशार्पयेत्।
तदग्राण्यभितः कुर्यात्त्रिशिखान्यस्य मध्यगे॥ ४२॥
कोष्ठे तारस्य मध्यस्थ नाम कृत्वा शिवादिषु।
प्रादक्षिण्यप्रवेशेन द्वादशावृत्ति मायया॥ ४३॥
विद्यामालिख्य सञ्जप्य बिभृयात् सर्वसिद्धये।
श्रियै कीर्त्यै च वश्याय सौभाग्यायाखिलाप्तये॥ ४४॥
विषग्रहदोन्मादशान्त्यै युद्धे जयाप्तये।
नरनारीनृपादीनां वश्याय बिभृयाच्च तत्॥ ४५॥
प्राक्प्रत्यक् दक्षिणोदकच नव सूत्राणि पातयेत्।
जायन्ते च चतुःषष्टिकोष्ठानि परमेश्वरि॥ ४६॥
तेषु सर्वनिर्ऋत्यादि लिखेल्लक्ष्मीमनुक्रमात्।
बहुस्तूर्णक्षैररन्ते वषद्युक्तैस्तु (पूजयेत्)
वेष्टयेत्॥ ४७॥

अनुग्रहं महाचक्रं विद्यां शृणु महेश्वरि ।

सर्वतोभद्रविन्यासानुष्टुभं सर्वसिद्धिदम् ॥ ४८ ॥

दाहवह्नियुतं चाद्य वियद्भून्मरुता ततः ।

नभश्च मरुतोपेतं व्याप्तं तेन समन्वितम् ॥ ४९ ॥

एतान्येव विलोमानि प्रथमं चरणं भवेत् ।

द्वितीयाद्यं द्वितीयं स्याद्भुवा शून्यं द्वितीयकम् ॥ ५० ॥

तृतीयं तच्चतुर्थं स्याज्ज्या (तु) च साभ्रचरा ततः ।

प्रतिलोमं तथैतेषं द्वितीयं चरणं भवेत् ॥ ५१ ॥

तृतीयतुर्यौ परत इला वन्ह्या ततस्त्विला ।

मरुद्युता प्राग्वदेतत्प्रतिलोमं तृतीयकम् ॥ ५२ ॥

चतुर्थं द्वादशं विश्वं तत्पूर्वं ते विलोमगाः ।

एतच्चतुर्थं चरणं श्रीविद्यायां महेश्वरि ॥ ५३ ॥

सर्वतोभद्ररूपैषा विद्या सर्वार्थसाधिका ।

यत्र स्थिताऽसौ चक्रस्था न तत्राशुभसङ्कथा ॥ ५४ ॥

दशसूत्रनिपातेन कृत्वैकाशीति(सं)कं पदम् ।

तन्मध्यकोष्ठे (दावस्थं कृत्वा) मध्यस्थे दावे नामास्य वीथिषु ॥ ५५ ॥

लिखेद्वर्णचतुर्थं तत् (ष्कंतु) शृणु भद्रे यथाविधि ।

ज्याधरास्वैर्मायया हृत्ततोऽम्बु स्पर्शगा इला ॥ ५६ ॥

ततः श्रियो लिखेद्विद्यां शिवरक्षोदिगादिकाम् ।

प्राग्वत्तूर्णामृतार्णैस्तैर्वेष्टयेद्वृद्धियोजितैः ॥ ५७ ॥

ततऽम्बु स्वयुतं येन मा(ला)

याकलितरूपिणा ।

वृत्तद्वयेन निष्पाद्य कुम्भं पद्माधरोत्तरम् ॥ ५८ ॥

कृत्वा स्वर्णादिसूत्रेषु सम्पूज्याभ्यर्च्य तत् पुनः ।

स्थापयेज्जपसंसिद्धिं तेषु पूर्वोदितेषु वै ॥ ५९ ॥

तत्र लक्ष्मीरतिस्फीता नीरोगाश्च प्रजास्तथा ।

गजाश्वा पशवस्त्वन्ये प्राणिनः सुखिनोऽनिशम् ॥ ६० ॥

भूतप्रेतपिशाचादि पीडासु विभृयादिदम् ।

अलक्ष्मीशान्तये वश्यसिद्धये सर्वसम्पदे ॥ ६१ ॥

निग्रहं शृणु देवेश् शत्रवो यस्य शक्तितः ।

स्वल्पेनैव तु कालेन भन्त्येव परासवः ॥ ६२ ॥

प्राग्वदेकाशीतिपदं कृत्वा तन्मध्यकोष्ठके ।

दाहगर्भे नाम कृत्वा तथा दिग्वीथिषु क्रमात् ॥ ६३ ॥

लिखेद्बीजचतुष्कन्तु वह्निमारुतविग्रहम् ।

यैः सद्योवैरिणः स्वीयं विमुञ्चन्ति कलेवरम् ॥ ६४ ॥

numbering switches from 64 directly to 66 in text

रसोदाहक्ष्मास्वयुतो ग्रासोदाहक्ष्मया खगः ।

प्रभा दाहक्ष्मास्वयुत हंसोदाहादिसंयुतः ॥ ६६ ॥

ईशरक्षोदिगारम्भात्पङ्क्तिशोविलिखेत्ततः ।

काल्या यमस्य क्रमतो विद्यांमन्त्रमसंक्रमम् ॥ ६७ ॥

सर्वतोभद्ररूपा तु काल्यनुष्टुभमीश्वरि ।

शृणु वक्ष्यामि परतो यमानुष्टुभमीश्वरि ॥ ६८ ॥

प्राणोमरुत्समोपेत इला वन्ह्या समन्विता ।

नबो मरुद्युतं दाहश्चतुर्णां प्रतिलोमतः ॥ ६९ ॥

प्रथमं चरणं तस्य द्वितीयं शून्यमेव च ।

नभोभुवा ग्रास एतत् प्रतिलोमात् द्वितीयकम् ॥ ७० ॥

तृतीयमेकादशमं ततो गोत्रा चरान्विता ।

रयस्तेषं विलोमं च तृतीयं चरणं मनोः ॥ ७१ ॥

चतुर्थं द्वादशं विश्वं रथोबालविलोमकम् ।

चतुर्हं चरणं प्रोक्तं विद्यैषा सर्वनाशिनी ॥ ७२ ॥

व्याप्तं काली तृतीयं च मरुताम्बुसमन्वितम् ।

नाद एषां विलोमं च प्रथमं चरणं यमे ॥ ७३ ॥

एतद्वितीयतुर्यै च नभस भूश्च नादकम् ।

एतेषां प्रतिलोमं च द्वितीयं चरणो मनाः ॥ ७४ ॥

अम्बुयुक्तो मनुश्चास्मिन्नेकादशकमेव च ।

रसः क्ष्मया वह्निदाहौ प्रतिलोमात् तृतीयकम् ॥ ७५ ॥

नादो नादो दाहवह्नीरयोर्वा तदनन्तरम् ।

पर्तिलोमं तु तेषां स्याच्चतुर्थं चरणं शिवे ॥ ७६ ॥

एवं मन्त्रद्वयं कोष्टेष्वालिख्य बहिरप्यथो ।

वेष्टयेद्व्याप्तदाहाभ्यामुक्तक्रमसमन्वितम् ॥ ७७ ॥

मर्कटिदण्डिगरलैरालिप्तं स्थापितैरकम् ।

जप्तं विनिक्षिपेदक्षविवरे चत्वरेऽथ वा ॥ ७८ ॥

वल्मीके मातृभवने शास्तुरायतनेऽथ वा ।

श्मशाने प्रोक्तसमये प्रोक्तक्रमसमन्वितम् ॥७९ ॥

यत्र देशादिगं यन्त्रं तत्रालक्ष्मीगदैः समम् ।

मारीतु सुस्थिरा साध्या सर्वैः देवासुरैरपि ॥ ८० ॥

numbering goes from 80 to 80 in text

प्राग्वच्च नवभिः सुत्रैरष्टाष्टकपदं शिवे ।

कृत्वा तेष्वीशरक्षोदिगारम्भात्कालिकामनुम् ॥ ८० ॥

विलिख्य यममन्त्रेण प्रोक्तबीजद्वयेन च ।

वेष्टयित्वा बहिश्चक्रं स्थापयेत् तदधोमुखम् ॥ ८१ ॥

एतच्च पूर्वचक्रोक्तफलकृत् परमेश्वरि ।

अनुक्तेष्वपि नामानि योजयेत्कोष्ठमध्यतः ॥ ८२ ॥

लवणोषणमेहाम्बुगृहधूमाग्निसंयुत(औ)म् ।

श्मशानाङ्गारनिम्बोत्थनिर्यासो विषमीरितम् ॥ ८३ ॥

विद्याद्यवर्णजठरे साध्यमालिख्य तद्बहिः ।

अष्टच्छेदेषु फट्वर्णमालिखेदष्टवर्णकम् ॥ ८४ ॥

कर्णिकास्थं ततोऽब्जं च वेष्टयेन्मायया ततः ।

बहिः कुम्भं विदध्याच्च प्रोक्ताक्षरविधानतः ॥ ८५ ॥

एवमन्यैश्च नवभिः विद्यावर्णैर्यथाक्रमम् ।

विदध्यान्नव यन्त्राणि दशानां च फलं शृणु ॥ ८६ ॥

सर्वरक्षां जयं वश्यं नगनारीनृपादिनाम् ।

स्तम्भं लक्ष्मीयशोहेमवासांसि (च)

समवाप्नुयात् ॥ ८७ ॥

अनावृत्तान्यक्षराणि अन्तेष्वेकादशाथ तैः ।

स्वरबिन्नैर्भवेत् सङ्ख्या षट्सप्त्या शतं स्मृतम् ॥ ८८ ॥

तैर्यन्त्रकरणं तेषां फलानि च यथाक्रमम् ।

शृणु वक्ष्यामि देवेशि साधकाभीष्टसिद्धये ॥ ८९ ॥

वृत्तयोर्मध्यगां कृत्वा पद्मषोडशपत्रकम् ।

तन्मध्ये कर्णिकामध्ये शक्तिं साध्यसमन्बिताम् ॥ ९० ॥

परेषु षोडशार्नानि वेष्टयेत्तच्च मायया ।

वृत्तयोरन्तरा बाह्ये कुम्भं प्रोक्तं समालिखेत् ॥ ९१ ॥

एवमेकादशोक्तानि यन्त्राणि प्रथितानि वै ।

विनियोगानथैतेषां क्रमेण शृणु पार्वति ॥ ९२ ॥

प्रथमं हयरक्षाकृत् द्वितीयं गजरक्षकम् ।

तृतीयं नृपरक्षायां चतुर्थं दण्डरक्षकम् ॥ ९३ ॥

पञ्चमं  कुरुते राजवेश्मरक्षां तु सर्वतः ।

षष्ठं सचिवरक्षाकृत् सप्तमं पुररक्षकम् ॥९४॥

अष्टमं गृहरक्षा स्यात् सर्वेषामपि सर्वदा।

फणिचोरग्रहादिभ्यो भयेभ्यः शत्रुस्तथा॥ ९५॥

नवमं सर्वरोगार्त्तैः सर्वेषामपि सर्वदा।

उत्तारकं स्याद्देवेशि प्राक्प्रोक्तविधिना युतम्॥ ९६॥

दशमं भुर्जगं कृत्वा प्राग्वत्सिक् ।थोक्तलिङ्गकम्।

स्थापयेच्छीतले तोये घटादौ सविधेऽथ तम्॥ ९७॥

पूजयेत्तानि च जपेत् स्पृशन् जीवकरेण त(म्)

त्।

घोराभिचारकृत्यादिजातो दाहज्वरः क्षणात्॥ ९८॥

विमुच्य तं प्रयोक्तारं नाशयेत् तत्क्षणात् प्रिये।

एवमेतानि यन्त्राणि नामतः सर्वकार्यकृत्॥ ९९॥

सर्वासामपि नित्यानां प्रातरेव समृद्धये।

पूजादौ च बलिं दद्यात् षोडशार्णेन पार्वति॥ १००॥

पाणितत्त्वमयी व्याप्तिरिति सम्यक् समीरिता।

अस्या निष्हालनात्चित्ते तत्तत्वं स्वात्मसात् कृतम्॥ १०१॥

इति श्रिषोडशनित्यातन्त्रेषु श्रिकादिमते चतुर्दशं पटलम्।

अथ पञ्चदशपटलम्

अथ षोडशनित्यासु दशमी या समीरिता ।
विद्योक्ता कुलसुन्दर्यास्तस्याः पूजाविधिं शृणु ॥ १ ॥
तद्ध्यानमथ तन्न्यासं तच्छक्तिस्तत्समर्चनम् ।
तत्साधनं तथा रूपभेदान् यागांश्च वाक्प्रदान् ॥ २ ॥
लोहितां लोहिताकारशक्तिवृन्दनिषेपिताम् ।
लोहितांशुकभूशासृग्लेपनां षण्मुखाम्भुजाम् ॥ ३ ॥
प्रतिवक्त्रं त्रिनयनां तथा चारुस्मितान्विताम् ।
अनर्घ्यरत्नघटितमाणिक्यमुकुटोज्ज्वलाम् ॥ ४ ॥
ताटङ्कहारकेयूररसनानूपुरोज्ज्वलाम् ।
रक्तस्तस्तबकसम्भिन्नलसद्वक्षस्थलां शुभाम् ॥ ५ ॥
कारुण्यानन्दपरमामरुणाम्बुजविष्टराम् ।
भुजैर्द्वादशभिर्युक्तां सर्वेषां सर्ववाङ्मयीम् ॥ ६ ॥
प्रवालाक्षस्त्रजं पद्मं कुण्डिकां रत्ननिर्भिताम् ।
वसुपूर्नं सच्चषकं लुङ्गिव्याख्यानमुद्रिकाम् ॥ ७ ॥
दधानां दक्षिणेर्वामैः पुस्तकं चारुणोत्पलम् ।
हैमीं च लेखनीं रत्नमालां कम्बुवरं भुजैः ॥ ८ ॥
अभितः स्तूयमानां च देवगन्धर्वकिन्नरैः ।
यक्षराक्षसदेवार्षिसिद्धविद्याधरादिभिः ॥ ९ ॥
ध्यात्वैवमर्चयेन्नित्यं वाग्लक्ष्मीकान्तिसिद्धये ।

सितां केवलवाक्सिद्ध्यै लक्ष्म्यै हेमप्रभामपि ॥ १० ॥

धूमाभां वैरिविद्विष्ट्यै मृतये निग्रहाय च ।

नीलां च मूकिकरणे(तां) स्मरेत्त(त्त)

दपेक्षया ॥ ११ ॥

त्रिभिस्तैरुदितैर्मुल लवर्णैः कुर्यत् षडङ्गकम् ।

आदिमध्यावसानेषु पूजाजपविधौ क्रमात् ॥ १२ ॥

प्रत्येकं तैस्त्रिभिर्बीजैर्दीर्घस्वरसमन्वितैः ।

कुर्यात्कराङ्गवक्त्राणां न्यासं प्रोक्तं यथाविधि ॥ १३ ॥

ऊङ्ध्वर्प्राग्दक्षिणोदक्च पश्चिमापरनामभिः ।

शुचिन्त्यन्तरस्थैस्तैस्तदात्मसु यथाक्रमम् ॥ १४ ॥

आधाररन्ध्रहृत्स्वेतद्विद्तीयं लोचनत्रये ।

तृतीयं श्रोत्रचिबुके चतुर्थं घ्राणतालेषु ॥ १५ ॥

पञ्चमं चांसनाभीषु ततः पाणिपदद्वये ।

मूलमध्याग्रतोन्यस्येन्नवधा मूलवर्णकैः ॥ १६ ॥

भाषा सरस्वती वाणी संस्कृता प्राकृता परा ।

खड्गरूपा वित्तरूपा रम्याप्यानन्दकौतुके ॥ १७ ॥

एता एकादश प्रोक्ता नवयोनिषु पूजयेत् ।

बहिरष्टच्छदाम्भोजे  ब्राह्मयाद्याश्च समर्चयेत् ॥ १८ ॥

चतुरस्त्रे लोकपालान् शक्तिरूपांस्तथाऽर्चयेत् ।

इन्द्राग्नियमरक्षोभिर्वरुणानिलसोमकान् ॥ १९ ॥
ईशानं तद्विधिं प्रागाद्यष्टदिक्ष्वधरोत्तरम् ।
शक्त्यन्तैर्नामभिः प्राग्वत् पूजयेत् सर्वसिद्धये ॥ २० ॥
चतुरस्रद्वयं कृत्वा प्राक्प्रत्यग्द्वारसंयुतम् ।
तन्मध्ये वृत्तयुग्मस्थं कुर्यादष्टच्छदाम्बुजम् ॥ २१ ॥
चतुस्त्रिपञ्चचत्वारिभागतोनवयोनिकम् ।
कृत्वाऽत्र समावाह्य प्राग्वत्सम्यगथार्चयेत् ॥ २२ ॥
एकादशस्वन्तशक्तौ मध्ययोनेस्तु पार्श्वयोः ।
तथैव लोकपालान्तशक्ती द्वारद्वयेऽर्चयेत् ॥ २३ ॥
विशेष एष सामान्यमन्यदर्चनमम्बिके ।
सप्ताक्षर्या बलिं दद्यात्पूजान्ते कुरुकुल्लया ॥ २४ ॥
एवं नित्यार्चनं कुर्यान्नित्यहोमं घृतेन वै ।
प्रातः सलिलपानं च कुर्याद्विद्यात्मसिद्धये ॥ २५ ॥
चन्दनोशिरकर्पूरकस्तूरीरोचनान्वितैः ।
काश्मीरकालागुरुभिर्मृगस्वेदमदैरपि ॥ २६ ॥
आलिप्तगात्रो हृष्टान्तःकरणोमौनमास्थितः ।
चित्रभूषाम्बरः स्रग्वी जपेद्विद्यां निशामुखे ॥ २७ ॥
पूजयेच्च शिवामेतैर्गन्धैः सर्वार्थसिद्धये ।
सर्वाभिरपि नित्याभिः प्रातर्मातृकया समम् ॥ २८ ॥

त्रिजप्ताभिः पोबेत्तोयं तथा वाक् ।सिद्धये  शिवे ।

अन्यैरपि च मन्त्रैस्तैर्विद्याभिस्ततत्प्रसिद्धयति ॥ २९ ॥

प्राग्वल्लक्षत्रयं जप्त्वा तद्दशांश च तर्पयेत् ।

सुगन्धिसलिलैर्होमं तात्वत्तृमधुराप्लुतैः ॥ ३० ॥

पालाशपुष्पैर्विकचैरदुष्टैरविखण्डितैः ।

सिद्धविद्या पुनः कुर्यात्काम्यकर्माणि साधकः ॥ ३१ ॥

देव्या वर्णविभेदेन फलभेद्यः समीरिताः ।

विद्यास्वरूपभेदाँस्तु शृणु वक्ष्ये यथाविधि ॥ ३२ ॥

त्रयीमयत्वं विद्याया स्तथा व्यञ्जनसङ्गमात् ।

वाच्यवाचकरूपस्य प्रपञ्चस्यामितात्मनः ॥ ३३ ॥

कारणत्वं परात्मत्त्वममेयत्वं च वै क्रमात् ।

कथयामि शृणु प्राज्ञे विधिविस्तरवैभवाः ॥ ३४ ॥

अकारादिः सामवेदो ऋग्वेदश्च तदादिकः ।

यजुर्वेद इकारादिस्तेषां संयोगतः शुचिः ॥ ३५ ॥

तन्निष्पत्तिं शृणु प्राज्ञे प्रोक्तं पूर्वापरक्रमात् ।

विलिख्य योजयेत्पूर्वं शब्दशास्त्रानुसारतः ॥ ३६ ॥

गुणसन्ध्या ऋग्यजुषां ततस्तेनापरं तथा ।

वृद्धिसन्ध्या समायुज्यादित्युत्पन्नं शुचेर्वपुः ॥ ३७ ॥

तेन त्रयीमयीविद्याकार्यकारणयोगतः ।

आद्यक्षरप्रसूतानि सर्वाण्यन्यानि येन वै ॥ ३८ ॥

मध्यमार्णगतप्राणा व्यञ्जनादेस्तु मातृका ।

प्राग्वत्कारणकार्यत्वयोगाद्वाचकरूपकम् ॥ ३९ ॥

तदर्णकरसायोगा भूतादित्वेन वाच्यता ।

इति वाचकवाच्यत्वरूपाद्विश्वात्मतोदिता ॥ ४० ॥

परारूपं तृतीयेन त्रिंश(तो)

वोक्तं त्रिकात्मकम् ।

एवमेषा विश्वमयी विद्यारूपभिदाः शुभाः ॥ ४१ ॥

शुचिराद्या वाक्स्वरूपा द्वितीया वह्निरीरिता ।

बिन्दुसर्गात्मनोरैक्यरूपा सात्वावयोर्वपुः ॥ ४२ ॥

तेन बीजेन विश्वात्मरूपा सा सम्यगीरिता ।

वनं तृतीयमाख्यातं मायया स्वेन वा युतम् ॥ ४३ ॥

एषा त्रैपुरकंदा स्यात्सङ्केतेति निगद्यते ।

ज्ञातृज्ञानज्ञेयदोस्षगुणतेजस्त्रयात्मिका ॥ ४४ ॥

अस्यास्तु मध्यमे बीजे रसाप्राणनियोजनात् ।

वाच्यवाचकरूपात्मा प्रपञ्चस्य हि कारणे ॥ ४५ ॥

तृतीये हृत्समायोगात् त्रिकविश्वात्मतोदिता ।

हंसहृद्योगस्तेषु जङ्गमा स्थावरा त्मता ॥ ४६ ॥

एकद्यादिसमायोगाद्व्यञ्जनानां तथा त्रिषु ।

ज्ञातुं न शक्यते संख्या विद्यानां परमेश्वरि ॥ ४७ ॥

एवं साऽननन्तविभवा तां निःशेषं वदेत्कथम् ।

तथापि भक्तसन्त्राणहेतोः काञ्चन वच्मि ते ॥ ४८ ॥

आयुर्लक्ष्मीकीर्तिभोगसौन्दर्यारोग्यदायिका ।

एहिकामुष्मकज्ञानमयी सकलसिद्धिदा ॥ ४९ ॥

विद्यायाः कुलसुन्दर्या हंसयोगात्तृषु क्रमात् ।

विजयाख्या महाविद्या विश्वसंत्राणतत्परा ॥ ५० ॥

हृत्समायोगतस्तेषु जीवाख्या विश्वचिन्मयी ।

द्वयोर्नियोजनात्तेषु जायते (सा) आवयोर्वपुः ॥ ५१ ॥

हृदादिस्त्वन्मयी विद्या हंसादिर्मन्मयो मनुः ।

तेषु दाहसमायोगाद्विश्वाख्या विश्वविग्रहा ॥ ५२ ॥

प्रत्येकं शक्तिपुटिता विद्या विश्वविमोहिनी ।

खेचराम्बुरसोपेतमायाभ्यां पुटिता तु सा ॥ ५३ ॥

त्रिपुरामृतसंज्ञा सा सर्वाप्ययन विग्रहा ।

मायाद्या मोहिनी प्रोक्ता तन्मध्या क्षोभिणी मता ॥ ५४ ॥

तदन्ता क्लेनिदीख्याता वातादिस्यान्महोदया ।

त्रयोदशेति कथितात्रिपुर(रिनम)विधयः स्मृताः ॥ ५५ ॥

आसां क्रमविपर्यासजाताविद्याष्टसप्ततिः ।

तासां विधानं ते प्रोक्तमशेषं लक्षसागरे ॥ ५६ ॥

सम्पत्करीति काप्यस्ति विद्या साऽचिन्त्यवैभवा।

तां वक्ष्ये शृणु देवेशि साधाभीष्टसिद्धये॥ ५७॥

प्राणोरसामरुद्वह्निस्वयोगादाद्यमीरित(अ)

म्।

वातेन च चरस्वाभ्यां द्वितीयमपि पार्वति॥ ५८॥

हंसहृद्घनमायाभिस्तृतीयं परमेश्वरि।

एवं त्रिवर्णा सा विद्या विधानं चाथ कथ्यते॥ ५९॥

तृतीयबीजेनाङ्गानि दीर्घस्वरयुजा क्रमात्।

कुर्यात्कराङ्गयोः प्राग्वदित्थं  ध्यायेच्च तां ततः॥ ६०॥

दाडिमीकेसरप्रख्यदेहवासोविभूषणाम्।

चतुर्भुजां त्रिनयनां प्रसन्नस्मेरवक्त्रकाम्॥ ६१॥

रत्नाभिषेकसम्पन्नामाष्टपत्राब्जमध्यगे।

त्रिकोणे स्वस्तिकासीनां करुणानन्दमन्दिराम्॥ ६२॥

प्रवालाक्षस्रजं रत्नचषकं रत्नपूरितम्।

पुस्तकं च वरं(दं) हस्तैर्दधानां सर्वमङ्गलाम्॥ ६३॥

अकारादिसकारान्तषोडशत्रयकल्पिते।

कुलासने हलक्षार्णमध्ये तद्विद्ययाऽन्विते॥ ६४॥

समावाह्यार्घ्यसङ्कल्पूर्वं तामर्चयेत्क्रमात्।

मध्ये त्रिकोणकोणेषु रतिप्रीतिमनोभवान्(म्)

६५ ॥

आग्रादिसव्यगास्तद्वदष्टपत्रेषु मातरः ।

चतुरस्रे लोकपालान् प्राग्वच्छक्तिः समर्चयेत् ॥ ६६ ॥

विधानमष्टसप्तत्या इति सम्यक्समीरितम् ।

बलिद्वयं च होमं च प्राग्वदन्यत् समुन्नयेत् ॥ ६७ ॥

चतुर्गुणचतुर्थांशस्वसमाननियोजिते ।

ब्राह्मीरसवचादुग्धे शृतं सर्पिस्त्रिभिर्दिनैः ॥ ६८ ॥

सयन्त्रं मातृकाविद्याजप्तं त्वयुतमादरात् ।

दिनशोविलिहेत् प्रातरब्दान्मूकोभवेत् कविः ॥ ६९ ॥

शिवोऽम्बिका कुमारश्च विधिर्विष्णुस्तथा रमा ।

कुबेरोरविचन्द्रारज्ञागुरूसितसौरयः ॥ ७० ॥

वारेशास्तेषु वारेषु तांस्तु तद्दिनविद्यया ।

नामसप्ताक्षरियुक्तया पूजयेत्तर्पयेद्धुनेत् ॥ ७१ ॥

वर्णौषधिसमुत्थेन भस्मना मन्त्रितेन तु ।

मातृकान्याससहितं स्पृशेद्रक्षाकृते मनुम् ॥ ७२ ॥

विशेषतो महीपानामार्तानां च विधिं चरेत् ।

तेन ते सुखिनोभूयः सान्वया यावदायुषम् ॥ ७३ ॥

क्रूरेषु व्याधिषु प्राप्तेष्वभ्यर्च्यैवं तु मण्डले ।

नवकोष्ठेनव प्रोक्तान् राहुकेतुसमन्वितान् ॥ ७४ ॥

मध्येन्द्रयमपाशीन्द्वह्निरक्षोऽनिले(स्व)
परे।
कोष्ठेतांस्तैर्यजेत्सद्योमुक्तरोगः सुखी भवेत्॥ ७५॥
ग्रहार्त्तिषु रिपुक्लेशे दुर्भिक्षे त्रिविधे तथा।
उत्पाते समरोद्योगे कुर्यादुक्तार्चनादिकम्॥ ७६॥
सम्पूज्य तद्विदां सम्यग्दद्याद्गां स्वर्णमम्बरम्।
तेन सर्वापदुन्मुक्तः सुखी जीवति भूतले॥ ७७॥
ब्रूहि मे मातृकान्यासं तद्यन्त्रं परमेश्वरि।
कथयामि द्वयं तेऽद्य वक्ष्ये तत्पटलेऽखिलम्॥ ७८॥
ह्रस्वदीर्घस्वरद्वन्द्वपुटितैः षण्ढवर्जितैः।
कुर्यादङ्गानि षड्वर्गैः पञ्चपञ्चदशाक्षरैः॥ ७९॥
स्वरेषु मध्यतः प्रोक्ताश्चत्वारः षण्ढविग्रहाः।
कराङ्घ्र्योर्विधायेत्थं आदिक्षान्ताक्षराणि वै॥ ८०॥
भाले वक्त्रावृतौ नेत्रश्रोत्रनासाकपोलतः।
ओष्ठदन्तशिरोजिह्वास्वेकशोविन्यसेत्स्वरान्॥ ८१॥
करयोः पादयोर्मूलमध्यसन्धिष्वथाग्रतः।
विन्यसेत्चतुरोवर्गान् पञ्चमं पार्श्वपृष्ठतः॥ ८२॥
नाभौ हृदि च विन्यस्य व्यापकान् दशधातुषु।
त्वगसृङ्मांसमेदोऽस्थिमज्जाशुक्रान्तगामिषु॥ ८३॥

प्राणशक्त्यात्मसु तथा न्यसेदेवं समाहितः।
हृदयस्पर्शिनां तेषां स्मरन् धातुषु विन्यासेत्॥ ८४॥
अथवा हृदये स्कन्धयुगे च त्रिककक्षयोः।
हृदयाधस्तथापादजठरे वदने न्यसेत्॥ ८५॥
वृत्तद्वयावृतं चाष्टपत्रमब्जं महीपरम्।
विधाय विलिखेन्मध्ये हंसहृद्वनशक्तिजम्॥ ८६॥
कूटं स्वरान् केशरेषु वर्गान् पत्रेषु चालिखेत्।
पञ्चपञ्चाक्षरोपेतान् दारुचाम्बुनि दिक्षु च॥ ८७॥
स्वरेष्वपुनरुक्तानि पञ्चान्यानि तु पञ्च वै।
सव्यञ्जनाव्यञ्जनत्वभेदतोऽभूतिद्विरन्वयः॥ ८८॥
सवाताग्निधरास्वेन शक्तिस्ततत्पञ्चकं भवेत्।
अन्यान्येकादश शिवे सन्धिमात्रादि सम्भवा॥ ८९॥
एतद्यन्त्रस्य मध्यस्थं नाम कृत्वा प्रयोजयेत्।
प्रातर्मुद्भिर्नस्मरेदिन्दुबिम्बस्थं सर्वसम्पदम्॥ ९०॥
अभिषेकाद्धारणाच्च पूजनाल्लोहकलिप्ते।
स्थापनाद्गृहदेशादौ यन्त्रं सर्वार्थसिद्धिदम्॥ ९१॥
एतद्यन्त्रस्य मध्यस्था देवताः सकला अपि।
सन्निधिं फलदानं च साधकानां वितन्वते॥ ९२॥
विद्यां तान्तु नरोभूर्खो जडोमूकोऽतिपातकी।

नित्यशोजपपूजाद्यैः काले मत्समतां व्रजेत्॥ ९३॥

जिह्वायामक्षराण्येतान्यसकृद्भावयेद्धिया।

प्रविष्टोविद्वद्गोष्ठिषु यज्यन्ते वाग्मिभिर्जनैः॥ ९४॥

मूर्द्ध्वेन्दुबिम्बमध्यस्थं सुधावर्षविधायिनम्।

विभावयन्निन्त्तिमनुं जपेदेकाग्रमानसः॥ ९५॥

मण्डलात्कवितासिद्धिः सर्वभाषामयी भवेत्।

वादादिषु तु सर्वत्र देवतात्म जयी भवेत्॥ ९६॥

यन्त्राणि नित्यानित्यायाः समान्येकात्मयोगतः।

प्रयोगजातमन्योन्यं विदध्यादैक्ययोगतः ॥ ९७॥

तेनात्मनोक्तानि शिवे सर्वसिद्धिकराणि वै।

षोडशस्वपि नित्यासु यन्त्रादन्यत्समीरितुम्॥ ९८॥

वृत्तयुग्मं षडस्रं च कृत्वा मध्याद्यमध्यतः।

नामालिख्य बहिः षट्सु तत्त्रयं स्वेन मायया॥ ९९॥

विलिख्य मातृकां वृत्ते कृत्वा तद्धारणान्मुखे।

जिह्वायां भावनात् सर्वगोष्ठिष्वग्रं विगाहते॥ १००॥

वाचातत्त्वमयी व्याप्तिरिति सम्यक् समीरिता।

अस्या निष्फालनाच्चित्ते तत्तत्त्वं स्वात्मसात्कृतम्॥ १०१॥

इति श्रिषोडशनित्यातन्त्रेषु श्रीकादिमते पञ्चदशं पटलं परिपूर्णं प्रामृष्टम्॥ १५॥

अथ षोडश पटलम्।

अथ षोडशनित्यासु या प्रोक्तैकादशी तु ताम्।
नित्यानित्यां शृणु प्राज्ञे यदायत्तमिदं जगत्॥ १॥
विद्योद्धारः कृतः पूर्वं तद्विधानमिहोच्यते।
यासौ समस्तजीवानां देह स्थितिविधायिनी॥ २॥
न्यासं ध्यानं ततः शक्तीस्ताभिः पूजां च साधनम्।
यन्त्राणि वज्ररूपाणि षडाधारेषु संस्थितम्॥ ३॥
निग्रहानुग्रहौ षड्भिः कालव्याप्तीरिति क्रमात्।
दीर्घस्वरसनेताभ्यां हंसहृद्भयां षडङ्गकम्॥ ४॥
भ्रूमध्ये कण्ठहृन्नाभिगुह्याधारेषु च क्रमात्।
विद्याक्षराणि क्रमशोन्यसेद्बिन्दुयुतानि तु वै॥ ५॥
व्यापकं च समस्तेन विधाय विधिना युतम्।
ध्यायेत् समस्तसम्पत्तिहेतोः सर्वात्मिकां शिवाम्॥ ६॥
उद्यद्भास्करबिम्बाभ्यां माणिक्यमुकुटोज्ज्वलाम्।
पद्मरागकृताकल्पामरुणांशुकधारिणीम्॥ ७॥
चारुस्मितलसद्वक्त्रषट्सरोजविराजिताम्।
प्रतिवक्त्रं त्रिनयनां भुजैर्द्वादशभिर्युताम्॥ ८॥
पाशेक्षुरुणपुण्ड्रेक्षुचापखेटत्रिशूलकान्।
वहन्तीं वरदां वामैरङ्कुशं पुस्तकं तथा॥ ९॥
पुष्पेक्षु मण्डलाग्रञ्च नृकपालाभये तथा।

दधानां दक्षिणैर्हस्तैर्ध्यायेद्देवीमनन्यथा ॥ १० ॥

अनन्तः शक्तयोदेव्यास्ताश्चाकर्णय वदामि ते ।

ललिताशक्तिवृन्दोऽयं बिजद्वयमथोक्रमात् ॥ ११ ॥

पूर्णमण्डलवर्णाः स्युस्ते शक्तीति च  संयुग्ताः ।

सप्ताक्षर्या युता संज्ञा विद्याः स्युद्वादशाक्षराः ॥ १२ ॥

षट्सम्याऽपिच शतं यजेत्ताभिर्वृतां शिवाम् ।

षट्कोणकोणेष्वासीनां डाकिन्याद्यास्तथाऽर्चयेत् ॥ १३ ॥

रक्षोनिलेन्द्रवह्निशवरुणेषु क्रमाच्च ताः ।

डाकिनीं शाकिनीं पस्चाल्लाकिनीं काकिनीमपि ॥ १४ ॥

साकिनीं हाकिनीं मूले देवीसदृशविग्रहाः ।

हेतिस्तामभितः शक्तिरूपास्तन्मुकुटानताः ॥ १५ ॥

कृतन्यासार्धसङ्कल्पः पूजयेदीरितक्रमात् ।

कुर्याच्च नित्यहोमन्तु जपेद्विद्यां यथोदितम् ॥ १६ ॥

षट्कोणाद्बहिरज्वन्तशताद्धैकदलान्वितम् ।

कृत्वा तेष्वपि ताभिस्तु वृत्तां पूजासु मध्यमाः ॥ १७ ॥

द्विचतुःषट्दशदलैर्द्वादशाष्टद्वयच्छदैः ।

पद्मैरावृत्तषट्कोणे यजेल्लध्वीस्मृतार्चनात् ॥ १८ ॥

चतुरस्त्रद्वयं बाह्ये चतुर्द्वारसमन्वितम् ।

विधाय तेषु शाखासु शक्तीनां विंशति यजेत् ॥ १९ ॥

ब्राह्म्यादिलोकपालाख्याः षोडशद्वारसंस्थिताः ।
अनन्तब्राह्मनित्यतिकालरूपा विगर्हिताः ॥ २० ॥
विदध्यात्साधनं प्रागद्वर्णलक्षं पयोव्रतः ।
त्रिस्वादुसिक्तैररुणैरम्बुजैर्हवनं तथा ॥ २१ ॥
जपतर्पणहोमार्चासेकसिद्धिमनुर्नरः ।
कुर्यादुक्तान् प्रयोगँआश्च नचेत्तद्धातुदेवताः ॥ २२ ॥
प्राणँ्अस्तस्य ग्रसन्त्येव कुपितास्तत्क्षणं शिवे ।
अनया विद्यया लोके यन्न साध्यं न तत् क्वचित् ॥ २३ ॥
विद्याक्षराणि सप्त स्युस्तैः प्राग्वत्स्वरसंयुतैः ।
शतं द्वादशसंयुक्तं तैर्यन्त्राणि वदामि ते ॥ २४ ॥
वृत्तद्वयान्तः षट्कोणं तदन्तर्वृत्तयुग्मकम् ।
विधाय मध्ये मायास्थमेकमक्षरमाख्यया ॥ २५ ॥
बहिः षडालिखेत्षट्सु वृत्तयोर्भूतमातृका ।
कृत्वा नवभिरेवं स्युः क्रमाद्यन्त्राणि षोडश ॥ २६ ॥
प्रथमेन धृतेन स्यादौदरव्याधिसंहृतिः ।
द्वितीयेन शिरोरोगा नश्यन्ति परमेश्वरि ॥ २७ ॥
तृतीयेनाक्षिरुक्शान्तिः श्रोत्रजानां परेण तु ।
पञ्चमेन भुजारोगाः प्रयान्त्युद्ध्र्वेन पादजाग़् ॥ २८ ॥
सप्तमेनान्तराधिस्था धृतेन निधनाश्रयाः ।

धृतेनाष्टमयन्त्रेण ज्ञानेन्द्रियगता गदाः॥ २९॥

परेण कर्मेन्द्रियगा दशमेनानिलोद्भवाः।

एकादशेन पित्तोत्था द्वादशेन कफोद्भवाः॥ ३०॥

त्रयोदशेन दोषाणां सन्निपातसमुद्भवाः।

प्रयान्ति विलयं सद्यो यन्त्राणां शक्तिवैभवात्॥ ३१॥

चतुर्दशेन यन्त्रेण भूतप्रेतपिशाचकाः।

प्रयान्ति भीताः क्षणतः सर्वेऽन्येपि ग्रहाः शिवे॥ ३२॥

तत्परेण महारोगा धृतेनाष्टौ न बाधकाः।

षोडशेन धृतेन स्यादायुरारोग्यमीश्वरि॥ ३३॥

यन्त्राणि षोडशैतानि धारयेद्व्याधिशान्तये।

सर्वेषां प्राणिनां सम्यगनुक्तेषु गदेष्वपि॥ ३४॥

सर्वत यन्त्रधरणं साभिषेकं सदक्षिणम्।

सवंदनं सविश्वासं फलत्येवान्यथाऽन्यथा॥ ३५॥

कुर्विहीना तु सा विद्या पञ्चकूटाभिधा शिवे।

वाक्सिद्धिमन्यत्सकलं कुरुते न भिदा तयोः॥ ३६॥

तद्विद्याकूटभेदाः स्युर्विंशत्या शतसप्तकम्।

तैर्वज्रयन्त्रनिर्माणं फलानि च शृणु प्रिये॥ ३७॥

प्राक्प्रयक्दक्षिणोदक्च सूत्रान्यष्टादश क्षिपेत्।

तैस्तु कोष्ठानि जायन्ते नवाशीतिशतद्वयम्॥ ३८॥

प्राग्वत्तत्कोणकोष्ठानि षट्त्रिंशन्मार्जयेत्क्रमात् ।

मध्ये वज्रं यथा भूयात्तथा कुर्यात् समन्ततः ॥ ३९ ॥

सपञ्चचत्वारिंशत्कं शतं कोष्ठैस्तु  वज्रकम् ।

त्र्यस्राणि चत्वार्यग्राणि चतुःकोष्ठैस्तु  पूर्ववत् ॥ ४० ॥

विध्याय तस्य मध्याधःकोष्ठमारभ्य संलिखेत् ।

प्रादक्षिण्यप्रवेशेन कूट(अ स्ताना)

न्तस्याद्यखण्डजान् ॥ ४१ ॥

मध्येऽवशिष्टनवके वामदक्षत्रयद्वये ।

प्रतिलोमानुलोमात्मविद्याद्वयमथालिखेत् ॥ ४२ ॥

शिष्टेषु त्रिषु कोष्ठेषु साधकाख्यां तदूर्ध्वगे ।

कर्ममध्य्ऽधरे साध्यमालिखेदपि सर्वतः ॥ ४३ ॥

चतुस्त्रिकोणमध्यस्थं द्विरेखाभिर्नवीकृतम् ।

मध्यवद्विलिखेत्तेषु वज्रयन्त्रमितीरितम् ॥ ४४ ॥

एवमन्यैः पञ्चभिश्च खण्डैः पञ्च प्रकल्पयेत् ।

इति षट्वज्रयन्त्राणि प्रोक्तानि क्रमशः शिवे ॥ ४५ ॥

लोहत्रयक् ।ते पट्टेशिलायां वा चतुर्षु वा ।

पट्टे वा फलकायां वा षट्कं षट्सु प्रकल्पयेत् ॥ ४६ ॥

फलकापट्टयोः पूजां कुर्यान्नित्यश एव तु ।

इतराणि तु संस्थाप्य यजेत्तत्रैव तां शिवाम् ॥ ४७ ॥

ततस्थापनप्रदेशे तु विदध्यान्मण्डपं शुभम् ।

नवहस्तायामततं पताकातोरणान्वित्यम् ॥ ४८ ॥

फलपुश्पवितानाढ्यैरुपेतं परिकल्पयेत् ।

उत्सेधायामविस्तारहस्तां वेदीं च मध्यतः ॥ ४९ ॥

एवं चेत् षट्कमथ चेत्कुर्याद्विद्यादिकं तथा ।

ईशप्राग्वह्निरक्षां तु वायुदिक्षु यथाक्रमम् ॥ ५० ॥

प्रथमं राक्षसे त्वन्यान्यन्येषूक्तक्रमेण वै ।

निवेद्य गन्धपुष्पाद्यैर्नृत्यगीतादिभिस्तथा ॥ ५१ ॥

समाराध्यैवमेवस्तु त्रिदिनं प्रोक्तशक्तिभिः ।

हुत्वा जपित्वा जीवोच्चे भनूच्चे वा स्थिरोदये ॥ ५२ ॥

स्ववाम(भा)

गे भूम्युदये संस्थाप्य परमेश्वरि ।

देव्यात्मा तच्छिलाभिस्तु दृढमाबध्य तत्र वै ॥ ५३ ॥

देवीं षाड्विवृतां ताभिर्डाकिन्यादिभिरम्बिके ।

मूर्तिसप्तकसुत्पाद्य प्रतिष्ठाप्य समर्चयेत् ॥ ५४ ॥

नित्यशस्ततपुरोविद्याभजनं चापि कारयेत् ।

यत्र तत्र गदालक्ष्मीरिपुग्रहपिशाचकाः ॥ ५५ ॥

दुर्भिक्षुक्षुद्रकर्मोत्थपीडाकृत्याः प्रोरिताः ।

न कदाचित्सम्भवन्ति विद्यायन्त्रानुभावतः ॥ ५६ ॥

मङ्गलान्येव जायन्ते सर्वेषां सर्वतः सदा ।

धार्मिकास्चैव राजानः पूर्णसप्ताङ्गसंयुताः ॥ ५७ ॥

फलकापटयोः क्लृप्तपूजातोनिजमन्दिरे ।

वाञ्छितं समवाप्नोति मण्डलान्मासतोऽपि वा ॥ ५८ ॥

आसां देहस्थितिं वक्ष्ये शृणु सर्वार्थदायिनीं ।

सुषुम्नामध्यसंस्थेषु षडाधाराम्बुजेषु ताः ॥ ५९ ॥

तिष्ठन्ति प्राणिनां देव्यः सिद्ध्यन्ति ज्ञानपूजिताः ।

बहिश्च मण्डले पूजानुग्रानिग्रात्मिका(म्) ॥ ६० ॥

विशुद्ध्याख्ये कण्ठदेशे षोडशस्वरपत्रिके ।

धूम्रवर्णाम्बुये देवीं डाकिनीं तत्समाजृतिम् ॥ ६१ ॥

शक्तिभिः स्वररूपाभिरावृतां तत्र पूजयेत् ।

तया सर्वज्ञतासिद्धिर्भवत्येव न संशयः ॥ ६२ ॥

अनाहाख्ये हृद्देशे सिन्दूरारुणपङ्कजे ।

राकिनीं द्वादशदले कादिढान्ताक्षरात्मभिः ॥ ६३ ॥

शक्तिभिह् पूजयेन्नित्यं कीर्त्यायुःश्रीधनाप्तये ।

मणिपूरकसंज्ञे च नाभिस्थे दशपत्रके ॥ ६४ ॥

इन्द्रनीलनिभेडादि दशवर्णात्मशक्तिके ।

लाकिनीं पूजयेद्वैरिवि जयश्रीसमृद्धये ॥ ६५ ॥

ध्वजमूले समस्तापात्तारणायेष्टसिद्धये ।

वादिषाड्वर्णशक्तीभिरावृतां डाकिनीं यजेत् ॥ ६६ ॥

स्वाधिष्ठानाह्वये पद्मे बालार्कत्विषि षडदले ।

आधाराख्ये चतुष्पत्रे सुवर्णाभे सरोरुहे ॥ ६७ ॥

वादिशान्तार्णशक्तीभिरावृतां शाकिनीं यजेत् ।

पायुध्वजान्तरा त्र्यस्रमध्ये तेजः समन्विताम् ॥ ६८ ॥

आज्ञाख्येब्जेभ्रुवोर्मध्ये द्विदले शु(भ)द्व्यविग्रहे ।

सेवितां हक्षशतिभ्यां हाकिनीं पूजयेत्तथ ॥ ६९ ॥

त्रिकालज्ञोनरः सर्व(तो)

चिन्तालोकनकारिणीम् ।

विश्वसृष्टिस्थितिध्वंसशक्तिदामप्ययत्नतः ॥ ७० ॥

उत्तक्रमविपर्यासान्निग्रहोन्तर्बहिस्तथा ।

पूजनं सर्वदुःखार्तिनाशनं सम्पदास्पदम् ॥ ७१ ॥

भुमौ विधाय षट्कोणसप्तकं प्रोक्तदिक्क्रमात् ।

मध्ये च तत्र तां नित्यानित्या गन्धादिनाऽर्चयेत् ॥ ७२ ॥

अभितस्तत्षडस्रेषु तत्षट्कं तत्क्रमाद्यजेत् ।

बाह्येष्वपि च ताः प्राग्वत्प्रोक्तवर्णाः समर्चयेत् ॥ ७३ ॥

तासां षणामपि तद्गता षट्सु कोणेषु शक्तयः ।

षट्त्रिंशत्ताः समादेव्याः सर्वरूपायुधादिभिः ॥ ७४ ॥

प्राग्वत्स्वरेषु पञ्च स्युरपू(वा)

कादिमान्तकाः ।

परेषु यवलक्षार्णरहिता स्तैस्तथाऽर्चयेत् ॥ ७५ ॥

एषामपि च चक्राणां शक्तीनां च विलोमतः ।

पूजा निग्रहसंज्ञा स्यात् सा शत्रूणां विपत्तये ॥ ७६ ॥

ऽःअट्सु चक्रेषु षट्कुम्भान्विधायारिसहीरुहः ।

क्वाथतोयाभिसम्पूर्णान् कृष्णाम्बरसमन्वितान् ॥ ७७ ॥

अर्द्धरात्रे यजेत्तास्तु तद्योनिबलिदानतः ।

क्षिप्रं त्वगादिभिस्ते स्युः पूर्णः शत्रोः कलेवराः ॥ ७८ ॥

निवेद्यं योनिरक्तेन सम्पन्नं चरुणा रिपोः ।

होमं च कुर्यात्तेनैव फणिशीर्षस्त्रुचा रुषा ॥ ७९ ॥

ध्यायेद्देवीश्च कुपिता दष्टौष्ठा बर्हिभिर्निजैः ।

प्रहरन्तीः पिशाचेभ्योविकिरन्तीश्च तत्तनुम् ॥ ८० ॥

जयागुलुच्छविलसत्कर्णा भीमार्तनिस्वनाः ।

ध्यात्वैवं निग्रहं कुर्याद्रिपूणां मारणाय वै ॥ ८१ ॥

चक्रं च निग्रहे प्रोक्तं वजरूपं भयङ्करम् ।

कांस्ये सीसेपि वा कृत्वा स्थापयेद्वैरिभूमिषु ॥ ८२ ॥

प्राक्प्रत्यक्दक्षिणोदक् च दशसूत्रनिपातनात् ।

एकाशीतिपदानि स्युस्तेषु कोणचतुष्टये ॥ ८३ ॥

प्रत्येकं दश कोष्ठानि मार्जयेच्छिष्टवज्रकैः ।

चतुर्दिक्षु त्रिकोणानि चतुःकोष्ठैः प्रकल्पयेत् ॥ ८४ ॥

तेषु मध्यस्थकोष्ठे च साध्यं कर्म समालिखेत् ।

शिष्टेषु मध्याधःकोष्ठमारभ्य प्रतिलोमजान् ॥ ८५ ॥

विद्याकूटांस्तु षट्त्रिंशदालिखेदप्रदक्षिणम् ।

साध्ययोन्यसृजा पिष्टतद्वृक्षक्षोदलेपितान् ॥ ८६ ॥

स्थापयेत्प्रोक्तसमये रिपुक्षेत्रगृहादिषु ।

श्मशाने चण्डिकागेहे कुलोत्सादकरं भवेत् ॥ ८७ ॥

इति निग्रहमाख्यातं समस्तरिपुमर्दनम् ।

अनुग्रहं शृणु प्राज्ञे पूजाचक्रविधानतः ॥ ८८ ॥

देवीस्ताः प्रोक्तरूपास्तु ध्यात्वा चक्रेषु पूजयेत् ।

नवेद्यमासां सम्प्रोक्तं यदासां प्रीतिदायकम् ॥ ८९ ॥

पायसान्नं गुडान्नं च मुद्गभिन्नान्नकं तथा ।

हरिद्रान्नं तिलान्नं च शुद्धान्नं षटकमेव च ॥ ९० ॥

चक्रेषु सप्तसु तथा तद्वर्णाश्चारुविग्रहाः ।

युवतीः सप्त संस्थाप्य प्राग्वदभ्यर्च्य ताः क्रमात् ॥ ९१ ॥

भूषणाम्बरगन्धा सृग्भोजनाद्यैस्तु तोषयेत् ।

तासु तुष्टासु तुष्टाः स्युः शक्यस्ताः समास्तदा ॥ ९२ ॥

प्रागुक्तवज्रे साध्याख्यं तथालिख्यानुलोमजान् ।

कूटानुक्तसमारम्भान् प्रादक्षिण्येन सल्लिखेत् ॥ ९३ ॥

प्रोक्तेषु प्रोक्तरूपेण स्थापयेत् प्रोक्तभूमिषु ।

प्रोक्तान्येव फलानि स्युर्योगोऽयं लघुविग्रहः ॥ ९४ ॥

आदिक्षान्ताक्षरैः प्राग्वद्रूपिणीशक्तिसंयुतैः ।

बीजद्वयाद्यैः सप्ताक्षर्यन्तैः पञ्चदशाक्षरैः ॥ ९५ ॥

पञ्चाशच्छक्तयः पूज्याः पञ्चाशत्क्षेत्रेपालकैः ।

दिनेषु घटिकायोगात् पञ्चाशन्मिथुनान्यपि ॥ ९६ ॥

तेषां बीजद्वयं वर्णारूपक्षेत्रेशसंयुताः ।

सप्ताक्षर्या च संयुक्ता मन्त्राः पञ्चदशाक्षराः ॥ ९७ ॥

चतुःषष्टिपदे मध्ये चतुष्के दिनविद्यया ।

मनीषितं समालिख्य (रम्य)

तेषु तन्मिथुनानि वे ॥ ९८ ॥

घतिकाक्रमयोगेन ह्न्मायामध्यमर्चयेत् ।

एवं मण्डलमासार्द्धात् प्राप्नोत्येवाभिवाञ्छितम् ॥ ९९ ॥

नित्यशस्ताः समावाह्य तस्मिन् चक्रे समर्चनात् ।

समस्तवाञ्छितप्राप्तिः सदा भवति सर्वदा ॥ १०० ॥

प्राणतत्त्वमयी व्याप्तिरिति सम्यक्समीरिता ।

अस्या निष्फालनाच्चित्ते तत्तत्त्वं स्वात्मसात्कृतम् ॥ १०१ ॥

इति श्री षोडशनित्यातन्त्रेकादिमते षोडशपटलम् ॥ १६ ॥

अथ सप्तदशपटलम् ।

अथ षोडशनित्यासु द्वादशी या समीरिता ।

तस्या नीलपताकाया विधानं सर्वसिद्धिदम् ॥ १ ॥

न्यासक्रमविधानं च ध्यानं शक्तीः प्रपूजनम् ।

साधनं सिद्धिविद्यस्य विजयं कामरूपताम् ॥ २ ॥

पादुकामञ्जनं खड्गं वेतालाँश्च पिशाचकान् ।

यक्षिणिश्चेटकान्मायां यन्त्राणि च वदामि ते ॥ ३ ॥

प्रयोगानानुपूर्व्येण सन्दिष्टानामशेषतः ।

दशभिः सिद्धिभिर्मर्त्यो भवेद्विद्याधरोऽपरः ॥ ४ ॥

मूलविद्याक्षरैरङ्गान्याचरेत् षडितिक्रमात् ।

द्विचतुष्टयषडवर्णैः क्रमेण षडितीरितैः ॥ ५ ॥

श्रोत्राक्षिनासायुगले वाचि कण्ठे हृदि क्रमात् ।

नाभावाधारके पादसन्धिषु त्रिषु च क्रमात् ॥ ६ ॥

मन्त्राक्षराणि करमशोन्यसेत्सप्तदशापि वा ।

व्यापकं च समस्तेन विदध्याच्च यथाविधि ॥ ७ ॥

इन्द्रनीलनिभां भास्वन्मणिमौलिविराजिताम् ।

पञ्चवक्त्रां त्रिनयनामरुणांशुकधारिणीम् ॥ ८ ॥

दशहस्तां लसन्मुक्ताप्रायाभरणमण्डिताम् ।

रत्नस्तबकसम्भिन्नदेहां चारुस्मिताननाम् ॥ ९ ॥

पाशं पताकां चर्माणि षाङ्र्गचापं वरं करैः।

दधानां वामपार्श्वस्थैः सर्वाभरणभूषितैः॥ १० ॥

अङ्कुशं च ततः शक्तिं खड्गं बाणं तहृताऽभयम्।

दधानां दक्षिणैर्हस्तैरासीनां पद्मविष्टरे॥ ११ ॥

स्वाकारवर्णवेषास्यपाण्यायुधविभूषणैः।

शक्तिवृन्दैर्वृतां ध्यायेद्देवीं नित्यार्चनक्रमे॥ १२ ॥

त्रिषट्कोणयुतं पद्मष्टपत्रं ततो बहिः।

अष्टास्त्रं भूपुरद्वन्द्वाद्वृत्ते तत्पुरयुग्मकम्॥ १३ ॥

चतुर्द्वरयुतं दिक्षु शाखाभिश्च समन्वितम्।

कृत्वा तामावृतां शक्तिगणैस्तत्रार्चयेच्छिवाम्॥ १४ ॥

इच्छाज्ञानक्रियाशक्तीस्त्रिषु कोणेषु पूजयेत्।

अग्रात्प्रदक्षिणेनैव यजेदावृत्तिपञ्चक्तम्॥ १५ ॥

डाकिन्यादीर्यजेत्षट्सु कोणेषु परितः क्रमात्।

ब्राह्म्यादीरष्टपत्रेष तत्कोणेष बहिस्तथा॥ १६ ॥

प्रागुक्तास्ता यजेच्छक्तीः नित्यानित्यादिषूदिताः।

बलिद्वयं च कुर्वीत पूजां प्राग्वत्समापयेत्॥ १७ ॥

सर्वत्र नित्यहोमं(च) तु कुर्यादन्नाज्यतोऽपि वा।

तिलतण्डुलजैर्वापि प्रोक्तं द्रव्यानुदीरणे॥ १८ ॥

विद्याक्षराणां सर्वेषां स्वरव्यञ्जनविन्दुकान्।

पृथक्कृ(त्या)

त्वाऽथगणिते त्रिपञ्चाशद्भवन्ति हि ॥ १९ ॥

तेन तल्लक्षनसङ्ख्यन्तु जपेद्विद्यां पयोव्रतः ।

तद्दशांशं हुनेदग्नौ सर्वत्राक्षरलक्षके ॥ २० ॥

प्राङ्मुखोनित्यपूजासु साधनेषु च साधकः ।

नित्यानामपि सर्वासां वासनायामुदीरितम् ॥ २१ ॥

ततः सिद्धिमनुर्मन्त्री कुर्यात् सिद्धिषु कौतुकम् ।

तद्विधानं शृणु प्राज्ञे वक्ष्ये विद्याविभेदतः ॥ २२ ॥

दशानामपि सिद्धीनां दिव्यास्तासां भिदागताम् ।

सङ्ख्यांच ताश्च सम्प्रोक्ताः क्रमेणासां फलानि च ॥ २३ ॥

विद्यादिकूटे त्वाद्ये तु योजयेद्दशसु क्रमात् ।

ताभ्यामेव विलोमाभ्यां पुटयेदुपरीरितान् ॥ २४ ॥

मन्त्रवर्णान् दशानां च तत्तत्सङ्ख्याश्च ताः शृणु ।

परस्तात्तत्प्रभेदानां मन्त्रान्वक्ष्ये यथाविधि ॥ २५ ॥

चतुर्विधः स्याद्विजयो द्वन्द्वे सचतुरङ्गके ।

कूटयुद्धे दुर्गजे च तेषां मन्त्राश्चतुर्विधाः ॥ २६ ॥

कामरूपत्वमुदितं स्वेच्छयाऽभीष्टविग्रहम् ।

विधातुमात्मनः शक्तिं स एको मन्त्र ईरितः ॥ २७ ॥

पादुकायुगलं विद्याबहिभवाप्तं तु पादयोः ।

कृत्वा स्मरेद्वञ्छितन्तु देशं तत्र तदा स्थितिः ॥ २८ ॥

तन्मन्त्रः स्यादेकविधस्तथैवाञ्जनमीरितम् ।

येनाक्ताक्षोनिधिं पश्येद्देवाद्यांश्चान्तरिक्षगान् ॥ २९ ॥

खड्गश्च तादृशः प्रोक्तः करस्थेनाहिताः क्षणात् ।

पलायिता वा पदयोः प्रंअनेयुर्वशङ्गताः ॥ ३० ॥

वेतालाः स्युरसङ्ख्याताः सिद्धयन्त्रे चै(क)

व विद्यया ।

निधाय साधनं स्कन्धे चरेयुर्वाञ्छयाऽस्य ते ॥ ३१ ॥

विकृताङ्गमुखाः केचित्केचित्तिर्यङ्मुखाङ्गकाः ।

केचिद्भीषणानादाङ्गाः वेताला बहुविग्रहाः ॥ ३२ ॥

सर्वेऽपि वशगा वाक्यादस्य शत्रून् ग्रसन्ति च ।

किङ्कराः प्रोक्तकरणाद्भवेयुर्यावदायुषम् ॥ ३३ ॥

पिशाचास्तद्दशाः प्रोक्ता कार्श्यवैरूप्यविग्रहाः ।

क्रुद्धाः क्षुद्राशयाः प्रोक्तकारिणः स्युरसङ्ख्यकाः ॥ ३४ ॥

तेषामेका भवेद्विद्या तया ते किङ्कराः सदा ।

तैरेव प्रहेच्छत्रुमज्ञातमनिशं रणे ॥ ३५ ॥

षट्त्रिंशद्रूपसयुक्ता यक्षिण्यो वाञ्छितप्रदाः ।

सरूपा द्विभुजाश्चित्रवसनाभरणान्विताः ॥ ३६ ॥

असहाया यौवनाढ्याः स्रगालेपनसौरभैः ।

समेत्य सर्वाभीष्टानि दद्युस्ताः साद्काय वै ॥ ३७ ॥

तासां विद्याश्च षाट्त्रिंशद्वक्ष्ये ताश्च शृणु प्रिये ।

याभिः सिद्धाभिरनिशं साधकाः सर्वसम्मताः ॥ ३८ ॥

चेतकाः स्युश्चतुःषाष्टिस्तेषां मन्त्रास्च तत्समाः ।

तेऽपि नानाविधाकाराः सिद्धास्ते दद्युरीप्सितम् ॥ ३९ ॥

मायासङ्ख्याश्चित्ररुपास्चित्राण्यस्येच्छ्यऽनिशम् ।

वसून्युपहरेयुस्ता विद्यैका तत्प्रसा(ध)

दने ॥ ४० ॥

विद्याया नवमार्णादिवर्णैःषड्भिरुदीरितैः ।

दशविद्याः प्रजायन्ते शृणु वक्ष्ये च ताः क्रमात् ॥ ४१ ॥

नित्येति विजयं देहीत्युत्त्वा सम्पुटयेत्ततः ।

विद्या सा विजयप्राप्त्यां चतुर्ष्वकादशाक्षराः ॥ ४२ ॥

मदेति काम्रूपं मे देहीतिपुटयेत्तथा ।

त्रयोदशाक्षरी विद्या कामरूपप्रदेरिता ॥ ४३ ॥

नित्य्यदेपादुकां देहीत्युत्त्वा कुर्याच्च सम्पुटम् ।

द्वादशार्णा भवेद्विद्या सिद्धा दद्याच्च पादुके ॥ ४४ ॥

तथा नित्यप्रदेत्युत्त्वा देह्यञ्जनमितीरयेत् ।

पूजयेत्तद्वयेनात्र द्वादशार्णा समीरिता ॥ ४५ ॥

द्रवित्येदेहिषङ्गारमित्युत्त्वा पुटयेत्तथा ।

द्वादशार्णा भवेत्सिद्धा सत्या दद्यात्सुशोभवम् ॥ ४६ ॥

नित्यद्रवेति वेतालान् देहीति पुटयेत्तथा ।

त्रयोदशाक्षरां विद्यां सिद्धां तान् दर्शयेत्तथा ॥ ४७ ॥

पिशाचान्मे प्रयच्छेति पूर्वं नित्यमदद्रवे ।

पुटयेत्पूर्ववद्वाभ्यां विद्या सप्तदशाक्षरा ॥ ४८ ॥

षट्त्रिंशदुक्ता यक्षिण्यस्ताः सर्वा वाञ्छितप्रदाः ।

तासां नामानि विद्याश्च शृणु वक्ष्ये यथाविधि ॥ ४९ ॥

विचित्रा विभ्रमा हंसी भीषणी जनरञ्जिका ।

विशाला मदना रूद्धा कालकण्ठी महाभया ॥ ५० ॥

माहेन्द्री शङ्खिनी चान्द्री मङ्गला वटवासिनी ।

मेखला सकला लक्ष्मीर्मालिनी विश्वनायिका ॥ ५१ ॥

सुलोचना सशोभा च कामदा सविलासिनी ।

कामेश्वरी नन्दिनी च स्वर्णरेखा मनोरमा ॥ ५२ ॥

प्रमोदा रागिणी सिद्धा पद्मिनी सरतिप्रिया ।

कल्याणदा कलादक्षा ततस्च सुरसुन्दरी ॥ ५३ ॥

इति षट्त्रिंशदाख्याता यक्षिण्योऽभीष्टदायकः ।

तासां विद्याः क्रमेणैव तद्वीजद्वयसम्पुटैः ॥ ५४ ॥

नित्यद्रवमदेत्यन्तैः षाद्वर्णैः स्वोक्तनामभिः ।

विद्याः षट्त्रिंशदाख्यातास्ताः सिद्धा दद्युरीप्सितम् ॥ ५५ ॥

तासां विद्यार्णसङ्ख्यास्तु शृणु वक्ष्ये यथाक्रमम् ।

पञ्चमी  पञ्चदशमी विंशतिस्च तथाऽन्तिमा   ॥ ५६ ॥

चतस्रः पञ्चदशकास्तृतीया साऽष्टमी तथा

त्रयोदशी चाष्टदशी द्वाविंशा द्वादशाक्षरा ॥ ५७ ॥

सैकत्रिंशाच्च तद्वत्स्युश्चतुर्दशसमन्विताः ।

नवमी दशमी चैकविंशा तद्वदनन्तरम् ॥ ५८ ॥

चतुर्विंशा पञ्चविंशा सप्तविंशा तदूर्ध्वगा ।

त्रयस्त्रिंशा(धि)

दिकास्तिस्रस्त्रयोदशयुताः पराः ॥ ५९ ॥

चेटकानां चतुःषष्टिं तन्मात्रां च वदामि ते ।

णु शुद्धास्तु ते नित्यं साधयेयुः समीहितम् ॥ ६० ॥

विभ्रमो वाहिको वीरो विकर्षः क्रोकरः कविः ।

सिंहनादो महानादः सुग्रीवोमर्कटः शटः ॥ ६१ ॥

बिडालाक्षो बिडालास्यः कुमारः खचरोभवः ।

मयूरो मङ्गलोभीमो द्वीपिवक्रः षडाननः ॥ ६२ ॥

मातङ्गस्च निशाचारी विषग्राही वृकोदरः ।

सौरिभास्यो गजमुखः पशुवक्रो गजाननः ॥ ६३ ॥

क्षोभकोमणिभद्रस्च्च क्रीडकः सिंहवक्रकः ।

श्येनास्यः कङ्कवदनः काकास्यो हयवक्रकः ॥ ६४ ॥

महोदरः स्थूलशिरा विकृतास्या वराननः ।
चपलः कुक्कुटास्यश्च मायावी मदनालसः ॥ ६५ ॥
मनोहरो दीर्घजङ्घः स्थूलदन्तो दशाननः ।
सुमुखः पीडितः क्रुद्धो वराहास्यः सटामुखः ॥ ६६ ॥
कपटः कौतुकी कालः किङ्करः कितवः खलः ।
भक्षकोभयदः सिद्धः सर्वगस्चेति कीर्तिताः ॥ ६७ ॥
बीजद्वयपुटान्तस्थैर्मदनित्य(अ)
द्रवेयुतैः ।
नामभिस्तैर्द्वितीयान्तैर्देहीतिपदसंयुतैः ॥ ६८ ॥
एवं मन्त्राश्चतुःषष्टिः  क्रमादुक्ता महेश्वरि ।
तेषां सङ्ख्यामपि तथा शृणु वक्ष्ये यथाविधि ॥ ६९ ॥
चतुर्दशाक्षरास्तेषु नव मन्त्राः समीरिताः ।
तथा पञ्चदशार्णाः स्युः षड्विंशतिरितीरिताः ॥ ७० ॥
षोडशार्णास्तु मनवः पञ्चविंशतिरीरिताः ।
तथा सप्तदशार्णाश्च चत्वारोव्याकुलक्रमात् ॥ ७१ ॥
विद्याक्षरैरनावृत्तान्यक्षराणि चतुर्दश ।
सस्वरैस्तैर्भवेत्सङ्ख्या चतुर्विंशच्छतद्वयम् ॥ ७२ ॥
तैर्यन्त्राणि च सप्त स्युस्तेषु प्रोक्ताः क्रमाद्यजेत् ।
देवताः सप्तवारेषु भास्करादिषु भक्तितः ॥ ७३ ॥

वाराख्यां सप्तमीयुक्तामिष्टं देहीति चालिखेत्।
यन्त्रस्य मध्ये मायास्थं तत्र सिद्धीश्च पूजयेत्॥ ७४॥
वृत्तयोर्नवयोनिं तु कृत्वा बाह्येऽष्टकोणकम्।
बहिः कलाब्जभूपद्मयुगं कुर्याद्यथाविधि॥ ७५॥
विलिख्य तेषु क्रमशो वर्णान् द्वत्रिंशदालिखेत्।
दलेषु कोणेषु तथा वृत्तमध्यत्रये पुनः॥ ७६॥
मातृकामकथाद्यां वै विलिखेदान्तरक्रमात्।
तस्य कोणान्तरालेषु हलक्षार्णान् क्रमाल्लिखेत्॥ ७७॥
अग्रात्प्रदिक्षणं त्वेवं सप्त यन्त्राणि तैर्भवेत्।
सिद्धीनां यक्षिणीनां च चेटकानां तथैकशः॥ ७८॥
चेटकानां विशेषोऽयं मध्येऽष्टच्छदमम्बुजम्।
तेषामुक्तक्रमेणैव साधनानि फलानि वै॥ ७९॥
प्रयोगान् शृणु देवेशि यैः सिद्धैर्मत्समोभुवि।
पूज्यते सर्वलोकैश्च सर्वतः सर्वदापि च॥ ८०॥
अरण्यवटमूले च पर्वताग्रे गुहासु च।
उद्यानमध्ये कान्तारे मातृपादपमूलतः॥ ८१॥
सिन्धुतीरवने चैता यक्षिणी साधयेत्त्रिशः।
एकैकस्मिन् वर्णलक्षं जपेदुक्तविधानतः॥ ८२॥
तद्दशांशं तर्पणं च होमं कुर्यात् प्रसूनकैः।

कदम्बबन्धूकजयाहयमारैस्च लोहितैः ॥ ८३ ॥

ततः प्रीताः समागत्य प्रत्यक्षा वाञ्छितप्रदाः ।

सुवर्णानि च वासांसि भूषणानि फलानि च ॥ ८४ ॥

आस्वाद्यानि च पेयानि भोज्यानि विविधानि च ।

आलेपनानि माल्यानि दद्युराजीवितावधि ॥ ८५ ॥

आयाते सर्वदा ग्राह्यं प्रत्यक्षादेहि वाञ्छितम् ।

इत्युक्त्वा नित्यशस्तास्तु पूजयेच्चजपेत्तथा ॥ ८६ ॥

अष्टोत्तरसहस्रं तु तां तां विद्यामनन्यधीः ।

एवं ताः सर्वयक्षिण्यः फलं दद्युरर्थेप्सितम् ॥ ८७ ॥

चेटकानान्तु सर्वेषां तेषूक्तेषु क्रमेण वै ।

एकस्मिन् पञ्च पञ्च स्युः सिद्धाः सिन्धुतटे नव ॥ ८८ ॥

तेषां च वर्णलक्षन्तु जपनुक्तविधानतः ।

मौनं दिनेषु सततं कुर्यात् सिद्ध्यै न चालयेत् ॥ ८९ ॥

मध्यरात्रे सदा होमं तर्पणं च समीरितम् ।

जपेद्दिवानिशं प्रोक्तं सर्वेषामपि साधने ॥ ९० ॥

चेटकास्ते समागत्य मध्यरात्रेऽतिभीषणाः ।

क्षोभयुरसुंक्षोमं ? नचेदेत्यथ तत्पुरः ॥ ९१ ॥

प्रत्यक्षाः किं तवेष्टं तत् करोमिति वदेन्निशि ।

प्रत्येकं ते तथेत्युक्ता न मां मुञ्चतह् इत्यपि ॥ ९२ ॥

नित्यशस्तान् जपार्चाभिरुपासीताचरेत्पुनः ।

(स्मृ)

सते  तमेत्य सन्दिष्टं साधयेयुः समीहितम् ॥ ९३ ॥

शत्रुणां समरे भङ्गं प्रहारमहिते जने ।

कुर्वन्ति प्रार्थितार्थानां प्रदानं च दिवाऽनिशम् ॥ ९४ ॥

आनयेयुश्च वनिता वाञ्छितांस्तत्क्षणात् ध्रुवम् ।

निश्चलीकुर्वते मत्तं दान्तिनं वा हयं नरम् ॥ ९५ ॥

नित्याषोडशके सिद्धे देवर्षिपितृराक्षसैः ।

पिशाचैरुरगैः सिद्धैः किन्नरैरप्सरोगणैः ॥ ९६ ॥

मरुद्भिर्वसुभिः सप्तऋषिभिर्यक्षदानवैः ।

रुद्रैरेकादशविधैः साध्यैश्च नवभिग्रहैः ॥ ९७ ॥

द्वादशार्कैर्लोकपालैस्तथाऽन्यैरपि दैवतैः ।

राजभिर्वनिताभिश्च नरैरन्यैर्मृगैस्तथा ॥ ९८ ॥

पूज्यन्ते सर्वदा सिद्धसमीहितसुखास्पदः ।

हृष्टाशयो वदान्यश्च दयावान् सुमुखः क्षमी ॥ ९९ ॥

पूर्णाशयः सदानन्दोनिरपेक्षफलान्वितः ।

धनी भोक्ताऽपरद्वेषी प्रेमभूरावयोर्भवेत् ॥ १०० ॥

जिह्वातत्त्वमयी व्याप्तिरिति सम्यक् समीरिता ।

अस्या निष्फालनाच्चित्ते  तत्तत्त्वं स्वात्मसात्कृतम् ॥ १०१ ॥

ऐति षोडशनित्यातन्त्रेषु श्रिकादिमते सप्तदशं पटलं परिपूर्णं परामृष्टम्॥ १७॥

अथाष्टादशपटलम्।

अथ षोडशनित्यासु सम्प्रोक्ता या त्रयोदशी।

तद्विधानं शृणु प्राज्ञे विद्या प्रागुदिता तव॥ १॥

तदङ्गान्यक्षरन्यास ध्यानार्चेऽस्यास्तु शक्तिभिः।

तद्यन्त्रविनियोगांश्च वक्ष्येऽहं विजयप्रदान्॥ २॥

विद्याया व्यञ्जनैर्दीर्घस्वरयुतैश्चतुष्टयम्।

शेषाभ्यां च द्वयं कुर्यात् षडङ्गानि कराङ्गयोः॥ ३॥

ज्ञानेन्द्रियेषु श्रोत्रादिष्वथ चित्ते च विन्यसेत्।

अक्षराणि क्रमाद्बिन्दुयुतान्यन्तत्तु पूर्ववत्॥ ४॥

पञ्चवक्त्रां दशभुजां प्रतिवक्त्रं त्रिलोचनाम्।

भास्वन्मुकुटविन्यस्तचन्द्ररेखाविराजिताम्॥ ५॥

सर्वाभरणसंयुक्तां पीताम्बरसमुज्ज्वलाम्।

उद्यद्भास्वद्बिम्बतुल्यदेहकान्तिं शुचिस्मिताम्॥ ६॥

शङ्कं पाशं खेटचापौ कह्लारं वामबाहुभिः।

चक्रं तथाऽङ्कुशं खड्गं सायकं मातुलङ्गकम् ॥ ७॥

दधानां दक्षिनैर्हस्तैः प्रयोगे भीमदर्शनाम्।

उपासनेऽतिसौम्यां च सिंहोपरि कृतासनाम्॥ ८॥

व्याघ्रारूढाभिरभितः शक्तिभिः परिवारिताम्।

समरे पूजतेऽन्येषु प्रयोगेषु सुखासनाम्॥ ९॥

शक्तयस्चापि पूजायां सुखासनस्मन्बिताः।

सर्वादिव्या समाकारमुखपाण्यायुधान्यपि॥ १०॥

चतुरस्त्रद्वयं कृत्वा चतुर्द्वारोपशोभितम्।

दलाष्टकसमोप्तेतं तत्र प्राग्वत् समर्चयेत्॥ ११॥

तदन्तवृत्तयुग्मान्तरषट्कोणं विधाय तु(तत्)

।

तदन्तस्च तथा पद्मं षोडशच्छदसंयुतम्॥ १२॥

तथैवाष्टच्छदं पद्मं विधायावाह्य तत्र ताम्।

तत्तच्छत्त्या वृतां सम्यगुपचारैस्तथाऽर्चयेत्॥ १३॥

अन्नाद्याभ्यां नित्यहोमं कुर्याद्वा तिलतण्डुलैः।

बलिद्वयं च कुर्वीत पूजां चाऽपि समापयेत्॥ १४॥

ललितारहिताः पञ्चदशनित्यास्तिथीश्वराः।

चन्द्रखण्डलसन्मौलियुता सा तन्मयी मता॥ १५॥

मायासप्ताक्षरीमध्यगतैर्नामभिरर्चयेत्।

तदावरणगाः शक्तीस्तत्समाकारशक्तिकाः॥ १६॥

अग्रात् प्रदक्षिणैव ताः सर्वास्तेषु पूजयेत्।

तासां क्रमेण नामानि शृणु वक्ष्ये यथाविधि॥ १७॥

नित्यानित्यावदुदिततमर्चनं चतुरस्त्रके ।
अन्तःस्थिताष्टकोणेषु पूजयेदुक्तविग्रहाः ॥ १८ ॥
जयां च विजयां दुर्गां भद्रां भद्रकरीमपि ।
क्षेमां क्षेमंकरीनित्यामष्टकोणेषु भक्तितः ॥ १९ ॥
तदन्तः षोडशदलेष्वर्चयेत्षोडशाभितः ।
शक्तीस्ता(स्ता) गन्धपुष्पा(दि)
युतोभक्तिस्मान्वितः ॥ २० ॥
विदारिकां विश्वमयी विश्वां विश्वव्हिभञ्जिकां ।
वीरां विक्षोभिणीं विद्यां विनोदाश्चितविग्रहाम् ॥ २१ ॥
वीतशोकां विषग्रीवां विपुलां विजयप्रदाम् ।
विभवां विविधां विप्रां प्रोक्ताकारसमन्विताः ॥ २२ ॥
तन्दन्तरष्टपत्रेषु शक्तीरष्टाभितो यजेत् ।
प्रोक्तक्रमेण गन्धाद्यैर्भक्तिनिष्ठाशयो वशी ॥ २३ ॥
मनोहरां मङ्गलां च मदोत्सिक्तां मनस्विनीम् ।
मानिनीं मधुरां मायां मोहिनीमुक्तविग्रहाम् ॥ २४ ॥
एवं पूजाजपध्यानहोममोपासनतो वशी ।
भजते नित्यशोदेवीं योऽसौ स्यात्सर्वतः सुखी ॥ २५ ॥
पूर्वोक्तक्रमतोविद्यावर्णलक्षं जपेद्वशी ।
होमं रक्ताम्बुजैः कृत्वा सिद्धमन्त्रोदयान्वितः ॥ २६ ॥

प्रयोगानाचरेन्मन्त्री होमयन्त्रविधानतः।

जपेन तर्पणेनापि पूजनेन यथाविधि॥ २७॥

कमलैः कैरवैरक्तैः सितैः सौगन्धिकोत्पलः।

सुगन्धिशेफालिकया त्रिमध्वक्तैर्यथाविधि॥ २८॥

होमात् सप्तसु वारेषु कुर्यात्प्रोक्तैस्तु सप्तभिः।

प्रोक्तवारेश्योश्चापि तन्मण्डलत एव वै॥ २९॥

विजयं समवाप्नोति समरे द्वन्द्वयुद्धके।

मल्लयुद्धेच वादेव द्वये द्यूतद्वयेऽपि च॥ ३०॥

व्यवहरारेषु सर्वत्र जयमाप्नोति निश्चितम्।

चतुरङ्गुलजैः पुष्पैर्होमात्संस्तम्भयेदरीन्॥ ३१॥

तथैव कर्णिकारोत्थैः पुन्नागोत्थैर्नमेरुजैः।

चम्पकैः केतकैराजवृक्षजैर्मागन्दोद्भवैः॥ ३२॥

प्राग्वद्वारेषु जुहुयात्क्रमात्पुष्पैस्तु सप्तभिः।

प्रोक्तेषु स्तम्भनं शतोर्भङ्गो वा भवति ध्रुवम्॥ ३३॥

शतोर्नक्षत्रवृक्षाग्नौ तत्समिस्द्भिस्तु होमतः।

सर्पिषाज्याप्लुताभिस्ते प्रणमन्त्येव पादयोः॥ ३४॥

मृत्युकाष्ठानले मृत्युपत्रपुष्पफलैरपि।

समिद्भिर्जुहुयात्सम्भ्यग्वारेशार्चनपूर्वकम्॥ ३५॥

अरातेश्चतुरङ्गन्तु बलं रोगार्दितं भवेत्।

तेनास्य विजयोभूयान्निधनेनापि वा पुनः ॥ ३६ ॥

अर्कवारेऽर्कैहेरिध्मैः समिद्धेऽग्नौ तदुद्भवैः ।

पत्रैः पुष्पैः फलैः काण्डैः मूलैश्चापि हुनेत्क्रमात् ॥ ३७ ॥

सवर्णारुणवत्साया घृतसिक्तैस्तु मण्डलात् ।

अरातिदिङ्मुखोभूत्वा कुण्डे त्र्यस्रे विधानतः ॥ ३८ ॥

पलायते वा रोगातः प्रणमेद्वा भान्वितः ।

वैरी बलसमग्रोपि शौर्यमानान्वितोऽपि च ॥ ३९ ॥

पलाशेध्मानले तस्य पञ्चाङ्गैस्तद्धृताप्लुतैः ।

होमेन सोमवारे च भवेत्प्राग्वन्न संशय ॥ ४० ॥

खदिरेध्मानले तस्य पञ्चाङ्गैस्तद् घृताप्लुतैः ।

वारे भौमस्य जवनात्तदाप्नोति मुनिश्चितम् ॥ ४१ ॥

अपामार्गेध्मजे वह्नौ तत्समिद्भिर्हुनेत्तथा ।

बुधवारेषु शुभ्रायाः सवत्साया घृतान्वितम् ॥ ४२ ॥

पूर्वोक्तफलसंसिद्धिर्भवत्येव च तद्दिनैः ।

तक्षवारेषु ते जन्म पूर्वमेव हि तत्क्रिया ॥ ४३ ॥

सर्वत्र प्रोक्तहोमार्चाजपमन्त्रादिकर्मसु ।

तत्तन्नित्यार्चनं तत्तद्वारेशद्वयपूजनम् ॥ ४४ ॥

विधाय पश्चात् कर्माणि तानि कुर्यात् समाहितः ।

शीघ्रं तत्फलसंसिद्ध्यैभवत्येवान्यथाऽन्यथा ॥ ४५ ॥

पिप्पलाग्नौ गुरौ वारे तदुत्थैस्तद्धृतप्लुतैः ।
हुनेत्तथा तत्फलाप्तिस्तद्दिनैः स्यादसंशयम् ॥ ४६ ॥
उदुम्बराग्नौ भृगुजे वारे होमं तदुद्भवैः ।
तत्सिक्तैर्विदधीतेत्थं तद्दिनैस्तच्च सिद्ध्यति ॥ ४७ ॥
शमीवह्नौ तदुत्थैस्तु जुहुयात्कृष्णगोघृतैः ।
तद्दिनात्तत्फलानि स्युरिति वारेषु सप्तसु ॥ ४८ ॥
विजयेऽभिहितः सम्यक् हवनात्तिथि ऋक्षयोः ।
वियथं शृणु देवेशि कथयामि क्रमेण ते ॥ ४९ ॥
प्रतिपत्तिथिमारभ्य पञ्चम्यन्त्रक्रमेण वै ।
शालीचणकुमुद्गैश्च यथमाषैश्च होमतः ॥ ५० ॥
महिषाज्यप्लुतैस्ताम्बिस्तिथिभिः समवाप्नुयात् ।
षष्ठ्यादि च दशम्यन्तमजाभवघृतैस्तथा ॥ ५१ ॥
प्रागुक्तैर्निस्तुषैर्होमात्प्रागुक्तफलमाप्नुयात् ।
तदूर्ध्वं पञ्चदश्यन्ते समस्तैश्च तिलद्वयैः ॥ ५२ ॥
सितान्नैः पायसैः सिक्तैराविकैस्तु घृतैस्तथा ।
हवनात्तदवाप्लोति यदासौ फलमीरितम् ॥ ५३ ॥
एवं नक्षत्रवृक्षोत्थवह्नौ तैस्तिर्मधुप्लुतैः ।
हवनादपि तत्प्राप्तिर्भवत्येव न संशयः ॥ ५४ ॥
विद्यायां प्राग्वदर्णानि पञ्च युञ्ज्यात्स्वरैस्तथा ।

अशीत्यर्णवतीं विद्यां तैर्यन्त्राणि शृणु प्रिये ॥ ५५ ॥
प्राक्प्रत्यक्दक्षिणोदक् च दशसूत्रनिपातनात् ।
एकाशीतपदानि स्युस्तेषु तानि लिखेत्क्रमात् ॥ ५६ ॥
मध्यकोष्ठेऽभिधां कृत्वा प्रागुक्तविधिना युतम् ।
शूलीकृत्य च रेखाग्राण्यत्रावाह्याभिपूज्य ताम् ॥ ५७ ॥
उपासीत पुरोविद्यां जपं नित्यं समर्चयेत् ।
विद्याक्रमं तत्र यन्त्रे यजेत्ततत्फलमाप्नुयात् ॥ ५८ ॥
प्राक्प्रत्यक्दक्षिणोदक् च चतुःसूत्रनिपातनात् ।
नवानि सम्भवन्त्यत्र कोष्ठानि परमेश्वरि ॥ ५९ ॥
तेषु प्रत्येकमभानि चाष्टपत्राणि संलिखेत् ।
तेषु मध्यस्थपद्मस्य कर्णिकायां समालिखेत् ॥ ६० ॥
नागगर्भान्तु तां विद्यां तद्बहिश्चाष्टपत्रके ।
तेष्वादितोऽष्टौ संलिख्य बिन्दुना तद्बहिस्तथा ॥ ६१ ॥
कर्णिकायां तु नाम्नैकं बहिरष्टौ तथाऽष्टसु ।
एवमष्टसु संलिख्य वेष्टयेन्मातृकाक्षरैः ॥ ६२ ॥
विलोमैरनुलोमैश्च मायाबिन्दुसमन्वितैः ।
चतुरस्रत्रये बाह्ये यन्त्रस्याग्रे समालिखेत् ॥ ६३ ॥
एवं कृत्वा हस्तयुग्ममाने कुम्भं निधाय ताम् ।
विद्याक्षरौषधिक्वाथजलैरापूर्य पूर्ववत् ॥ ६४ ॥

अभ्यर्च्य विद्यामयुतं जपित्वा तैर्विधानतः ।
अभिषिञ्चेत्ततः क्लेशैर्विमुक्तो जायते सुखी ॥ ६५ ॥
विजयः सर्वतोभूयात् तत् प्रोकेष्वपि सप्तसु ।
नवग्रहार्तौरिपुभिः सर्वतः क्लेशसम्भवे ॥ ६६ ॥
समरस्योद्यमे कीर्तिसमृद्ध्योरथवाऽऽप्तये ।
पुत्राप्तैय वाञ्छितप्राप्त्यै त्रिषु जन्मसु कारयेत् ॥ ६७ ॥
एतद्यन्त्रं गौरिकेन पीठे संलिख्य तत्र ताम् ।
देवीमावाह्य सम्पूज्य जपेद्विद्यां तथाऽयुतम् ॥ ६८ ॥
एवं त्रिसप्तत्रिः सप्तरात्राविश्वं वशं नयेत् ।
राजानं वनितां मर्त्यानन्यांस्च प्राणिनोऽखिलान् ॥ ६९ ॥
हरिद्रायाः पटे कृत्वा कलशे वा शरावयोः ।
निधाय भित्तिमध्ये वा शयनस्थानके निजे ॥ ७० ॥
अभ्यर्च्य विद्यया जापं कुर्यात्सन्ध्यासु नित्यशः ।
सहस्रं प्रोक्तकालेन स्तम्भयेदखिलं दृढम् ॥ ७१ ॥
शतोरुद्योरगोषाभ्यामनिष्टकरणं तथा ।
व्यवहारं गणोद्योगं वादे वाचं मतिं रुषाम् ॥ ७२ ॥
एतत्प्रागुक्तसुरभिद्रव्यैरालिख्य तत्र ताम् ।
सन्ध्यासु पूजयेन्नित्यं सहस्रं प्रजपेत्तथा ॥ ७३ ॥
प्रोक्तकालप्रयोगेण श्रियं प्राप्नोति पुष्कलाम् ।

अथान्यद्वज्ररूपं तु यंत्रं वक्ष्येतिवैभवम्॥ ७४॥

प्राग्वद्विसप्रसूत्राणां पानेनोत्पादयेत्तथा।

कोष्ठानि नवषष्ट्या च युतंशतमितिस्फुटम्॥ ७५॥

तच्चतुष्कोणकोष्ठानि मार्जयेत्सैकविंशतिम्।

मध्ये च सम्भवत्येवाशीतिकोष्ठैर्यथाविधि॥ ७६॥

तच्चतुर्दिक्षु विलिखेत्त्रिकोणान्येककोष्ठतः।

सर्वमध्यस्थकोष्ठे च चतुर्दिक्ष्यग्रतस्तथा॥ ७७॥

विद्यां नामोदरां कृत्वा प्राग्वद्वर्णास्तु संलिखेत्।

एतदग्रचतुष्कस्य स्पर्शात्त्रिचतुरस्रकम्॥ ७८॥

विधाय तत्र विलिक्खेन्मातृकां प्राग्विधानतः।

एकेन वज्रयन्त्रेण विजयां विजयप्रदाः॥ ७९॥

एतत् प्रोक्तेषु संलिख्य स्थापयेत् प्रोक्तरूपतः।

विजयं समवाप्नोति प्रोक्तेष्वपि च सप्तसु॥ ८०॥

विलिख्याश्वत्थफलकातले यन्त्रं कुचन्दनैः।

कपाराधनसंसिद्धं स्थापयेच्छुन्यवेश्मसु॥ ८१॥

देशे वा तत्र दिनशो वर्द्धते श्रिरचञ्चला।

पिशाचा राक्षसाः कृत्या वेतालाः स्युर्न तत्र वै॥ ८२॥

पलाशफलकायान्तु विलिख्यैतद्यथाविधि।

स्थापयेद्यत्रकुत्रापि तत्क्षेत्रं ब्राह्मणास्पदम्॥ ८३॥

पूर्वोक्तस्थापनाद्राजधानी भवति सुस्थिरा ।
वटे विलिख्य खननात् पत्तनं भवति ध्रुवम् ॥ ८४ ॥
उदुम्बरे विधायेत्थं स्थापनादचिरेण वै ।
आहितानाश्रयं स्थानं भवत्येव न संशयः ॥ ८५ ॥
वज्रस्य दिक्त्रिकोणान्तरालात् कुर्यात् त्रिशुलकम् ।
दाहव्याप्ते स्वसंयुक्ते लिखेत् तच्छृङ्गमध्ययोः ॥ ८६ ॥
तत्र संस्थाप्य गदिनं विद्याजप्तविभूतिना ।
भालस्थेनाभिजप्तेन तमाविश्य गदो वदेत् ॥ ८७ ॥
स्वावेशकारणं कर्मस्थापयापक्रमं यथा ।
ग्रहभूतपिशाचाद्याः अस्याविश्यापयान्ति वै ॥ ८८ ॥
तदेवदासवत्तस्य वशे भवति तद्बलात् ।
यन्त्रमेतद्विलिख्याश्मन्यभ्यर्च्य स्थापयेत् क्वचित् ॥ ८९ ॥
राज्ञो गेहे तस्य राजक्ष्मा मुञ्चति नावयम् ।
स्थाने गजानां वाहानां नव कृत्वा नवस्वपि ॥ ९० ॥
स्थानेषु स्थापितान्येतान्यर्चयेद्दिनशस्तथा ।
दिक्षु मध्ये च तत्रैव रोगाः कृत्याः परेरिताः ॥ ९१ ॥
वीक्षितुं तं तु ते नैव शक्ताः स्युस्तत्प्रभावतः ।
चन्द्रचन्दनकाश्मीरैरालिख्याभिनवे पटे ॥ ९२ ॥
अभ्यर्च्य विद्याजप्तं तं पटमास्तीर्य शाययेत् ।

दाहज्वरार्तमचिरान्मुच्यते तज्ज्वरेण सः ॥ ९३ ॥
अन्येष्वपि गदेष्वेवं कारयेत्तद्विमुक्तये ।
समरेषु महीपानां यन्त्रमेतदुदीरितम् ॥ ९४ ॥
निशाने पटहेऽन्येषु वाद्येषु च समालिखेत् ।
दरदेनाथ तन्मध्ये तामावाह्य समर्चयेत् ॥ ९५ ॥
विजयां विजयावाप्त्यै युगपत्ताडयन् वजेत् ।
प्रत्यर्थिसेना तच्छब्दश्रवणेन पलायते ॥ ९६ ॥
दिशो दश भयोद्विग्नो नाभियाति कदाचन ।
सजीवद्यूतकालेषु तन्त्रमेतद्विनिर्मितम् ॥ ९७ ॥ ।
गुलकीकृत्य तत्कण्ठे बद्धा पश्चात्तु योजयेत् ।
एतद्दर्शनमात्रेण पलायन्ते दिशो दश ॥ ९८ ॥
निर्जीवेषु च तद्यन्त्रं जयमाप्नोति सर्वतः ।
नासाध्यं विद्यते तेन वज्रयन्त्रेण पार्वति ॥ ९९ ॥
ध्यायेद्वक्त्रे रिपोर्यन्त्रं विद्यां वा लोहिताकृतिम् ।
तदैव दासवत्तस्य वशो भवति तद्बलात् ॥ १०० ॥
इति ते विजयानित्यावैभवाः स्युः समीरिताः ।
नेत्रतत्त्वमयी व्याप्तिरिति सम्यक् समीरिता ॥
अस्या निष्फालनाच्चित्ते तत्तत्त्वं स्वात्मसात्कृतम् ॥ १०१ ॥
इति षोडशनित्यातन्त्रेषु श्रीकादिमतेऽष्टादशं पटलं परिपूर्णं परामृष्टम् ॥ १८ ॥

ऊनविंशपटलम्।

अथ षोडशनित्यासु या प्रोक्ता तु चतुर्द्दशी।

एकाक्षरा सा कथिता विद्या सा सर्वमङ्गला॥ १॥

न्यासक्रमं ध्यानविधिं शक्तीरावरणस्थिताः।

पूजक्रमं साधनञ्च विनियोगादिकान् क्रमात्॥ २॥

मूलविद्याक्षरीदिर्घस्वरभिन्नैः षाडङ्गकम्।

तानि तत्स्वरभिन्नानि न्यसेत् शेषु मनोऽवधि॥ ३॥

सुवर्णवर्णरुचिरां मुक्तामाणिक्यभूषणाम्।

माणिक्यमुकुटां नेत्रद्वयप्रेङ्खद्दयाभराम्॥ ४॥

द्विभुजां स्वासनां पद्मे त्वष्टषोडशतद्वयैः।

पत्रैरुपेते चचतुर्द्वारभुसद्मजुग्मने॥ ५॥

मातुलुङ्गफलं दक्षे दधानां करपङ्कजे।

वामेन निजभक्तानां प्रयच्छन्तीं धनादिकम्॥ ६॥

स्वसमानाभिरभितः शक्तिभिः परिवारिताम्।

षट्सप्ततिभिरन्याभिरक्षरोत्थाभिरन्विताम्॥ ७॥

प्रयोगेष्वन्यदा नित्यसपर्य्यासूक्तशक्तिकाम्।

ताः शक्तीः शृणु देवेशि या नित्यावरणे स्थिताः॥ ८॥

भद्रां भवानीं भव्याञ्च विशालाक्षीं सुविस्मिताम्।

करुणां कमलां कल्पां पूजयेदष्टपत्रके ॥ ९॥

कलाञ्च पूरिणीं नित्याममृतां जीवितां दयाम्।

अशोकाममलां पूर्णां पुण्यां भाग्यामथोद्यताम्॥ १० ॥

विवेकां विभवां विश्वां वितताञ्चाष्टयुग्मके।

पूजयेदभितः शक्तिः प्रादक्षिण्यक्रमेण वै ॥ ११ ॥

कामिनीं खेचरीं सर्वां पुराणां परमेश्वरीम्।

गौरीं शिवाममेयाञ्च विमलां विजयां पराम्॥ १२ ॥

पवित्रां पद्मिनीं दिव्यां विश्वेशीं शिववल्लभाम्।

अशेषरूपामानन्दाम्बुजाक्षीमनिन्दिताम्॥ १३ ॥

वरदां वाक्प्रदां वाणीं विविधां वेदविग्रहाम्।

विद्यां वागीश्वरीं सन्ध्यां संयाताञ्च सरस्वतीम्॥ १४ ॥

निर्मलां दानरूपाञ्च पूजयेत् षोडशद्वये।

प्राग्वदिन्द्रादिभिः सर्व्वाः क्रमादन्वर्थसंज्ञकाः ॥ १५ ॥

ब्राह्मयाद्या लोकपालख्याः शक्तीद्वारेषु पूजयेत्।

पश्चिमादिचतुर्द्दिक्षु चतस्त्रः प्रोक्तविग्रहाः ॥ १६ ॥

वलिद्वयञ्च होमञ्च कुर्य्यात् प्राग्वत् समापनम्।

जपन्तु नित्यशः  कुर्य्यादग्रे तस्याः सहस्त्रकम्॥ १७ ॥

प्राक्स्वत्तां साधयेद्विद्यां द्वत्रिंशल्लक्षमानतः।

होमं दशांशतः कुर्य्यादन्नाज्याभ्यां घृतेन वा ॥ १८ ॥

एवं संसिद्धविद्यस्तु कुर्य्यात् प्रोक्तानशेषतः।
प्रयोगानन्यथा तस्य नैष्फल्यमयशो मृत्तिम्॥ १९॥
विदध्यात्तेन तां प्रोक्तक्रमेणाराध्य भक्तितः।
संसाध्य पश्चात् कुर्व्वीत मङ्गलान्मङ्गलोदितान्॥ २०॥
प्रयोगार्था वर्णशक्तीर्वक्ष्ये देवीः शृणु प्रिये।
सोमसूर्य्याग्निरूपाश्च तास्त्वष्टत्रिंशदेव ताः॥ २१॥
अमृता मानदा पूषा तुष्टिः पुष्टी रतिर्धृतिः।
शशिनी चन्द्रिका कान्तिर्ज्योत्स्ना श्रीः प्रीतिरङ्गदा॥ २२॥
पूर्णा पूर्णामृता कामदायिन्यः सस्वराः कलाः।
एताः षोडश चन्द्रस्य कलाः कल्पद्रुमोपमाः॥ २३॥
तपिनी तापिनी धूम्रा मरीचिर्ज्वालिनी रुचिः।
सुषुम्ना भोगदा विश्वा बोधनी धारणी क्षमा॥ २४॥
एताः स्युः शक्तयः प्रोक्ताः क्रमद्द्वादशभानुगाः।
भकारादि डकारान्तवर्णोच्चारो विलोमतः॥ २५॥
धातार्य्यमा च मित्रश्च वरुणः शौभगस्तथा।
विवस्वानिन्द्रपूषार्काः पर्जन्यः समनन्तरः॥ २६॥
त्वष्ठा विष्नुरिति प्रोक्ता द्वादशार्काः क्रमेण वै।
कादिठान्तार्णतनवः सर्वगाः सर्व्वसिद्धिदाः॥ २७॥
धूम्रार्चिरुष्मा ज्वलिनी ज्वालिनी विस्फिलिङ्गिनी।

सुश्रीः सुरूपा कपिला हव्यकव्यवहे अपि ॥ २८ ॥
यादिक्षान्ताक्षरमयाः शक्तयो दश कीर्त्तिताः ।
तेषां दशानां नामानि वासनोक्तानि ते शिवे ॥ २९ ॥
कादिक्षान्ताक्षराणान्तु द्वाविंशन्मिथुनानि वै ।
प्रोक्तक्रमेण संपूज्य विधिं युञ्ज्यात्तु सर्वतः ॥ ३० ॥
स्वराणान्तु स्वतन्त्रत्वात् स्वतन्त्राः शक्तयस्तथा ।
तासां नाथास्तत्सदृशनामरूपाः समीरिताः ॥ ३१ ॥
मिथुनान्येवमुक्तानि त्रिंशदष्टक्रमेण वै ।
तानि संपूज्य तत्तेजस्त्रयात्मनि जले शिवे ॥ ३२ ॥
प्रोक्तानि दवतारूपाण्यावाह्याभ्यर्च्य तैर्जलैः ॥
अभिषेकात्तु तत्तेजस्त्रयं देव्यात्मता भवेत् ॥ ३३ ॥
वाताद्यैर्ग्रासमायान्तैः षट्सप्ततियुतैः शैतः ।
पञ्चभिर्योजयेन्नित्यां विद्यां तां सर्वमङ्गलाम् ॥ ३४ ॥
ततस्तस्या वलस्थाने स्वरान् षोडश योजयेत् ।
ततः सहस्त्रिर्नवभिर्द्विशतेन च षोडश ॥ ३५ ॥
रूपाणि नित्याविद्याया जायन्ते परमेश्वरि ।
तैर्यन्त्राणि प्रयोगांस्तु फलानि च वदामि ते ॥ ३६ ॥
वृत्तद्वयं विधायास्य बहिः षट्कोणमालिखेत् ।
तद्बहिश्चाष्टपत्राङ्गं तद्बहिस्तत्त्रयं तथा ॥ ३७ ॥

कृत्वा तेषु न्यसेद्विद्याकूटान्युक्तक्रमेण तु ।

तेष्वाद्यं मध्यतः साध्यसमेतं विलेखेद्बहिः ॥ ३८ ॥

बहिः कोणेषु चत्वारि प्रत्येकं विलिखेत्ततः ।

अष्टच्छदेषु प्रत्येकं पञ्च पञ्च समालिखेत् ॥ ३९ ॥

बहिर्वृत्तान्तरयुगे मातृकां माययान्विताम् ।

विलोमामनुलोमाञ्च स्वेन सम्यक् समालिखेत् ॥ ४० ॥

अन्तः षडस्त्रालेषु पर्य्यायदिनसम्भवे ।

नित्ये लिखेदग्रतस्तु प्रादक्षिण्येन सर्वतः ॥ ४१ ॥

एवं यन्त्रानि जायन्ते तैः कूटैरुक्तभेदतः ।

शतञ्च चत्वारिंशच्च चत्वारि च ततः क्रमात् ॥ ४२ ॥

एवमन्यानि कूटानि प्रोक्तानि विलिखेत् क्रमात् ।

मध्ये नाससमेतानि तदन्यान्यभितो लिखेत् ॥ ४३ ॥

त्रयोदशमितैर्लक्षैः सप्तविंशतिसंख्यकैः ।

सहस्रैश्च शतेनापि चतुर्भिस्तानि संख्यया ॥ ४४ ॥

यन्त्राणि देवि जायन्ते तैश्चासौ सर्व्वमङ्गला ।

एवमासान्तु नित्यानां यन्त्राणि स्युः पृथक् पृथक् ॥ ४५ ॥

तस्मादाभिरसाध्यानि न कदाचिच्च कुत्रवित् ।

विद्यन्ते तेषु यत्किञ्चिद्वक्ष्ये कः शेषतो वदेत् ॥ ४६ ॥

नाथात्मकानि येन स्युस्तेन तानि नवक्रमैः ।

भित्त्वा षोडशधा देवि विदध्याद्विनियोगकम् ॥ ४७ ॥

विशालामध्यविन्यासं विधाय नवकोष्ठकम् ।

प्रागादिमध्यसंयुक्तं नाथान् देवीश्च तत्क्रमात् ॥४८ ॥४९ ॥

* * * * * * * * *

यद्याद्विवाञ्छितं कर्म्म तत्तेषु विनियोजयेत् ।

पीठे वा भूतले वापि पूजयेत् प्रोक्तवासरम् ॥ ५० ॥

ततः प्राप्ते वाञ्छितार्थे स्वात्मन्युद्वास्य देवताः ।

चक्रं प्रक्षाल्य तत्तोयं केदारादिषु निक्षिपेत् ॥ ५१ ॥

एवमन्यानि यन्त्राणि प्रोक्तानि क्रमतः शिवे ।

विनियुञ्ज्याादभीष्टेषु कार्य्येषु क्रमतः शिवे ॥ ५२ ॥

परसंख्यासमेतानि तेषु तेष्वप्ययं विधिः ।

सर्वतः सौम्यकर्म्माणि सिध्यन्त्येवानया ध्रुवम् ॥ ५३ ॥

वश्येषु ज्ञानसंप्राप्त्यै सर्वप्रत्यूहशान्तिषु ।

लक्ष्मीप्राप्त्यै तथारोग्य सिद्धौ रोगार्त्तिशान्तिषु ॥ ५४ ॥

विजयाय समस्तापत्तारणायाभिसिद्धये ।

पुत्राप्त्यै सर्वरक्षायै पूजयेत्तेषु तत्क्रमात् ॥ ५५ ॥

गजाश्वगोखरोष्ट्राणां महिषाणां विद्धये ।

तेषां रोगादिपीडासु तच्छान्त्यै च यथाक्रमात् ॥ ५६ ॥

निर्म्माय नव यन्त्राणि तत्र तत्रार्चयेच्छिवाम् ।

तेषु तेषूक्तकार्य्येषु तत्तत् सम्प्राप्तिहेतवे ॥ ५७ ॥

नवप्राकारयुक्तानि षोडश प्रथमादिषु।

तिथिषु प्रोक्तरूपाणि तत्र तां सर्वमङ्गलाम्॥ ५८॥

पूजयेद्वाञ्छितावाप्त्यै प्रथमे सर्वदापयेत्।

एवमेषा महासिद्धिकरी पूजाजपादिना॥ ५९॥

लघुमन्त्रक्रियाश्चासां पूजां सर्वार्थसिद्धिदाम्।

पूर्णामनतिविस्तारं मङ्गलां ब्रूहि मे शिव॥ ६०॥

देवर्षिसिद्धगन्धर्वयक्षदेवाङ्गनाश्रयाम्।

पूजां वक्षामि ते देवि गुह्यां शृणु मनोहरे॥ ६१॥

विद्याया कुलसुन्दर्य्या कराङ्गन्यासपूर्वकम्।

अर्चितया विधायाथ पीठे चक्रं विधाय तत्॥ ६२॥

चन्दनागुरुकर्पूररोचनादरदादिषु।

एकेन तत्र ताः सम्यगुक्तरूपमथार्च्चयेत्॥ ६३॥

रत्नादिषुक्तेष्वालिख्य प्रतिष्ठाप्यात्र पूजयेत्।

वृत्तस्यायामविस्तारद्वये त्वेकतुरीयतः॥ ६४॥

वृत्तं विधाय चिह्नानि तेषु सूत्राणि पातयेत्।

त्रयमन्तरतो मुक्ता तेन द्वादशकक्रकम्॥ ६५॥

तेषां मर्मसु मध्ये च विदध्याद्वृत्तयुग्मकम्।

मध्यवृत्तस्य मध्ये तु योनिं कुर्य्यात् समास्त्रकाम्॥ ६६॥

प्राक्स्वक्तिस्रोऽर्च्चयोन्नित्यास्ततत्कोणेषु प्रदक्षिणम्।

अन्या अन्येषु कोणेषु पूजयेद्द्वादश क्रमात् ॥ ६७ ॥

अग्रात् प्रदिक्षणं पश्चाद्बलिं दद्याद्यथाविधि ।

सप्ताक्षर्य्य केवलया केवलां ललितां यजेत् ॥ ६८ ॥

नित्यानां ललिताद्यानां षोडशानाञ्च नाभभिः ।

नित्यासप्ताक्षरीभिः स्युर्विद्याः पूजासु सर्वदा ॥ ६९ ॥

ताभि षोडषविद्याभिर्नित्यास्ताः षोडशार्चयेत् ।

तद्विद्याक्षरसंख्यान्तु शृणु वक्ष्ये यथाक्रमम् ॥ ७० ॥

प्रथमायाश्च सप्तम्या विद्या स्यात् षोडशाक्षरी ।

द्वितीयायाश्चतुर्थ्याः स्युश्चतुर्दशभिरक्षरैः ॥ ७१ ॥

तृतीयायाश्च षष्ठ्याश्च दशम्या दशपञ्चकम् ।

द्वादश्याश्च चतुर्दश्याः पञ्चदश्याः क्रमेण वै ॥ ७२ ॥

पञ्चम्याश्च नवम्याश्च त्रयोदश्यास्त्रयोदशी ।

एकादश्यास्तु साष्टम्याः षोडश्या द्वादशोदिताः ॥ ७३ ॥

अस्मिन्नेवार्चयेच्चक्रे चतुर्विंशतिभिस्तथा ।

सविंशतिशता विद्या जपेत्तास्ताश्च सिद्धये ॥ ७४ ॥

अन्या विंशत् सप्तशतं तैर्यन्त्रैर्न च पूजनम् ।

आसां पूजायपाद्येषु यन्त्रेषु च समीरितम् ॥ ७५ ॥

एतल्लघुप्रकारन्ते यन्त्रं सर्व्वार्थदायकम् ।

तेन तन्त्रोक्तमखिलं साधयेद्वज्ररूपिणा ॥ ७६ ॥

तद्वज्रं द्विविधं प्रोक्तं कोष्ठकोणात्मभेदतः।

कोणात्मवज्रनिर्म्माणप्रयोगाः परतः शिवे ॥ ७७ ॥

तयोस्तु कोष्ठरूपन्तु वज्रं वक्ष्ये यथाविधि।

यत्साधकार्थितावाप्त्यै सुराङ्घ्रिपसमो भवेत्॥ ७८ ॥

प्राक्प्रत्यग्दक्षिणोदक्क चतुर्विंशतिसूत्रतः।

नवविंशतिभिः पञ्चशतं कोष्ठानि तेन वै ॥ ७९ ॥

कोणेषु मार्जयेत् षड्भिः षष्तिकोष्ठानि पूर्ववत्।

शिष्टेषु वकोज्रष्ठानि पञ्चषष्ट्या शतद्वयम्॥ ८० ॥

तेषु प्राक्ष्वत्त्रिकोणानि चतुर्दिक्षु चतुष्टयैः।

कोष्ठैर्विधायाधो मध्ये बाह्यारम्भात् प्रदक्षिणम्॥ ८१ ॥

प्रवेशगत्या विलिखेच्चित्रादिललितान्तकम्।

मध्येऽशिष्टे खण्डार्णचतुर्व्विंशतिमालिखेत्॥ ८२ ॥

ललितार्णचतुर्भेदजनितां नामशक्तियुक्।

ललितां साध्यगर्भान्तु विलिखेन्मध्यकोणतः॥ ८३ ॥

एवं यन्त्रं समालिख्य शिलालोहत्रयादिषु।

संस्थाप्य कुत्रचित् स्थाने पूजयेद्वाञ्छिताप्तये ॥ ८४ ॥

यस्मिन् देशे वज्रयन्त्रं स्थापितं योजनावधि।

मङ्गलान्येव जायन्ते नामङ्गलकथा भवेत्॥ ८५ ॥

पूजाचक्रे च तासान्तु नामानि प्रतिकोणके।

विलिख्य मध्ये ललितां साध्यगर्भां समालिखेत् ॥ ८६ ॥

बहिर्वृत्ते मातृकाञ्च तच्चक्रं स्थापयेद्भुवि ।

तेनापि पूर्ववत् प्रोक्तं देशे न स्यादभव्यकम् ॥ ८७ ॥

तस्मिन् सर्वत्र संलिख्य तां विद्यां सर्वमङ्गलाम् ।

मध्ये साध्याक्षरोपेतां स्थापयेत्तत्फलाप्तये ॥ ८८ ॥

प्रागुक्तवज्रयन्त्रे वा द्वादशारेऽपि वा शिवे ।

संस्थाप्य कुम्भं तद्वर्णभूरुहक्वाथपूरितम् ॥ ८९ ॥

विद्याया विधिवज्जप्तैरभिषिञ्चेज्जलैः शुभैः ।

जन्मर्क्षेषु विशेषेण समस्तलयशान्तये ॥ ९० ॥

पूर्वसम्पत्समृद्ध्यै च ग्रहरोगादिशान्तये ।

तथान्यदपि देवेशि प्रयोगं सर्वपावनम् ॥ ९१ ॥

दारिद्र्यवनदावाग्निं पापाब्धिवडवानलम् ।

सङ्कोचध्वान्तमार्त्तण्डं सन्तोषाब्धिविधूदयम् ॥ ९२ ॥

प्रागुक्ताक्षरसम्भिन्नां विद्यां नित्यां समाहितः ।

मौनी जपेत् प्रसूनैस्च पूजयेत् सौरभान्वितैः ॥ ९३ ॥

तर्पयेत् सलिलैः सिन्धुगामिनीसम्भवैः शिवैः ।

सौरभाद्यैस्तिलैः शुभ्रैस्तण्डुलैर्विधिवद्धुनेत् ॥ ९४ ॥

संस्थाप्य कुम्भं प्रोक्ताम्बुपूर्णं संजप्य भक्तितः ।

समस्तं तत्क्रमादेकवारं तैरभिषेकतः ॥ ९५ ॥

घोराभिचारकृत्यादिदुःखेभ्यो मुच्यते क्षणात्।

भूतप्रेतपिशाचाप ***

॥ ९६ ॥

कुमारा गुह्यका वीरा डाकिन्याद्यास्च दारुणाः।

विमुच्य तत्क्षणाद्भीताः प्रयान्ति चान्यतः क्षणात्॥ ९७ ॥

समुद्रगासरित्तोये ताः समावर्त्तयेत् स्थितः।

कण्ठमात्रे मज्जनात्तु प्राग्जन्माद्यैर्विमुच्यते॥ ९८ ॥

तथैव घृतहोमेन तर्पणैः शुद्धवारिभिः।

एवं सकलकल्याणसंप्रोक्ता सर्वमङ्गला॥ ९९ ॥

नामानुरूपं भजतां कृपया फलमानतः।

क्षिप्त्रप्रसादतो नित्यं हर्षोत्पादनतोऽपि च॥ १०० ॥।

घ्राणतत्त्वमयी व्याप्तिरिति सम्यक् समीरिता।

अस्या निफालना चित्ते तत्तत्त्वस्वात्मसात् कृतम्॥ १०१ ॥

इति षोडशनित्यातन्त्रे कादिमते एकोनविंशति पटलं परिपूर्णं परामृष्टम्।

विंशपटलम्।

अथ षोडशनित्यासु पञ्चदश्य्दता तु या।

तद्विधानं शृणु प्राज्ञे जवलामालिन्युदाहृता॥ १॥

न्यासं ध्यानं तथा शक्तीः पूजामपि च साधनम्।

यन्त्राणि विनियोगांश्च फलानि च शृणु क्रमात्॥ २॥

एकद्वयचतुःपञ्च चतुष्टयदशाक्षरैः ।
कुर्यादङ्गानि मूलार्णैरादितः षट् कराङ्गयोः ॥ ३ ॥
ज्वलज्ज्वलनसङ्काशां माणिक्यमुकुटोज्ज्वलाम् ।
षड् वक्त्रां द्वादशभुजां सर्वाभरणभूषिताम् ॥ ४ ॥
पाशाङ्कुशौ खड्गखेटौ चापबाणौ गदाधरौ ।
शुलवह्नी वराभीती दधानां करपङ्कजैः ॥ ५ ॥
स्वसमानाभिरभितः शक्तिभिः परिवारिताम् ।
चारुस्मितलसद्वक्त्रसरोजां त्रीक्षणान्विताम् ॥ ६ ॥
ध्यात्वैवमुपचारैस्तैरर्चयेत्तान्तु नित्यशः ।
चतुरस्त्रद्वयं कृत्वा चतुर्द्वारसमन्वितम् ॥ ७ ॥
सशाखमष्टपत्राङ्कं अन्तरष्टास्त्रकं ततः ।
षट्कोणं मध्यतस्त्र्यस्त्रं विधायात्र शिवां यजेत् ॥ ८ ॥
इच्छाज्ञानक्रियाशक्तीरर्चयेत्त्र्यस्त्रगाः क्रमात् ।
डाकिन्याद्याश्च षट्कोणे अष्टास्त्रे घस्मरादिकाः ॥ ९ ॥
घस्मरा विश्वकवला लोलाक्षी लोलजिह्विका ।
सर्वबक्षा सहस्राक्षी निःसङ्गा संहृतिप्रिया ॥ १० ॥
बहिरष्टच्छदेष्वेताः पूजयेच्च प्रदिक्षणम् ।
अचिन्त्यामप्रमेयाञ्च पूर्णरूपां दुरासदाम् ॥ ११ ॥
सर्वगां सिद्धरूपाञ्च पावनामेकरूपिणीम् ।

बहिर्द्वारेषु कोणेषु पूजयेत् प्रागुदीरिताः ॥ १२ ॥

प्राग्वत् कृतार्च्चश्चक्रे तामुक्ते प्रोक्तक्रमाद् यजेत् ।

बलिहोमावसानान्तमिति सम्यक् समीरितम् ॥ १३ ॥

अष्टलक्षं हविष्याशी जपेद्विद्यां जितेन्द्रियः ।

तद्दशांशां तर्पणञ्च होमं कुर्याच्च गोघृतैः ॥ १४ ॥

एवं संसिद्धमन्त्रस्तु कुर्य्याद् यन्त्राण्यनुक्रमात् ।

पुष्काचक्रे बहिर्भूतं चतुरस्रे त्वखण्डिते ॥ १५ ॥

विधाय तत्र विलिखेदक्षराणि यथाविधि ।

सर्वमध्ये तारगर्भे शक्तिमाख्यासमन्विताम् ॥ १६ ॥

यन्त्रञ्च त्रिषु कोणेषु षट्सु षट्कमथाष्टसु ।

अष्टकं बहिरप्येवं बाह्ये दिक्षु नव क्रमात् ॥ १७ ॥

एवं मूलाक्षरैः कृत्वा यन्त्रं तेनैव साधयेत् ।

समस्तं वाञ्छितं पूजाधारणं स्थापनैः शिवे ॥ १८ ॥

अकारादिक्षकारान्तवर्णेषु स्वरयोगिषु ।

चतुष्टयं प्रोक्तयन्त्रे वैर्णस्ततत्स्थानतो लिखेत् ॥ १९ ॥

शिष्टमेवं लिखेन्मध्ये साध्याक्षरसमन्वितम् ।

एवं यन्त्राणि जायन्ते दश तेषामनुक्रमात् ॥ २० ॥

विनियोगात् फलावाप्तिं प्रवक्ष्यामि शृणु प्रिये ।

यैरष्टमखिलं प्रानोत्ययन्त्रात् साधको ध्रुवम् ॥ २१ ॥

द्वितीयादीनि यन्त्राणि मातृकार्णयुतानि वै ।

क्रमान्नवग्रहाणां स्त्यस्तत्तद्वारेषु तद्दिशि ॥ २२ ॥

तेषु देव्यर्च्चनात् प्रीतास्त्वनिष्टं ते न कुर्वते ।

राहुकेतू स्थितौ यत्र तद्राश्यधिपवारके ॥ २३ ॥

षडष्टास्त्रान्त्रालेषु ग्रहनाम द्वितीयया ।

विभक्त्या भाजने सम्यक् प्रीणयामीति संलिखेत् ॥ २४ ॥

आद्ये तु यन्त्रे संलिख्य प्रोक्तक्रममथार्च्चयेत् ।

सर्वेष्वपि च वारेषु सर्वेषां प्रीतिसिद्धये ॥ २५ ॥

अनिष्टशान्त्यै नियतमर्च्चयेत्तान् ग्रहान् प्रिये ।

एवं यन्त्रेषु दशसु पूजिता नित्यया सह ॥ २६ ॥

प्रीताः क्रूरा अपि क्रूरस्थानस्था अपि सर्वदा ।

सौम्याः सौम्यगतानान्तु फलान्येव वितन्वते ॥ २७ ॥

दशस्वपि च यन्त्रेषु दरदैर्गैरिकैस्तु वा ।

लिखेतेष्वर्च्चितेष्वेवं कुमारं कन्यकान्तु वा ॥ २८ ॥

सुशुभावयवाम्भुग्धां स्नातां धौताम्बरां शुभाम् ।

तथाविधं कुमारं वा संस्थाप्याभ्यर्च्च्य विद्यया ॥ २९ ॥

स्पृष्ट्वा शिर्षे जपेद्विद्यां शतवारं तथार्च्चयेत् ।

प्रसूनैररुणैः शुभ्रैः सौभाग्यैरथापि वा ॥ ३० ॥

दद्याद् गुग्गुलधूपञ्च यावत् कार्य्यावसानकम् ।

ततो देव्या समाविष्टे तस्मिन् संपूज्य यत्नतः ॥ ३१ ॥

ततस्तामुपचारैस्तैः प्रागुक्तैर्विद्यया वशी ।

पूजयेत्तां ततः पृच्छेदभीष्टं कथयेच्च सा ॥ ३२ ॥

भूतं भवद्भविष्यञ्च यदन्यन्मनसि स्थितम् ।

जन्मान्तराण्यतीतानि सर्वं संपूजिता वदेत् ॥ ३३ ॥

ततस्तां प्राग्वदभ्यर्च्य स्वात्मन्युद्वास्य तां जपेत् ।

सहस्रवारं स्थिरधीः पूर्णात्मा विचरेत् सुखी ॥ ३४ ॥

तथा षट्कोणकोणेषु मध्ये वालिख्य दाहकम् ।

तत्र संस्थाप्य गदितम् अभ्यर्च्यादीरितक्रमात् ॥ ३५ ॥

आवेश्य रोगिणं रोगं पृच्छेत्तत्कारणं शमम् ।

प्रोक्त्वा तत् सकलं तस्य निदेशादपयाति च ॥ ३६ ॥

प्रथमं स्त्रीकपालस्य मध्यस्थं तापयेन्निशि ।

जपन् विद्यां स्मरन् साध्यां सद्य आकृष्यतेऽथ सा ॥ ३७ ॥

भीतिलज्जाभिमानादिरहिता वेपिताङ्गका ।

निरस्तेतरसद्भावा मन्मथार्त्ताभियाति सा ॥ ३८ ॥

तत् यन्त्रं पुंकपालस्थं तापयेत् प्रजपेत्तथा ।

राजानो राजपुत्रा वा तथान्ये चापि केचन ॥ ३९ ॥

विवेकविधुरा मूढास्त्यक्तजातिकुलक्रमाः ।

वशगा दासवद्भूमौ तिष्ठन्त्यामरणाद् । ध्रुवम् ॥ ४० ॥

सर्वासामपि नित्यानामुपदेशोऽथ तं गुरुः ।
तत्तच्चक्रस्य मध्यस्थं वेष्टविद्याजपान्वितम् ॥ ४१ ॥
वह्निज्वालापरीताङ्गं भावयन्निन्द्रियाण्यपि ।
मनःषष्ठानि चाकर्षेन्मनसा प्राग्वदात्मनि ॥ ४२ ॥
एवं कृते क्षणादेवं विसंज्ञो निपतेद् भुवि ।
ततस्तमुत्थाप्य मुखे क्षिप्त्वाघ्यर्म्बु वदेत्ततः ॥ ४३ ॥
एष वेधस्त्रिधा प्रोक्तः सद्यः प्रत्ययकारकः ।
शाक्तशाम्भवभेदाभ्यां द्वयोरैक्यात्मयामलात् ॥ ४४ ॥
शिष्यस्य मूलाधारादिस्थानेषु ब्रह्मरन्ध्रके ।
स्मर दाहार्णकान् सप्तेत्युक्त्वा प्राग्वदुदीक्षणात् ॥ ४५ ॥
विदध्याच्छाक्तवेधन्तु देशिकः सिद्धविद्यया ।
शाम्भवन्तु शृणु प्राज्ञे वेधमद्भुतविग्रहम् ॥ ४६ ॥
तूष्णीं संस्थापितं शिष्यं तत्तच्चक्रे तदात्मना ।
स्वयं प्रविश्य तद्देहमेकीभूत्वा पुनः स्वके ॥ ४७ ॥
समागत्यात्मरूपेण तदात्मानं विभाव्य वै ।
कृतन्यासजपार्चस्तु तत्तनुं वह्निना दहेत् ॥ ४८ ॥
स्यादेष शाम्भवो वेधः प्रोक्तः प्रागेव यामलः ।
इति वेधत्रयं प्रोक्तं त्वद्भावसिद्धिसूचकम् ॥ ४९ ॥
यामले तु विशेषोऽयं सिद्धः पश्चाद् गुरोः श्रुतम् ।

ज्ञानमन्यच्च सकलं संक्रमेत्तेन तत् समः ॥ ५० ॥

रक्तचन्दनपङ्केन लिखित्वा प्रथमं शिवे ।

लोहैर्विरचिते पत्ते फलकायां शिलातले ॥ ५१ ॥

भूमौ वा सुसमे शुद्धे लोष्टाङ्गारविवर्जिते ।

देवीमावाह्य तत्रैव पूजयेच्छक्तिभिर्युताम् ॥ ५२ ॥

दिनं दिनत्रयं सप्तवासरं सप्तमेव वा ।

मासं मण्डलमित्येवं क्रमादिष्टमवाप्नुयात् ॥ ५३ ॥

वश्यमाकर्षणं स्तम्भं निग्रहं लाभमीप्सितम् ।

अन्यच्च सकलन्त्विष्टमवाप्नोत्यर्च्चनाद्ध्रुतम् ॥ ५४ ॥

तदा प्रोक्तान् गदान् सर्वान् जयेदन्यानि चाखिलान् ।

साधयेत् प्रथमेनैव यन्त्रेण यत्नतः शिवे ॥ ५५ ॥

द्वितीयं दरदे कृत्वा प्रोक्तेषूच्चं गते रवौ ।

पूजयेत् प्रोक्तकालेन फलान्युक्तान्यवाप्नुयात् ॥ ५६ ॥

विलिख्य राजते पत्ते जपित्वा दिनशः स्पृशन् ।

सहस्रवारं तन्नित्याविद्यां तद्वासिताम्बुभिः ॥ ५७ ॥

स्नानं पानं पाकजातं कुर्यादुक्तदिनं ततः ।

प्रमेहैस्त्रिविधैर्घोरमूत्रकृच्छ्रैः सुदारुणैः ॥ ५८ ॥

अशरीमूत्रपाल्या दिरोगैर्मुक्तः सुखी भवेत् ।

जीवेच्च सुचिरं भूमौ नीरोगः स्वस्थमानसः ॥ ५९ ॥

तृतीयं गौरकैः कृत्वा वैरिनक्षत्रवृक्षजे ।

तले भूमौ ततः खात्वा तत्राग्निं ज्वालयेत् सदा ॥ ६० ॥

प्रोक्तैस्तैर्वासरैर्वैरी दाहज्वरगदादिभिः ।

तच्चोत्क्षिप्य सलिले न प्रक्षिपेच्चेद्विनश्यति ॥ ६१ ॥

चतुर्थं रोचनापङ्कैरालिख्योक्तप्रपूजनात् ।

प्राप्नोति विजयं प्रोक्तेष्वखिलेषु सुनिस्चितम् ॥ ६२ ॥

वादेषु द्विविधे द्युते ग्रहेष्वन्येषु सर्वतः ।

सर्वदा जयिनः सर्वे भन्त्येतस्य वैभवात् ॥ ६३ ॥

पञ्चमं कुङ्कुमैः कृत्वा तत्र तत्पूजनाद्दिनैः ।

वशे भवन्ति मनुजा दन्तिनो वाजिनः स्त्रियः ॥ ६४ ॥

षष्ठं हरिद्रयालिख्य कर्पटे नामसंयुतम् ।

मन्दोच्चे स्थापयेत् क्वापि सुवद्धन्त्विष्टकापुटे ॥ ६५ ॥

शत्रोर्जिह्वां गतिं शेषं दिव्यं राज्ञां समुद्यमम् ।

वादेच्छां सकलञ्चान्यदनिष्टं स्तम्भयेद् ध्रुवम् ॥ ६६ ॥

सप्तमं चन्दनैरिन्दुमिलितैरालिखेत्तथा ।

तत्रार्चयेन्नित्यशस्तां सन्ध्यासु भवने निजे ॥ ६७ ॥

तद्दिनैरिन्दिरा तस्य सर्वलोकातिशायिनी ।

भवत्येव महेशानि विचित्रा यन्त्रशक्तयः ॥ ६८ ॥

अष्टमन्त्वगुरुक्षोदैरालिखेत् फलकापुटे ।

पीठे वा तत्र तां देवीं गुरावुच्चं गते दिने ॥ ६९ ॥

तदुच्चकाले सुरभिप्रसूनैरर्चयेत्तथा ।

वासांसि च विचित्राणि भूषणान्यप्यवाप्नुयात् ॥ ७० ॥

मृगस्वेदैस्तु नवममालिख्याभ्यर्च्य तत्र ताम् ।

तदालिप्तो व्रजेद् यत्र कुत्रापि जनसंसदि ॥ ७१ ॥

सर्वे तं गुरुवद्बुद्ध्वा वश्याः स्युर्वनिता यदि ।

तदिष्टसाधिका यावज्जीवमस्यानुभावतः ॥ ७२ ॥

विलिखेद्दशमं प्रोक्तद्रव्यैः सर्वैस्तथैकशः ।

यद्यत्तैरीरितं सर्वं कार्य्यमेतत् सुसाधयेत् ॥ ७३ ॥

प्रोक्तेषु दशसु प्रोक्तद्रव्यैरालिख्य तेषु तु ।

संस्थाप्य कुम्भं विधिना जपित्वोग्रे ग्रहे तदा ॥ ७४ ॥

अभिषिञ्चेत्तद्ग्रहस्य दोषस्थानगतं फलम् ।

न भवेच्च भवेदेवं वशो यन्त्रेष्वशेषतः ॥ ७५ ॥

तथा तदुच्चे तत्पूजां होममन्त्राद्यपायसैः ।

निवेद्यञ्च प्रणम्याच्र्य दद्याच्छिवत्मवाप्नुयात् ॥ ७६ ॥

तत्तद्ग्रहार्त्तिषु क्षिप्रं ते ग्रहास्तत्प्रभावतः ।

एकादशस्थफलदा नित्यशो यजनादपि ॥ ७७ ॥

सुवर्णे रजते वा तद् ।यन्त्रेष्वन्यतमं शिवे ।

विलिख्याभ्यर्च्य तद्विद्याविदे दद्यात् सुपूजितम् ॥ ७८ ॥

षोडश द्वादश नव षट् त्रिनिष्कप्रकल्पितम्

नित्यार्चकस्य नित्यानामेकां पूजयतु तु वा ॥ ७९ ॥

दद्याद् गन्धादिनार्च्यैतं प्रणम्य ग्रहविग्रहम् ।

पश्चिमानुखमासीनं तस्मै प्रोक्तविधानतः ॥ ८० ॥

विद्याजप्ताम्बुपानेन वर्द्धते कुक्षिगोऽनलः ।

भुक्ते च जठरस्पर्शजपादपि मुनिश्चितम् ॥ ८१ ॥

मेषादिराशिगे भानौ मासेषु द्वादशस्वपि ।

प्रोक्तेषु दशयन्त्रेषु प्रत्येकञ्च त्रिवासरम ॥ ८२ ॥

पूजयेद्देवीमब्देन धनधान्यगृहादिभिः ।

समृद्धो जीवति चिरमरोगः सुमना भुवि ॥ ८३ ॥

यद्राशौ यो ग्रहस्तिष्ठत्येको द्वौ वहवोऽथवा ।

तद्दिनेषु तदुच्चेषु कालेषु च तदर्चनात् ॥ ८४ ॥

तत्तद्ग्रहाः सुसंप्रीताः पालयन्त्यनिशञ्च तम् ।

तथा तर्पणहोमाभ्यां जपदानादिनापि वा ॥ ८५ ॥

नवस्वपि च यन्त्रेषु नवग्रहमयत्नतः ।

तत्तत् क्षोभं विलिख्यान्तः पूजयेद्वैरिमर्दने ॥ ८६ ॥

रिपुनामयुतान्युक्तान्यालिख्य रविचन्द्रयोः ।

उपरागे समे भूमौ दिनशो जयमाप्नुयुः ॥ ८७ ॥

विद्याक्षरौषधानान्तु प्रत्येकं कर्षमर्पितम् ।

भाण्डे नवे पञ्चगव्ये स्वारिमाणे पचेच्च तत् ॥ ८८ ॥
विद्यया संस्कृते वह्नौ ततस्तदुदरोत्थिते ।
घृतेन विद्यया हुत्वा तद्भस्मादाय तत्र वै ॥ ८९ ॥
यन्त्राणि दश निष्पाद्य तत्र देवीं यजेत्तथा ।
ततस्तद्भस्म संह्य निदध्याद्दिनशोऽर्चयेत् ॥ ९० ॥
तद्भस्म सर्वरक्षाकृत् सर्वाभिरपि साधयेत् ।
गदचोरग्रहारिष्टक्लेशा न स्युश्च तद्गृहे ॥ ९१ ॥
नित्यशो धारणं देहे श्रीकण्ठाद्यैर्विलेपनम् ।
भक्षणं सर्वकृत्यादि दुरितार्त्तिविभञ्जकम् ॥ ९२ ॥
वह्न्यक्षरेषु दशसु व्यञ्जनैः सप्तभिः पृथक् ।
स्वरत्रयं क्रमाद् युञ्ज्यात्तेन तान्येकविंशतिः ॥ ९३ ॥
त्रिकोणद्वयमालिख्य बाह्याभ्यन्तरयोगतः ।
तदन्तर्वृत्तमध्यस्थं षडस्रञ्च विधाय तु ॥ ९४ ॥
नाम्नाद्यं विलिखेन्मध्ये षट्कोणेषु च षट् क्रमात् ।
विलिखेदग्रमारभ्य प्रादक्षिण्येन पार्वति ॥ ९५ ॥
त्रिकोणान्तरतो लिख्य चतुर्दश तथा क्रमात् ।
शिष्टे साध्याक्षरन्त्वग्रे लिखेत् पञ्चदशस्वपि ॥ ९६ ॥
क्रमेण मध्ये त्वन्येषां निवेशादेकविंशति ।
भवन्ति यन्त्राणि तथा तैः कुक्ष्यग्निः प्रवर्त्तते ॥ ९७ ॥

त्रिकोणाकारके पट्टे ताम्रे तानि विलिख्य वै

स्पृशन् विद्यां जपेल्लक्ष तद्वर्णकृतसम्पुटम् ॥ ९८ ॥

सतोयभाण्डे दिनशो निक्षिपेज्जपपूजितम् ।

तत्तोयेनान्नपाकाभिषेकतो भवति ध्रुवम् ॥ ९९ ॥

प्रदीप्तिर्जठराग्नेस्तु प्राग्जन्माघक्षयेन वै ।

जायते परमेशानि नित्यानां वैभवादिति ॥ १०० ॥

श्रोत्रतत्त्वमयी व्याप्तिरिति सम्यक् समीरिता ।

अस्या निष्फालनाच्चित्ते तत्तत्त्वं स्वात्मसात् कृतम् ॥ १०१ ॥

इति षोडशनित्यातन्त्रे श्रीकादिमते विंशतिपटलम् ।

एकविंशपटलम् ।

अथ षोडशनित्यासु या चित्रा षोडशी शिवे ।

प्रोक्ता तत्कल्पमधुना शृणु सर्वार्थसिद्धिदम् ॥१ ॥

विद्या प्रागेव कथिता तदङ्गन्यासससंयुतम् ।

ध्यानं शक्तिः पूजनञ्च साधनं तत्फलानि च ॥ २ ॥

होमतर्पणयन्त्रार्चभावनाः कथयामि ते ।

उपायैः पञ्चभिस्तैस्तैः साधयेदखिलेप्सितम् ॥ ३ ॥

विद्याद्यवायुना कुर्य्याद्दीर्घस्वरयुजा क्रमात् ।

षडङ्गानि यथापूर्वं मातृकां विद्यया न्यसेत् ॥ ४ ॥

उद्यदादित्यबिम्बाभां नवरत्नविभूषिताम् ।

नवरत्नकिरीटाञ्च चित्रपट्टांशुकोज्ज्वलाम् ॥ ५ ॥

चतुर्भुजां त्रिनयनां शुचिस्मितलसन्मुखीम् ।

सर्वानन्दमयीं नित्यां समस्तेप्सितदायिनीम् ॥ ६ ॥

चतुर्भुजां भुजैः पाशमङ्कुशं वरदाभये ।

दधानां मङ्गलापद्मकर्णिकानवयोनिगाम् ॥ ७ ॥

तच्छक्तिभिस्तु तच्चक्रे तथैवार्चनमीरितम् ।

नवयोनावष्टवर्गयुता ब्राह्मयादिका यजेत् ॥ ८ ॥

इच्छाज्ञानक्रियाशक्तीरर्चयेन्मध्यकोणतः ।

हेतीश्च परितो देव्याः पूजयेत्तद्भुजान्तिके ॥ ९ ॥

सर्वासामपि नित्यानां नाथान् देव्यास्तु पश्चिमे ।

पूजयेत्तत्तदाकारांस्तत्तन्मन्त्रैर्यथाविधि ॥ १० ॥

गुरुमण्डलपूजादि साधारणमुदीरितम् ।

सर्वासामपि नित्यानां तदाद्यास्यन्दजा इमाः ॥ ११ ॥

साधनञ्च तथा प्रोक्तं तदङ्गहवनन्तथा ।

एवं संसाधिता विद्या विनियोगाय कल्पते ॥ १२ ॥

काम्यहोमविधिं वक्ष्ये शृणु सर्वार्थदायकम् ।

येनातिमन्दभाग्योऽपि श्रीमान् भोक्ता सुखी भवेत् ॥ १३ ॥

मधुरत्रयसंसिक्तैररुणैरम्बुजैः श्रियम् ।

प्राप्नोति मण्डलाद्धोमात् सितैस्तैश्च महायशः ॥ १४ ॥

क्षौद्राक्तैरुत्पलैर्नीलैः क्तैर्हवनात् प्रोक्तकालतः ।

सुवर्णं समवाप्नोति निधिं वा च सुधान्तु वा ॥ १५ ॥

क्षौराक्तैः कैरवैर्होमात् प्रोक्तकालमवाप्नुयात् ।

धान्यानि विविधान्याशु सुभगः स भेवेन्नरः ॥ १६ ॥

आज्याक्तैरुत्प्लैर्होमाद्वाञ्छितं समवाप्नुयात् ।

तदक्तैरपि कह्लारैर्हवनाद्राजवल्लभः ॥ १७ ॥

पलाशपुष्पैस्त्रिखादुयुक्तैस्तत्कालहोमतः ।

चतुर्विधन्तु पाण्डित्यं भवत्येव न संशयः ॥ १८ ॥

लाजैस्त्रिमधुरोपेतैस्तत्कालहवनेन वै ।

कन्यकां लभते यत्नात् समस्तगुणसंयुताम् ॥ १९ ॥

नालिकेलफलक्षोदं ससितं सगुडन्तु वा ।

क्षौद्राक्तं जुहुयात्तद्वदयत्नाद्धनदोपमः ॥ २० ॥

तथैवान्नाज्यहोमेन सतण्डुलतिलैरपि ।

प्रसूनैररुणैस्तद्वत्तथा बन्धूकसम्भवैः ॥ २१ ॥

सितैः प्रसूनैर्वाक् सिद्धिं हवनात् समवाप्नुयात् ।

सितरक्तैस्तु मिलितैरायुरारोग्यमाप्नुयात् ॥ २२ ॥

दूर्वात्रिकैस्त्रिमध्वक्तैर्हवनात् जयेद् गदान् ।

तथा गुडुच्या होमेन पायसेन तिलेन वा ॥ २३ ॥

श्रीखण्डपङ्ककर्पूरमिलितैः शतपत्रकैः ।

हवनाच्छ्रियमाप्नोति सा तदन्वयगा भवेत् ॥ २४ ॥

कुङ्कुमं हिमतोयेन पिष्ट्वा कर्पूरसंयुतम् ।

तत्पङ्कमर्दितैर्होमात् कह्लारैर्विकचैः शुबैः ॥ २५ ॥

राजकल्पः श्रिया भूयाज्जिवेद्वर्षशतं भुवि ।

निःसम्पत्नो निरातङ्को निर्द्वन्द्वो निर्मलाशयः ॥ २६ ॥

इक्षुकाण्डस्य सकैर्हवनाद्वस्त्रमाप्नुयात् ।

तथैव करवीरोत्थैः प्रसूनैररुणैः सितैः ॥ २७ ॥

क्षौद्राक्तैः पाटलीपुष्पैर्हवनाद्वशयेद्वधूः ।

तद्वतैव चम्पकैर्हिमाद्रूपाजीवा वशं नयेत् ॥ २८ ॥

सरूपवत्सासितगोः क्षीराल्तसितहोमतः ।

लभतेऽनुपमां लक्ष्मीमपि पापिष्ठचेतनः ॥ २९ ॥

सौवीराक्तैस्तु कार्पासवीजैस्ततत्कालहोमतः ।

अर्धेन्दुकुण्डे नियतं विद्विष्टा रिपवोऽम्बिके ॥ ३० ॥

अरिष्टपत्रैस्तद्वीजैस्तत्तैलाक्तैस्तथा हुतैः ।

मृत्युवीजैर्निम्बतैलसिक्तैर्होमात्तु दन्तिनः ॥ ३१ ॥

रागाक्तैस्तुरगास्तद्वत्तत्पञ्चाङ्गैर्हुतैर्ध्रुवम् ।

अक्षबीजैस्तु तैलाक्तैर्होमः सर्वविनाशवान् ॥३२ ॥

करञ्जवीहैस्ततित्सक्तैर्होमाद्वैरिविनाशनः ।

तैथैवाक्षतरूद्भूतपञ्चाङ्गहवनादपि ॥ ३३ ॥

निम्बतैलाप्लूतैरक्षद्रूमवीजैस्तु होमतः ।

तद्दिने स्यादपस्मारी वैरी भवति निस्चितम् ॥ ३४ ॥

अरातेर्जन्मनक्षत्रवृक्षैश्च न गतैस्तले ।

तद्योनिपिशितैस्तैश्च हवनं मृत्युकृद्रिपोः ॥ ३५ ॥

यक्षाक्षविजैः सर्षपतैलाक्तैर्हवनात्तथा ।

जायन्ते वेरिणः कुष्ठरोगा देहविलापकाः ॥ ३६ ॥

मरीचैः सर्षपैर्धोमात्तैलाक्तैर्म्मध्यरात्रके ।

दाहज्वरेण ग्रस्तः स्यादरातिस्तद्दिनैर्ध्रुवम् ॥ ३७ ॥

एवं निग्रहहोमेषु स्वरक्षायै थतान्वहम् ।

स्निग्धैः सम्प्राप्तसिद्धिद्यैर्जपहोमादि कारयेत् ॥ ३८ ॥

मृतुञ्जयेन वा तद्वत् प्रयोगस्ताभिरेष च ।

विद्याभिरन्यथा सिद्धं मन्त्रमप्याशु नाशयेत् ॥ ३९ ॥

प्रागुक्तानान्तु कुर्व्वीत निग्रहं स्वस्य रोषतः ।

वित्ताशया वा न कदाप्याचरेद्भूतिकामुकः ॥ ४० ॥

नित्यक्लिन्नाविधौ प्रोक्तैस्तर्पणैस्तानि साधयेत् ।

अनया विद्यया कर्माण्यशेषाणि महेश्वरि ॥ ४१ ॥

अथ यन्त्राणि वक्ष्यामि नानाभीष्टप्रदानि वै ।

यैः सर्व्वे सर्व्वदा सर्व्वसमीहितमवाप्नुयुः ॥ ४२ ॥

स्वरयुक्तलिपिव्रातग्रभां विद्यां समालिखेत्।
सर्व्वत्रोक्तेषु विधिवत् स्थानेषु परमेश्वरि ॥ ४३ ॥
त्रिकोणं वृत्तयुग्मञ्च षट्कोणं तद्वयन्तथा।
तद्बहिः षड्दलं पद्मं तत्तत्रयञ्च संलिखेत्॥ ४४ ॥
आद्यकूटं लिखेत् साध्यं गर्भे मध्ये विधानतः।
त्रिकोणेषु च षट्कोणे षट्पत्रेषु समालिखेत् ॥ ४५ ॥
कूतान्यन्यानि चोक्तानि तत्र पञ्चदशान्यपि।
अन्तर्वृत्तान्तरद्वन्द्वे भूतार्णांश्च क्रियोचितान्॥ ४६ ॥
ससाध्यकर्म्मवर्णैश्च बहिर्वृत्तान्तरद्वये।
मातृकां विल्किखेन्मायाबिन्दुयुक्तां क्रमोत्क्रमात्॥ ४७ ॥
एवं षड्विंशतिविधं यन्त्रं कुर्य्याद्विचक्षणः।
परस्तात्तु शतेनापि षष्ट्या कूटैर्लिखेत् पविम्॥ ४८ ॥
प्राक्प्रत्यग्दक्षिणोदक्क सूत्राण्यष्टादश क्षिपेत्।
तैस्तु कोष्ठानि जायन्ते नवाशीतशतद्वयम्॥ ४९ ॥
तत्र कोणेषु कोष्ठानि द्वत्रिंशन्मार्जयेत्तथा।
ततो वज्रं भवेन्मध्ये त्वेकषष्ट्या शतात्मकम्॥ ५० ॥
तस्य दिक्षु त्रिकोणानि विदध्यादेककोष्ठतः।
मध्यकोष्ठे लिखेद्विद्यां साध्याख्याकर्म्मसंयुताम्॥ ५१ ॥
त्रिकोणेषु तु तत् कूटान्यालिखेत् साध्यवन्ति च।

प्राग्वदारभ्य विलिखेत् प्रादक्षण्यप्रवेशतः ॥ ५२ ॥

एतद्वज्रं महद्यन्त्रं समस्तापन्निवारणम् ।

समस्ताभीष्टदं सर्व्वविजयश्रीपदं शुभम् ॥ ५३ ॥

सप्तविंशतिरुक्तानि यन्त्राण्येवं महेश्वरि ।

सप्तविंशति नक्षत्रसमान्येतानि चेदपि ॥ ५४ ॥

* * * * * * * *

॥ ५५ ॥

फानि तेषां क्रमशो वदाम्युक्तक्रमेण वै ।

विनियोगक्रमञ्चैव सुस्फुटं प्रमेश्वरि ॥ ५६ ॥

प्रथमेनार्च्चितेन स्याद्रोगा नशान्त्यशेषतः ।

स्ववेश्मनि विधायेतत् पीठे भूमितलेऽपि वा ॥ ५७ ॥

प्रोक्तद्रव्याणि संपिष्य तत्पङ्केनाथ सुस्फुटम् ।

त्रिरात्रं सप्तरात्रं वा सप्तविंशतिरात्र्कम् ॥ ५८ ॥

सम्पूज्य तत्र कुम्भन्तु विद्यौषधिजलान्वितम् ।

निधायाभ्यच्चर्य गदिनमभिषिञ्चेत्ततः सुखी ॥ ५९ ॥

एवमन्यानि यन्त्राणि प्रोक्तेषु विनियोजयेत् ।

तेषां विलेखनद्रव्याण्याकर्णय वदामि ते ॥ ६० ॥

कुचन्दनं चन्दनञ्च सिन्दूरं सेन्दुरोचनम् ।

काश्मीरमगुरुं कुष्ठं एलाकक्कोलजातिभिः ॥ ६१ ॥

स्वर्क्षवृक्षैर्द्वादशभिर्हिमाम्बु परितोषितैः ।

जलैर्नक्षत्रवृक्षोत्थैः शुभैर्ब्बा सूक्ष्मपेषितैः ॥ ६२ ॥

द्वितीयं विजयं प्रस्यै विदध्यात् प्रोक्तरूपतः ।

वादे विवादे समरे द्यूतेषु च जयी भवेत् ॥ ६३ ॥

तृतीयाद्येषु नवसु ग्रहान्नव समर्च्चयेत् ।

देव्यात्मरूपात्तेनास्य तैर्ब्बाधा  न भवेद् ध्रुवम् ॥ ६४ ॥

स्तम्भयेद्द्वादशेनाशु प्रोक्तक्रमविधानतः ।

संग्रामगमनं वर्षामुद्योगं वाचमाग्रहम् ॥ ६५ ॥

त्रयोदशाद्यैर्वज्रान्तैर्यन्त्रैस्तिथिमयैरपि ।

तत्तत्तिथिषु तैः प्राफ्वद्वाञ्छितानाप्नुयाद् ध्रुवम् ॥ ६६ ॥

तेषु तेषु तु यन्त्रेषु तत्तत्तिथिदिनाधिपान् ।

वारेशानपि संपूज्य  तत्तत् फलमवाप्नुयात् ॥ ६७ ॥

कार्य्योद्योगेषु जातेषु वाञ्छितेष्वितरेष्वपि ।

वारर्क्षतिथिसंप्रोक्तयन्त्रे तां तैश्च दैवतैः ॥ ६८ ॥

आवृत्तामर्च्चयेदग्निरक्षोवाय्वीशदिग्गतैः ।

रोगशान्तिं समुद्योगफलाभीष्टान्यवाप्नुयात् ॥ ६९ ॥

वाराणामधिपाः प्रोक्तस्तिथिनक्षत्रदेवताः ।

ऋक्षवृक्षांस्तथा योनी निगदे परमेस्वरि ॥ ७० ॥

वह्निर्दस्त्रावुमा विघ्नो भुजङ्गा षन्मुखो रविः ।

मातरस्च तथा दुर्गा दिशो धनदकेशवौ ॥ ७१ ॥

यमो हरः शशी चेति तिथीशाः परिकीर्त्तितः।
नक्षत्रदेवताश्चापि शृणु वक्ष्ये यथाविधि॥ ७२॥
अश्विनौ च यमो वह्निर्धाता चन्द्रः शिवऽदितिः।
गुरु सर्पाश्च पितरः अर्य्यमा भग एव च॥ ७३॥
दिनकृच्च तथा त्वष्टा मारुतेन्द्राग्निमित्रकाः।
इन्दो निऋृतितोयाख्यौ विश्वदेवा हरिस्तथा॥ ७४॥
वसवो वरुणः पश्चादज एकपदस्तथा।
अहिर्ब्रध्नगस्तथा पूषा प्रोक्ता नक्षत्रदेवताः॥ ७५॥
कारस्करचामलकोदुम्बरो जम्बुकस्तथा।
खदिरः कृष्णवंशि च पिप्पलो नागरोहिणी॥ ७६॥
पलाशप्लक्षकाम्बष्ठबिल्वार्ज्जुनकिकङ्कताः।
वकुलः सरलः सर्जो वञ्जुलः पनस्तथा॥ ७७॥
अर्कः शमी कदम्बश्च चूतो निम्ब स्तथाऽन्तिमे।
मधूकश्चेति संप्रोक्ता वृक्षा भानां क्रमादमी॥ ७८॥
अश्वगजमजसर्पसर्पिणीश्वबिडालिकाः।
अजामार्जारमूषाश्च मूषिका वृषमाहिषी॥ ७९॥
व्याघ्रस्च महिषो व्याघ्री मृगी मृगशुनी कपिः।
गोकर्णो वानरी सिंही तुरगा सिंहगोगजाः॥ ८०॥
यदा रोगादि दुःखार्त्तिर्भवेत्तदर्द्धकौदिनैः।

मूहुर्तैः संख्ययाहोभिः शान्तिः स्याद्द्विगुणेन वा ॥ ८१ ॥

आधारे पञ्च यन्त्राणि स्वाधिष्ठाने चतुष्टयम् ।

प्रोक्तेषु भावयेत्तनि तावन्ति मणिपूरके ॥ ८२ ॥

अनाहते ततः पञ्च यन्त्राणि परिभावयेत् ।

विशुद्धाख्ये च चत्वारि पञ्चाज्ञायामिति क्रमात् ॥ ८३ ॥

तत्तत्तिथिदिनेष्वेवं भावयेत् षोडशीं शिवाम् ।

तत्तच्चक्रगताः सर्वा भावयेत् सर्वसम्पदे ॥ ८४ ॥

आधारादिषु चक्राणि भावयेदुक्तयोगतः ।

नतु सर्वत्र सर्व्वाणि भावयेन्न कदाच ॥ ८५ ॥

भावनायामशक्तानां तत्तद्यन्त्राद्बहिस्तुथा ।

प्रोक्तान्याधापद्मानि कृत्वा तत्रार्चयेच्छिवाम् ॥ ८६ ॥

एवं दिनेषु वारेषु नक्षत्रेषु त्रिषु क्रमात् ।

संपूज्य देवीमिष्टानि प्राप्नुयात् प्रोक्तवासरैः ॥ ८७ ॥

बलिञ्च दद्यात्तेष्वेव वासरेषु यथाविधि ।

पञ्चाशन्मिथुनानाञ्च प्रोक्तचक्रेऽर्द्धरात्रके ॥ ८८ ॥

मध्याह्ने सन्ध्ययोश्चापि चक्रस्थानामपीश्वरि ।

मिथुनोक्तक्रमे शक्तिमन्त्रवच्चक्रगामिनाम् ॥ ८९ ॥

कूटानां मन्त्ररूपाणि प्रोक्तानि स्फुटमीश्वरि ।

तैस्तेषां तेषु कालेषु बलिं दद्यात्तथेरितैः ॥ ९० ॥

देव्यास्त्वनुग्रहप्रोक्तनिवेद्यैः शिक्थकं महत्।
विधाय तस्य मध्ये तु कृत्वा दीपं घृताप्लुतम्॥ ९१॥
विधाय तत्तन्मन्त्रैस्तु विदध्यात्तान्यनुक्रमात्।
प्रत्येकं देवतानां वा मिथुनानामथापि वा॥ ९२॥
दद्यादपूपपनसमोचाघृतगुडान्वितम्।
कुल्माषपायसान्नेन व्यञ्जनं छागमांसयुक्॥ ९३॥
इत्थं कार्य्यस्य गुरुतालाघवापेक्षया दिनैः।
साधयेत् सप्तभिः पक्षान्मासान्मण्डलतोऽपि वा॥ ९४॥
मिथुनानां बलिं दद्यात् प्रतिमासं गृहेऽर्च्चयेत्।
प्रत्यब्दं वा गृहे मन्त्री जीवदाद्यामहोदयः॥ ९५॥
एवं कालात्ममिथुनवलिदानेन पूजनात्।
स्मरणात् कीर्त्तनात् सर्व्वाञ्छितानाप्नुयुर्नराः॥ ९६॥
मिथुनानाम् बलिद्रव्याण्याकर्णय महेश्वरि।
यैस्तुष्टिं प्राप्य तान्याशु प्रयच्छन्त्यभिवञ्छितम्॥ ९७॥
दशानां पायसं दद्याद्दशानान्तु गुडोदनम्।
पञ्चानां मुद्गभिन्नान्नं पञ्चानां दधिभक्तकम्॥ ९८॥
दद्यादपूपं पञ्चानां पञ्चानां क्षीरशर्करे।
पञ्चानां नारिकेलस्य फलक्षोदं गुडान्वितम्॥ ९९॥
पञ्चानां सितभक्ताभ्यां मोचाफलमुदीरितम्।

मिथुनार्चारतो नित्यं योऽसौ स्यान्मान्त्रिकाग्रणैः ॥ १०० ॥

अहङ्कारमयी व्याप्तिरिति सम्यक् समीरिता ।

अस्या निफालनाच्चित्ते तत्तत्त्वं स्वात्मसात् कृतम् ॥ १०१ ॥

इति नित्यातन्त्रे श्रीकादिमते एकविंशतिपटलं परिपूर्णम् ।

## द्वाविंशपटलम् ।

अथ षोडशनित्यानां या प्रोक्ता बलिदेवता ।

सा विद्या कुरुकुल्लायाः पञ्चविंशाक्षरोदिता ॥ १ ॥

सैव त्रिखण्डा तत्रैव प्रोक्ता विद्या तु संख्यया ।

सप्तभिः प्रथमा प्रोक्ता त्रयोदशयुता पुरा ॥ २ ॥

तृतीया सा पञ्चविंशदक्षरा सकलेष्टदा ।

एवं सा त्रिभिरप्येतैर्विद्यारूपैरभीष्टदा ॥ ३ ॥

इक्ष्वराघृतदुग्धाब्धिमध्यगे नवरत्नके ।

द्वीपे तां ललितां नित्यविनोदानन्दितां यजेत् ॥ ४ ॥

तत्तीरे पूजयेद्देवीं पञ्चमीं तीरपालिकाम् ।

तत्सागरेषु परितो रत्नपोतचरीं यजेत् ॥ ५ ॥

तदाज्ञया रत्नपोतं तन्नाम्नैव समर्चयेत् ।

बलिचक्रञ्च तेनैव तन्मध्ये च समर्चयेत् ॥ ६ ॥

पूर्वपश्चिमदिग्द्वारसंयुतं चतुरस्रकम् ।

कृत्वा तदन्तः पद्मञ्च साष्टपत्रं सकर्णिकम् ॥ ७ ॥

कर्णिकायां चारु कृत्वा नवयोनिं समर्च्चयेत् ।

षडङ्गं वाल्या कृत्वा तेनार्घ्यमपि साधयेत् ॥ ८ ॥ ॥९ ॥

त्रिखण्डमुद्रया मूलमन्त्रेणाद्येन चावहेत् ।

ध्यात्वत्थां परिवारैस्तां देवीं गन्धादिभिः क्रमात् ॥ १० ॥

विकीर्णकुन्तलां नग्नां रक्तामानन्दविग्रहाम् ।

दधानां चिन्यौद्वाणं चापपाशतुणीः करिः ॥ ११ ॥

तत् समानायुधाकारवर्णा देव्यस्तु वाह्यगाः ।

ऋतुस्नाताः स्फुरद्योन्यः सदानन्दारुणेक्षणाः ॥ १२ ॥

हृल्लेखया स्थापनादीनपुरचारान् समाचरेत् ।

ततस्तदाज्ञया रोहे भ्रमिणीं द्राविणीं यजेत् ॥ १३ ॥

पस्चिमाद्वारमारभ्य दक्षशाखादि पूजयेत् ।

सूर्य्यसोमं तिथिवारं योगर्क्षकरणान्यपि ॥ १४ ॥

यक्षिणीश्च तथा तारां पूर्वद्वारस्य शाखयोः ।

व्योमवाय्वग्नितोयक्ष्मारूपिणीशक्तिसंयुतम् ॥ १४ ॥ ? 14 number repeated

शब्दस्पर्शञ्च रूपञ्च रसगन्धञ्च पूर्ववत् ।

घ्राणान् बुद्धि तथाशक्तिमष्टपत्रेषु पुजयेत् ॥ १५ ॥

तदन्तरष्टकोणेषु वाग्देव्यष्टपत्रेषु पूजयेत् ।

ततो बाणान् धनुःपाशमङ्कुशञ्चाभितो यजेत्॥ १६॥

मध्यत्रिकोणकोणेषु सेच्छाज्ञानक्रियात्मिकाः।

शक्तीर्यष्ट्वाथ तन्मध्ये सम्बिदासनमर्च्चयेत्॥ १७॥

ततस्तं पञ्चविंशार्णमूलमन्त्रेण पूजयेत्।

ततस्ताज्ञया पोतपरीतं द्वीपमागतः॥ १८॥

पश्चिमं पुष्परागञ्च संप्राप्यावतरेत् क्रमात्।

परीयमाणे दिक्ष्वेतानर्च्चयेत्तत्र तत्र वै॥ १९॥

इक्ष्वराघृतदुग्धाब्धीन् पस्चिमादि विलोमतः।

नमोऽन्तैर्नामभिः पूर्व्वं पूजयेद्गन्धपुष्पकैः॥ २०॥

नवरत्नमयं द्विपमित्यादि प्रागुदीरितम्।

एवं समर्च्चितं देव्या ललितायाः प्रियङ्करम्॥ २१॥

एवं देवी पूजयितुः शीघ्रं बहु मनीषितम्।

प्रसीदति यतस्तस्मात् पूजयेदेवमीश्वरि॥ २२॥

देवीनां कुरुकुल्लान्तु तोयादुपरि पूजयेत्।

पञ्चविंशार्णमूलेन पूजान्ते परमेश्वरि॥ २३॥

देव्या बलिः समाख्यातस्ताराशक्तेस्तु विद्यया।

तां शृणु त्वं प्रिये वच्मि ताराविद्यां दशाक्षरीम्॥ २४॥

भूः स्वेन मरुता युक्तो रयो दाहस्चरान्वितः।

रयो धरान्वितः पस्चाद्रययुग्मं मरुद्युतम्॥ २५॥

एतत्तृतीयं षष्ठं स्याच्चतुर्थं सप्तमं भवेत्।
षष्ठं तदष्टमं विद्यात् हृदम्बुमरुदन्वितम्॥ २६॥
हंसश्च मरुता युक्तः प्रोक्ता विद्या दशाक्षरी।
अनयास्य बलिं दद्याद्विद्यया परमेश्वरि॥ २७॥
ध्यानं देव्याः शृणु प्राज्ञे समस्तापन्निकृन्तनम्।
अस्यास्तोयेषु सर्व्वत्र बाधो न भवित् स्मृतेः॥ २८॥
श्यामवर्णां त्रिनयनां द्विभुजां वरपङ्कजे।
दधानां बहुवर्णाभिर्व्वहुरूपाभिरावृताम्॥ २९॥
शक्तिभिः स्मेरवदनां रत्नमौक्तिकभूषणाम्।
रत्नपादुकयोः न्यस्तपदाम्बुजयुगां स्मरेत्॥ ३०॥
होमं कुर्य्यान्नित्यशस्तु घृताक्तैरक्तपुष्पकैः।
सुगन्धिभिः सितैः पुष्पैरन्नाज्याभ्यां घृतेन वा॥ ३१॥
प्राग्वद्व्रतयुतो विद्यां पञ्चविंशति लक्षकम्।
जपित्वा पूजयेत् सन्ध्यास्वथ तर्पणहोमकम्॥ ३२॥
कुर्य्यान्नित्योदितेष्वन्यतमेन हवनक्रियाम्।
एवं संसिद्धविद्यस्तु नित्यार्च्चानिरतस्तथा॥ ३३॥
प्रयोगानाचरेद्भक्त्या काम्यान् प्रोक्तक्रमेण वै।
होमेन पूजया यन्त्रभावनेन च तान् शृणु॥ ३४॥
घृताक्तैः सर्षपैर्होमाद्वशयेद्धुताजनम्।

सर्षपस्नेहसंसिक्तैर्मरिचैरानयेच्च ताः ॥ ३५ ॥
तैलाक्तैस्तु तिलैर्होमान्मध्यरात्रे यथाविधि ।
नारीनरनृपानन्यान् वशयेद् यावदायुषम् ॥ ३६ ॥
अजाघृताक्तैर्बन्धूककुसुमैर्मध्यरात्रके ।
हवनाद्वनिताः सर्व्वा मोहयेत् प्रेमकौतुकैः ॥ ३७ ॥
क्षीराक्तैर्मल्लिकापुष्पैर्हवनाद्ब्राह्मणान्नृपान् ।
वशयेच्छतपत्रैश्च तथा विचकिलैः शुभैः ॥ ३८ ॥
सवत्ससितगोदुग्धसमेतैर्नारिकेलजैः ।
फलक्षोदैः सितयुतैर्हवनात् स्वर्णमाप्नुयात् ॥ ३९ ॥
नारिकेलफलक्षोदैर्गुडक्षौद्रघृताहुतैः ।
प्रागुक्तकालतो बित्तनिचयं समवाप्नुयात् ॥ ४० ॥
कदलीफलहोमेन स्यादाद्योऽम्बुजहोमतः ।
कह्लारहोमतोऽभीष्टं लभते कुमुदद्वयैः ॥ ४१ ॥
उत्पलैः पूजयेद्देवि समस्तापाद्विमुक्तये ।
पद्मैः सितैर्लोहितैश्च पूजयेदन्दिराप्तये ॥ ४२ ॥
कुमुदाभ्यां यजेद्वित्तलाभकामनया तथा ।
जपबन्धूककुसुमैस्तथा दाडिमजैरपि ॥ ४३ ॥
सौगन्धिकैर्विचकिलैः कुटुजैःशतपत्रकैः ।
पुन्नागजैः पाटलैश्च चम्पकोत्थैर्यजेच्छिवे ॥ ४४ ॥

सप्तभिः सप्तवारेषु भास्करादिषु पूजयेत् ।
प्रोक्तकालेषु वित्ताढ्यो धराधान्यांशुकादिमान् ॥ ४५ ॥
चन्दूनैरर्च्चयेन्नित्यं समस्तमपि वाञ्छितम् ।
लभते प्रोक्तकालेन तथा कालागुरुद्रवैः ॥ ४६ ॥
कुङ्कुमैर्नित्यशः पूजां कुर्य्यात् सौभाग्यसिद्धये ।
कर्पूरैरायुषः सिद्धै वश्यस्त्रीधनसिद्धये ॥ ४७ ॥
मृगस्वेदमदाभ्याञ्च पूजयेन्मासमात्रकम् ।
कन्दर्पसमसौभाग्यो वनितासु नरो भवेत् ॥ ४८ ॥
एलालवङ्गकक्कोलजातिभिर्नित्यशो यजेत् ।
अब्दमात्रं ततो लोके विश्रुतः स्यात् स वैभवैः ॥ ४९ ॥
कर्पूरशकलैः पूजा सर्व्वाभीष्टप्रदा भवेत् ।
पूजितैस्तैस्तु जग्धैः स्यान्नरोयात्यखिलप्रियः ॥ ५० ॥
वृत्तत्रयं तथाष्टारमब्जं तन्मध्यस्तथा ।
नवयोनिं विधायात्र मध्ये मायां ससाध्यकाम् ॥ ५१ ॥
आलिख्याष्टसु कोणेषु मन्त्रार्णाष्टकमालिखेत् ।
बहिर्दलेष्वपि तथा लिखेद्द्वद्विक्रमेण वै ॥ ५२ ॥
बहिर्मातृकया मायास्वगया प्रतिलोमया ।
क्रमेण चाभिसांवेष्ट्य तेन यन्त्रेण साधयेत् ॥ ५३ ॥
समस्तवाञ्छितं पूजाधारणस्थापनादिभिः ।

यन्त्रं रोचनयालिख्य भूर्जे वा क्षौमखण्डके ॥ ५४ ॥
गुलिकीकृत्य सिक्थस्य मध्यगं तद्विधाय तु ।
तापयेद्रात्रिषु दिनैः प्रागुक्तैः स्त्रियमानयेत् ॥ ५५ ॥
दरदेन विलिख्यैतत् पटे वा फलकोदरे ।
तत्र देवीं समावाह्य पूजयेत्तैर्दिनैर्भवेत् ॥ ५६ ॥
वशे त्रिभुवनं सर्व्वं नरनारीनृपादिकम् ।
गजवाजितरक्षादितिर्य्यग्जातीरपि ध्रुवम् ॥ ५७ ॥
तद्यन्त्रं सिन्धुतीरे वा नदीतीरेऽथवा लिखेत् ।
गौरकेण समावाह्य देवीं तत्रैव पूजयेत् ॥ ५८ ॥
समस्तरोगदुःखार्त्तिशान्तिः स्यादुदितैर्दिनैः ।
लाभाश्च पूजनात्तत्र  पशुदासीधनादिनाम् ॥ ५९ ॥
तद्यन्त्रं चन्दनैः कृत्वा पीठे तद्दिनपूजनात् ।
पुत्रपौत्रकलत्राज्ञाधनधान्यादिमान् भवेत् ॥ ६० ॥
तद्यन्त्रं हेमरूप्ये वा भूर्जे बालिख्य धारणात् ।
समस्तरोगदुःखार्त्तिरहितो वर्द्धते सुखी ॥ ६१ ॥
प्राक्प्रत्यग्दक्षिणोदक्क सूत्रषट्कनिपातनात् ।
कोष्ठेषु पञ्चविंशत्सु त्रीणि कोणेषु मार्जयेत् ॥ ६२ ॥
कोष्ठैर्व्वज्रं ततः शेषैस्त्रयोदशभिरीरितम् ।
तन्मध्ये शक्तिमायास्थामालिख्याख्यां ततोऽभितः ॥ ६३ ॥

लिखेद्विद्यां ततस्तस्मिन् पूजयेदर्द्धरात्रके ।
वाञ्छितां वनितां मानकुललज्जातिलङ्घिनीम् ॥ ६४ ॥
तृणराजदले कृत्वा यन्त्रं सर्षपरिङ्गुभिः ।
पट्टशुण्ठीमागधिकामरिचार्कपयोयुतम् ॥ ६५ ॥
निशासु सिक्थगं दीपवह्नौ सन्तापयेज्जयम् ।
विद्यां त्रयोदशार्णान्तु तद्दिग्वक्त्रो दिनैः स्त्रियम् ॥ ६६ ॥
आकर्षयेन्नवागच्छेत्तत्र कामज्वराञ्छनैः ।
अवस्थाभिश्च दशभिर्मृतिमेति सुनिश्चतम् ॥ ६७ ॥
भूर्जे तालदले वा तदालिख्य स्पष्टविग्रहम् ।
मधूच्छिष्टप्रतिकृतैः ऋजु तं तापयेत्तथा ॥ ६८ ॥
नरनारीनृपश्चान्यं प्राणिनां स्नेहविह्वलाम् ।
करोति यावदेहान्तं ते प्रतीपा लपन्ति च ॥ ६९ ॥
कज्जलिर्यन्त्रमालिख्य भूर्जे त्तौमे सितेऽथवा ।
जपित्वा धारयेत् सर्वरोगदुःखार्त्तिनाशनम् ॥ ७० ॥
गैरिकैश्चन्दनोपेतैरालिख्य विमलाम्बरे ।
तदा स्त्रियः शयानस्य वैरिण्यो दाससन्निभाः ॥ ७१ ॥
वृत्तद्वयान्तराकृत्वा षट्कोणं तस्य मध्यतः ।
भूः स्वगर्भगतं नाम विलिख्यास्त्रिषु षट्स्वपि ॥ ७२ ॥
षडक्षराणि विलिखेत् सप्ताक्षर्य्याः क्रमेण वै ।

यन्त्रमेतत्तालपत्रे भूर्जेक्षौमेऽर्कपत्रके ॥ ७३ ॥

प्रजप्य विद्यामयुतं वल्मीके निक्षपेच्च तत् ।

तत्र स्थिता ? वेभुजगाः ?

पलायन्तेऽथ तद्दिने ॥ ७४ ॥

तदूर्म्मिकादौ संलिख्य संजप्याभ्यच्चर्य कुत्रचित् ।

विधाय नित्यशः पूजासमेते रक्षतो गृहे ॥ ७५ ॥

भूतप्रेतपिशाचापस्मारवेतालराक्षसाः ।

यक्षगन्धर्वभुजगवृश्चिकाद्या न तत्र वै ॥ ७६ ॥

तल्लिख्वा कुम्भसलिले जपित्वा विद्ययानया ।

सहस्रवारं सलिलैरासेकः ध्वेडनाशनः ॥ ७७ ॥

तत्पीतं जठरे प्राप्तमशेषं नाशयेद्विषम् ।

देहगं प्रमेशानि त्रिविधं भौषणात्मकम् ॥ ७८ ॥

तद्विलिख्य नखाग्रेण नारिकेलदले स्मरन् ।

तद्रूपं फणिनं विद्याजपपूर्व्वं नखादिना ॥ ७९ ॥

पीडनात् पाटनाद्रोगी पीडितः पाटितो भवेत् ।

एवं सर्व्वं त्रिप्रकारं गरलं नाशयेदिदम् ॥ ८० ॥

वालुकासु समालिख्य यन्त्रमभ्यच्चर्य देवताम् ।

तत्र तैर्वेष्टयेत् सप्त भोगिनं न व्रजेद्बहिः ॥ ८१ ॥

अनावृत्तानि विद्यायामक्षराणि त्रयोदश ।

तैः षोडशस्वरोपेतैः संख्याष्टौ च शतद्वयम्॥ ८२॥

तानि पूर्व्वाद्ययन्त्रे तु विलिखेन्मध्यतो द्वयम्।

बहिः प्राग्वत्ततस्तैः स्याद् यन्त्राण्यष्टौ महेश्वरि॥ ८३॥

तेष्वाद्यं सर्व्ववारेषु विनियुञ्ज्यादुदीरिते।

द्वितीयादीनि यन्त्राणि सप्त भान्वादिवासरे॥ ८४॥

विनियुञ्ज्यात् प्रोक्तकर्म्मस्वाख्यालेखनपूर्व्वकम्।

वाराख्यां सप्तमीयुक्तामालिखेत् साधयेति तत्॥ ८५॥

वश्याकर्षणशान्त्याप्त्यै विदध्यादाद्ययन्त्रतः।

प्रोक्तक्रमेण विधिना शान्तिमर्चनतस्तथा॥ ८६॥

सप्तमं पूजितं क्वापि स्थापितं पोतगर्भके।

तन्नाशयन्ति तत्पोतमधौ सर्व्वं तथा शिवे॥ ८७॥

तथा वारेषु तेषूक्तान्यालिख्याभ्यर्च्चयेच्छिवाम्।

वाञ्छितेषु समस्तेषु तैर्दिनैस्तान्यवाप्नुयात्॥ ८८॥

रोगशान्तिं जयं लाभं नानाभीष्टार्थविग्रहम्।

शत्रुभङ्गं वशं नारीनृपमर्त्त्यादिजन्मिनाम्॥ ८९॥

प्राक्प्रत्यग्दक्षिणोदक्कसूत्राण्यास्फालयेत् क्रमात्।

द्वाविंशतिं ततस्चैकचत्वारिंशच्चतुःशतम्॥ ९०॥

तेषु कोणेषु परितो मार्जयेत् पूर्ववत् क्रमात्।

पञ्चपञ्चाशदन्यानि कोष्ठवज्र महेश्वरि॥ ९१॥

शतद्वयं चैकविंशं तेषु दिक्षु त्रिकोणकम् ।
मध्येऽवशिष्टनवकमध्ये नामोदरां लिखेत् ॥ ९२ ॥
मायां तदभितो मन्त्रवर्णांस्त्रिस्त्रिःक्रमेण वै ।
त्रिकोणेषु च साध्यानि लिखेद्वज्रमितीरितम् ॥ ९३ ॥
तद्वज्रयन्त्रे तु पटे क्षौमे वा सुसिते शुभे ।
विलिख्याभ्यर्च्चय ततयन्त्रं पोते रक्षति वारिधौ ॥ ९४ ॥
प्रागुक्तानि समस्तानि साधयेद्वज्ररूपिणा ।
यन्त्रेणानेन कालेन प्रोक्तेन सततं शिवे ॥ ९५ ॥
तां देवीं पाशसम्बद्धं साध्यमङ्कुशताडनात् ।
आकर्षन्तीं स्वपादान्ते साञ्जलिं प्रणतिं मुहुः ॥ ९६ ॥
रक्ष रक्षेति भाषन्तं स्मरन् विद्यां जपन्निशि ।
माध्यो नरोथ नारी च वशमेति सुनिश्चितम् ॥ ९७ ॥
अथवा साञ्जलिं साध्यं प्राग्वद्वादिनमङ्कुशे ।
प्रोतकेशसमाकृष्टं जपेत् प्राग्वद्वशी भवेत् ॥ ९८ ॥
मन्त्राक्षराणां तेजोभिः परीतं वा तथाविधाम् ।
स्वयमेवानयेत्तान्तु स्मरन् जापैर्व्वशं नयेत् ॥ ९९ ॥
एवं सा कुरुकुल्ला ते प्रोक्ता सर्व्वार्थसाधिका ।
ललिताविग्रहा येन वशिन्यादियुता ततः ॥ १०० ॥
बुद्धितत्त्वमयी व्याप्तिरिति सम्यक् समीरिता ।

अस्या निफालनाच्चित्ते तत्तत्त्वं स्वात्मसात् कृतम्॥ १०१॥

इति षोडशनित्यातन्त्रे श्रीकादिमते द्वाविंशत पटलम्॥ २२॥

त्रयोविंशपटलम्।

अथ षोडशनित्यानामङ्गभूता तु पञ्चमी।

तद्विधा कथिता पूर्वं तदङ्गानि च पूजनम्॥ १॥

साधनं सिद्धमन्त्रस्य प्रयोगध्यानपूजनैः।

होमैर्यन्त्रैश्च वक्ष्यामि समस्ताभीष्टसिद्धये॥ २॥

अङ्गानि कृत्वा मन्त्रार्णैः सप्तभिः षड्द्युगेन च।

दशभिः सप्तभिः सप्तसंख्यैर्जातिभिरन्वितम्॥ ३॥

त्रिकोणवृत्तषट्कोणवृत्तद्वयसमन्वितम्।

विधाय चक्रं तत्रैव् स्वनाम्नावाह्य पूजयेत्॥ ४॥

दशोत्तरशताक्षर्य्या वाराहीविद्यया प्रिये।

सर्वमध्ये समभ्यच्चर्य वामदक्षाग्रकोणतः॥ ५॥

क्रोधिनीं स्तम्भिनीं चण्डोच्चण्डाञ्चैव स्वनामभिः।

आद्यबीजान्त्यसप्राणैरुपेतामथ पूजयेत्॥ ६॥

षट्सु कोणेषु स्वाग्रादिब्राह्म्याद्या वामतोऽर्च्चयेत्।

वृत्ते चैव महालक्ष्मीं पञ्चमीं मध्यतस्तथा॥ ७॥

बलिन्तु षोडशार्णेन कृत्वाभ्यच्चर्योपचारकैः।

तदग्रे तां जपेद्विद्यां सहस्रमथवा शतम् ॥ ८ ॥

होमञ्च कुर्य्याद्दिनशः सुशुद्धैस्तिलतण्डुलैः ।

घृतेन वा ततो विद्या सिद्धा स्यादष्टतस्ततः ॥ ९ ॥

जितेन्द्रियो हविष्याशी मौनी सन्ध्यासु पूजयम् ।

विद्यां जपेल्लक्षसंख्यां तद्दशांशेन तर्पणम् ॥ १० ॥

अर्च्चनं हवनं कृत्वा सिद्धमन्त्रो दयान्वितः ।

गुरुभक्तः सुसन्तुष्टः शान्तचित्तः क्षमान्वितः ॥ ११ ॥

प्रयोगानाचरेद्भक्त्या यैरिष्टमखिलं क्षणात् ।

सिध्यत्ययत्नतो देव्याः प्रसादाद्वैभवादपि ॥ १२ ॥

ध्यायेच्च देवीं कोलास्यां तप्तकाञ्चनसन्निभाम् ।

आकण्ठं वनितारूपां ज्वलत्पिङ्गशिरोरुहाम् ॥ १३ ॥

त्रिनेत्रामष्टहस्ताञ्च चक्रसङ्खमथाम्बुजम् ।

पाशञ्च मुशलं शीरमभयं वरदं तथा ॥ १४ ॥

दधानां गरुडस्कन्धे सुखासीनां विचिन्तयेत् ।

नित्यपूजासु तच्छक्तीस्तत्समानाः स्मरेच्छिवे ॥ १५ ॥

प्रयोगेषु स्मरेद्देवीं सिंहस्थां व्याघ्रगामपि ।

गजारूढां हयारूढां तार्क्ष्यारूढाञ्च शक्तिभिः ॥ १६ ॥

श्यामामप्यरुणां पीतामसितां धूम्रविग्रहाम् ।

तत्प्रयोगेषु च तथा ध्यायेत्तत्तदवाप्तये ॥ १७ ॥

अरुणामरुणाकल्पामरुणाभिश्च शक्तिभिः।

आवृतां पञ्चमीं ध्यायन् जपेद्वश्याप्तयेऽनिशम्॥ १८॥

पीतां पीताम्बरां पीतभुषणस्रग्विलेपनाम्।

पीतशक्त्यावृतां ध्यायेत् स्तम्भनेषु तु सर्व्वदा॥ १९॥

श्यामाञ्च दुर्गमे मार्गे सिंहस्थां भीमविग्रहाम्।

शक्तिभिः स्वसमानाभिरन्ताभिः समायुताम्॥ २०॥

चिन्तयन् प्रजपन् विद्यां यजेत्तच्छक्तिमध्यतः।

स्वात्मानं भावयन्मन्त्री व्रजेदक्लिष्टवैभवः॥ २१॥

सिंहर्क्षद्वीपिशरभशृङ्गिकुक्कुरशूकरैः।

गवयैर्भुजगभीमैर्दन्तभिर्म्मदमन्थरैः॥ २२॥

चौरैः क्रूरप्रहरणैः क्रूरैरन्यैर्भयावहैः।

भूतप्रेतपिशाचाद्यैराकुलेऽरण्यसङ्कटे॥ २३॥

अलब्धमार्गे विपिने गिरिशृङ्गे तथाविधे।

स्मरेद्देवीमुक्तरूपां निरातङ्को व्रजेत् सुखी॥ २४॥

समरेष्वपि भीमेषु पतत्सु रथदन्तिभिः।

सङ्कटेषु दुरन्तेषु स्मृत्वेत्थं विजयी भवेत्॥ २५॥

नखरं छुरिकां खड्गं बाणं शूलं गदां सृणिम्।

चक्रञ्च दक्षिणैर्विभ्रद्वाहुभिर्भीमविग्रहाम्॥ २६॥

तर्जनीं खेटकं चर्म्मं चापं डमरुकं हलम्।

पाशं शङ्खञ्च दधतीमन्यैर्नीलां स्वशक्तिभिः ॥ २७ ॥

गजाधिरूढां द्विरदैः शक्त्यारुढैः समवृताम् ।

वैरिसेनां समस्ताञ्च निपात्य परिधैर्भुवि ॥ २८ ॥

तदुपर्य्यभितः पङ्क्षेत् कदलीकेतुसङ्कुलम् ।

चरन्तीं शक्तिवृन्दैस्च भीमारावैर्म्मदोद्धतैः ॥ २९ ॥

भानुमण्डलमध्यस्थां शूलप्रोतारिविग्रहाम् ।

तद्देहर्निर्य्यद्रक्ताक्तशूलां देवीं विचिन्तयेत् ॥ ३० ॥

कण्ठमात्रे जले स्थित्वा जपेद्विद्यामनन्यधीः ।

सप्तरात्रप्रयोगेण वैरिणं मारयेज् ज्वरात् ॥ ३१ ॥

देव्याः सपरिवाराया हेतिभिः शकलीकृतम् ।

रिपुदेहं स्मरेत् फेरुकङ्कक्रव्यादकुक्कुरैः ॥ ३२ ॥

भक्ष्यमाणं जपेद्विद्यां त्रिदिनं सलिले स्थितः ।

प्राग्वत्तावद्दिनैर्वारिहतं स्मृ(श्रु)

त्वा समुत्तरेत् ॥ ३३ ॥

द्विभुजां धूम्रवर्णाभां साध्यजिह्वाहृदम्बुजैः ।

उत्पाटयन्तीं संचिन्त्य जपन् शत्रून् यमं नयेत् ॥ ३४ ॥

तथाविधां पीतवर्णां स्मृत्वा संजप्य वैरिणः ।

क्रोधं संशयेद्वादे विवादे समरेऽपि च ॥ ३५ ॥

ताक्ष्यारूढाञ्च तां ताक्ष्यगणस्थाभिश्च शक्तिभिः ।

वृतां ताक्ष्यर्गणोद्द्दामपक्षमारुतमूर्च्छितताम् ॥ ३६ ॥

स्मृत्वा जपेद्रिपोः सेनां दूरतो द्रावयेत् क्षणात् ।

तथैवाष्टभुजैः खड्गान् दधानां शक्तिभिर्वृताम् ॥ ३७ ॥

तथैवारातिपृतनां समरे नाशयेत् क्षणात् ।

विकीर्य्य केशानरुणवारवाणधरो हयैः ॥ ३८ ॥

तरक्षकेशरिकपिकोलर्क्षगरुडस्थितैः ।

शक्तिवृन्दैस्त्रिशूलाग्रप्रोतपत्त्यश्ववारणैः ॥ ३९ ॥

क्रीडाविनोदां माणिक्यमण्डपे सिंहविष्टरे ।

ध्यायन्नरातेः पृतना नाशयेत् स्वैर्बलैर्नृपः ॥ ४० ॥

पीतप्रसूनैः पीताभामर्च्चयेत् स्तम्भनाय वै ।

प्रागुक्तैर्म्मण्डलाद्यैस्तु वासरैः परमेश्वरि ॥ ४१ ॥

अरातीनां गतिं सेनां मतिं जिह्वां समुद्यमम् ।

इष्टमन्यच्च सकलं स्तम्भयेत् साधकः क्षणात् ॥ ४२ ॥

अरुणामरुणैः पुष्पैरर्च्चयेन्मध्यरात्रतः ।

निहन्तुकामः सर्वांस्तु रिपुं कुर्य्याद्वशे ध्रुवम् ॥ ४३ ॥

विषनाड्यां दग्धयोगे मृतियोगे सनाशके ।

यमकण्टककाले वा कृष्णपुष्पैस्तथाविधाम् ॥ ४४ ॥

पूजयंस्तद्दिनैः शत्रून् जीवितेशपुरं नयेत् ।

श्यामाञ्च सौरभाद्यैस्तैः पुष्पैरभ्यर्च्चय वासरैः ॥ ४५ ॥

उदितेरिन्दिराढ्यः स्यादरोगः सुमना वशी ।
सुखं जीवति भूमौ स शतवर्षाणि विश्रुतः ॥ ४६ ॥
होमं कुर्य्यात्तथा रात्रौ चतुरस्रेऽथ कुण्डके ।
हरिद्रामिलितैरन्नैस्तिलैर्म्माषैः सतण्डुलैः ॥ ४७ ॥
पीतैः पुष्पैस्तथा पीतैः फलैस्तालदलैरपि ।
सकलीकृत्य लिखितसाध्यवर्णसमन्वितैः ॥ ४८ ॥
निशाघृतसमोपेतैः स्तम्भयेत् प्रागुदीरितान् ।
निशाचुर्णैर्घृताक्तैस्तु होमः स्तम्भयते तथा ॥ ४९ ॥
अर्द्धरात्रेऽरिवृक्षेद्धवह्नौ तद्योनिदेहजैः ।
मांसैस्तद्देहसम्भूतस्नेहाक्तैर्हवनाद्दिनैः ॥ ५० ॥
मारयेद्वैरिणं रोगशस्त्रशृङ्गफणीजलैः ।
दहनैर्व्वारणैरन्यैः प्रसादैः कण्टकादिभिः ॥ ५१ ॥
निर्घाततरुकुड्यादिपतनाद्विषभक्षणात् ।
शत्रुर्भिर्व्वा प्रयोगामी न भवन्त्येव भङ्गुराः ॥ ५२ ॥
धूम्रां कङ्कसमारूढां नखराद्यायुदैर्युताम् ।
ध्यायन् रिपोरष्टमे तु राशौ छागघृताप्लुतैः ॥ ५३ ॥
मरीचैः सर्षपैर्होमैस्तद्दिनैर्मारयेद्रिपून् ।
तीव्रदाहज्वरग्रस्तं विसंज्ञं विकृताङ्गकम् ॥ ५४ ॥
बालार्काभां स्मरन्नाद्यहेतिभिः संयुतां शिवाम् ।

सरूपवत्सारुणगोघृताक्तैररुणैः शुभैः ॥ ५५ ॥

प्रसूनैः किंशुकोद्भूतैस्तथा बन्धूकसम्भवैः ।

जपाप्रसूनैः पालाशैः करवीरसमुद्भवैः ॥ ५६ ॥

कह्लारैरुत्पलैरक्तैः कमलैः पाटलोद्भवैः ।

अशोकजैः कुसुम्भित्थैरन्यैः पुष्पैश्च लोहितैः ॥ ५७ ॥

हवनान्नृपतुल्यः स्यादैश्वर्य्येणाज्ञया धनैः ।

अन्यैरपि च तत्सक्तपैररङ्गैः सुनिश्चितम् ॥ ५८ ॥

अरुणां नखराद्यैस्तु युतां ध्यायन् समाहितः ।

मध्यरात्रे हुनेत् साध्यदिङ्मुखो मरिचैस्तथा ॥ ५९ ॥

प्रोक्तैर्दिनैर्नृपो नारीनरलोकोऽपि वा वशे ।

भवेत् कीर्तीन्दिरायुक्तश्चिरं जीवति भुतले ॥ ६० ॥

विलिख्य भूपुरं मध्ये निजसाध्यं समालिखेत् ।

भौमाक्षराणि तद्बाह्ये दशाग्रादभितो लिखेत् ॥ ६१ ॥

बहिरष्टदलं पद्मं कृत्वा तत्र लिखेत् क्रमात् ।

मन्त्राक्षराणि ऋतुशस्तद्बहिर्वृत्तयुग्मकम् ॥ ६२ ॥

तत्रापि पार्थिवानर्णान् बहिः षट्कोणमालिखेत् ।

तत्कोणेष्वन्तरालेषु मन्त्रार्णान् भूदशान्वितान् ॥ ६३ ॥

विलिखेत् प्राग्वदभितो बहिर्वृत्तद्वयं लिखेत् ।

विलोममातृकां तत्र न्यस्य भूमिपुरं बहिः ॥ ६४ ॥

कृत्वानुलोममालिख्य मातृकां मूलविद्यया ।
पूजयन्नखिलं लोकं स्तम्भयेदरिवाहिनीम् ॥ ६५ ॥
नवास्त्रं वृत्तयुग्मञ्च वस्वस्त्रं तद्वयं बहिः ।
चतुरस्रञ्च संलिख्य मन्त्रार्णान् षट् षडालिखेत् ॥ ६६ ॥
अष्टान्तरालेष्वेकैकं बाह्यवृत्ते तु मातृकाम् ।
चतुरस्रे च विलिखेत् प्रतिलोमानुलोमकम् ॥ ६७ ॥
साध्याख्यं सर्वतो लिख्य यजेदष्टभुजां शिवाम् ।
स्तम्भः स्यात् पूर्व्वमुक्तानां विधानात् परमेश्वरि ॥ ६८ ॥
वृत्तं त्र्यस्त्रं पुनर्वृत्तं षडस्त्रं वृत्तयुग्मकम् ।
अष्टास्त्रं तद्बहिर्व्वृत्ते इति कृत्वात्र विन्यसेत् ॥ ६९ ॥
एकं मध्ये बहिः कोणेष्वन्तरालेषु च क्रमात् ।
त्रयं त्रयं समालिख्य बहिः शिष्तन्तु पार्थिवैः ॥ ७० ॥
विलिख्य मध्ये नामापि जपित्वाभ्यर्च्चयसाधकः ।
स्थापयेत् क्वापि तत्रैव नित्यशश्च बलिं क्षिपेत् ॥ ७१ ॥
कृत्वा षडष्टकोणानि षट्कोणानि पृथक् पृथक् ।
क्रमात्रिकोणवृत्तान्तरालान् षट्कोणसंयुतान् ॥ ७२ ॥
बाह्यात् क्रमेण मध्यान्तं नक्षत्रतिथिवारयुक् ।
विलिखेल्लिपिशः सर्व्वां मातृकां शक्तिसंयुताम् ॥ ७३ ॥
साध्यं सप्तसु मध्येषःउ विलिखेच्च प्रदक्षिणम् ।

मायामध्यगतं देवि धारयेत् सर्व्वसिद्धये ॥ ७४ ॥

भूतप्रेतपिशाचादिशान्त्यै सर्व्वार्त्तिशान्तये ।

गजवाजिखरोष्ट्रादिरोगशन्त्यै च धारयेत् ॥ ७५ ॥

प्राक्प्रत्यग्दक्षिणोदक्करेखाद्वादश संलिखेत् ।

रेखाग्रे सर्व्वतः शूलास्तन्मध्याग्रे च पार्श्वयोः ॥ ७६ ॥

स्तम्भयेति समालिख्य मध्यकोष्ठेऽरिनाम च ।

परितो विलिखेन्मन्त्रवर्णान् भौमसमन्वितान् ॥ ७७ ॥

भूर्जे वा कर्पटे लोहे शिलायां वा समालिखेत् ।

गृहपट्टनयोर्लोहदृशदोरिष्टसिद्धिदम् ॥ ७८ ॥

गौरकेणाथ शिलायां तालेन विलिखेच्छुभम् ।

स्थापयेद्भित्तिमध्ये च भूमौ च क्रमतः शिवे ॥ ७९ ॥

नित्यशः पूजयेत् पुष्पैः सुगन्धैः प्रजपेत्तथा ।

यावत्फलाप्ति कुर्वीत नियतं सन्ध्ययोर्द्वयोः ॥ ८० ॥

प्राक्प्रत्यग्दक्षिणोदक्क कुर्य्यात् सूत्राणि षोडश ।

तैस्तु कोष्ठानि जायन्ते पञ्चविंशैः शतद्वयम् ॥ ८१ ॥

तेषु कोणेषु परितो मार्जयेत् प्राग्वदीश्वरि ।

अष्टाविंशति कोष्ठानि ततः शिष्टेषु दिक्ष्वपि ॥ ८२ ॥

प्राग्वदेकैस्कतः कुर्य्यात्त्रिकोणानि यथाविधि ।

मध्ये त्रिषु तु कोष्ठेषु साध्यसाधककर्म्म च ॥ ८३ ॥

उपर्य्यधो मध्यतश्च शेषेषु प्राग्वदालिखेत्।
मन्त्रार्णानग्रमारभ्य विलिखेदभितः शिवे ॥ ८४ ॥
एतद्वज्रं महायन्त्रं समस्ताभीष्टसाधकम्।
यत्रैतत् स्थापितं लोहशिलादिलिखितं शिवे ॥ ८५ ॥
तत्र चोरग्रहव्याधिरिपुसर्पसमुद्भवाः।
भूतप्रेतपिशाचादिकोपजास्चाप्युपप्लवाः ॥ ८६ ॥
न भवन्ति कदाप्यत्र सम्भवन्ति च सम्पदः।
वास्तुर्मर्म्मादिदुःखादि शमयेद् गेहगञ्च तत् ॥ ८७ ॥
यस्मिन् गृहे स्थापितन्तु यन्त्रं तद्गेहवर्त्तिनाम्।
कृत्याभिचारक्षुद्रादि पीडा न भवति ध्रुवम् ॥ ८८ ॥
वाय्वग्निनैरृतेशाश्च कुर्य्याद्द्वादशसूत्रकम्।
तैर्व्वज्ररूप्कोष्टानि एकविंशशतम्भवेत् ॥ ८९ ॥
तेषु मध्ये समालिख्य साध्यनाम ततो बहिः।
अग्रादभित एवान्यान्यक्षराणि समालिखेत् ॥ ९० ॥
निर्गमेन महीवर्णपूर्व्वानि क्रमतः शिवे।
स्थापितं लोहशिलादिलिखितं पूजितन्तु वा ॥। ९१ ॥
रोगभूतग्रहोन्मादपिशाचापस्मृतिर्द्विषः।
अन्यानि क्लेशकारीणि यानि तानि विनाशयेत् ॥ ९२ ॥
प्रोक्तेष्वार्त्तिष्वपि तथा तद्वज्रं गौरकैर्भुवि।

विलिख्य मध्ये कुम्भन्तु क्षीरद्रुक्काथपूरितम् ॥ ९३ ॥

निधाय देवीं सलिले समावाह्याभिपूज्य च ।

स्पृशञ्जलं जपेद्विद्यां सहस्रत्रयमात्मवान् ॥ ९४ ॥

तैर्जलैरभिषिञ्चेत्तं गदिनं प्राङ्मुखं ततः ।

तैः क्लेशैर्मुक्तदेहस्तु सुखी जीवति भूतले ॥ ९५ ॥

विद्याप्राप्त्यभिषेकन्तु वज्रेऽस्मिन् कोष्ठवज्रके ।

सैकविंशशते वापि कुम्भं संस्थाप्य सेचयेत् ॥ ९६ ॥

वेदाङ्गुलपरिभ्रान्त्या वृत्तं कृत्वा ततो बहिः ।

द्व्यङ्गुले द्व्यङ्गुले कुर्य्यादेकादश ततः क्रमात् ॥ ९७ ॥

तेषु द्व्यङ्गुलमानेषु तिर्य्यक् सूत्राणि पातयेत् ।

एकादश ततस्तेषु प्राङ्मध्यात्तु प्रदक्षिणम् ॥ ९८ ॥

भूदशार्णैस्तु तां विद्यामालिखेन्निर्गमक्रमात् ।

रेखाग्राणि च शूलानि कृत्वा साध्यञ्च मध्यतः ॥ ९९ ॥

तद्यन्त्रं प्राग्वदखिलविनियोगेषु योजितम् ।

नासाध्यमस्ति भुवने विद्यया सिद्धयाऽनया ॥ १०० ॥

मनस्तत्त्वमयी व्याप्तिरिति सम्यक् समीरिता ।

अस्या निफालनाच्चित्ते तत्तत्त्वं स्वात्मसात्कृतम् ॥ १०१ ॥

इति श्री षोडशनित्यातन्त्रेषु श्रीकादिमते त्रयोविंशपटलं परिपूर्णम् ॥

चतुर्विंशपटलम् ।

अथ षोडशनित्यानां ध्यानानि विविधानि ते ।
कथयामि शृणु प्राज्ञे वाञ्छितार्थसुरद्रुमान् ॥ १ ॥
एकैकमङ्गाङ्गित्वेन तासां तच्छक्तिभिस्तथा ।
प्रयोगेषु समस्तेषु बाह्याभ्यन्तरतः क्रमात् ॥ २ ॥
श्रियै कीर्त्त्यै जयावाप्त्यैवश्याकर्षणसिद्धये ।
ध्यायेद्देवीः समस्तास्च लोहिताकारमण्डनाः ॥ ३ ॥
विद्याप्तौ शान्तिके मुक्ताबिन्दुकर्पूरसन्निभाः ।
विद्वेषोच्चाटनिधननिग्रहेष्वसिताः स्मरेत् ॥ ४ ॥
धूम्रा वा चिन्तयेत् सर्व्वाः प्रोक्तद्वेषादिसिद्धये ।
सर्व्वत्र स्वसमाकारवर्णशक्तिभिरावृताः ॥ ५ ॥
क्षित्यादिभूतैः सत्त्वादिगुणैरेकाकस ।हतैः ।
एकब्यादिसमारब्धैर्व्वर्णाकारैस्तु शक्तयः ॥ ६ ॥
असंख्याता भन्त्यासां कार्त्स्न्याद्धयानन्तु को वदेत् ।
को व शृणोति साकल्यात् ततः किञ्चिद्वदामि ते ॥ ७ ॥
भौमाकाराः पीतवर्णाः सर्वाः स्तम्भनकारिकाः ।
आप्याः सत्त्वगुणाः सर्व्वाः सिताकाराः समीरिताः ॥ ८ ॥
ताः सर्व्वा ज्ञानशान्तिश्रीकीर्त्तिसौमाम्यमुक्तिदाः ।
आग्नेया राजसाः सर्व्वा लोहिताकारसंयुताः ॥ ९ ॥

वश्याकर्षणशान्तिस्त्रह्वोसौभाग्यविजयप्रदाः।

वायुरूपा धूम्रवर्णा सर्वा देवेषादिकारकाः॥ १० ॥

नाभसा नीलवर्णास्ता मारणोत्सादयोः स्मृताः।

आसां मुखभुजादेहविधानं शृणु पार्वति॥ ११ ॥

एकवक्त्राश्चतुर्वक्त्रा नववक्त्रास्तथा पराः।

षोडशास्याः पञ्चविंशद्वदना अपि काश्चन॥ १२ ॥

षट्त्रिंशद्वदना क्वापि चत्वारिंशन्नवाननाः।

चतुःषष्टिमुखास्तद्वदेकाशीतिशताननाः॥ १३ ॥

बहुना किं मुखभुजसंख्यासाधन्वाञ्छया।

तथापि दर्शितं किञ्चिद्वक्त्रे भुजद्वयं द्वयम्॥ १४ ॥

नामरूपातिगा येन तेन साऽनन्तविग्रहा।

वसन्ति नानारूपास्च भवेयुस्तत्र वाञ्छया॥ १५ ॥

आद्याया ललिताया स्युरन्यः पञ्चदशाङ्गगाः।

ललिताङ्गित्स्वरूपेण सर्वासामात्मविग्रहाः॥ १६ ॥

तेन तासान्तु सर्वासां स्वान्तान्ताः परिचारिकाः।

तातद्वर्णायुधाकारवाहनेश्च सुसंयुताः॥ १७ ॥

तथाविधैः स्वस्वशक्तिवृन्दैस्च वेष्टिता अपि।

इति तासां ध्यानभेदाः स्थूलाः प्रोक्ता महेश्वरि॥ १८ ॥

सूक्ष्मरूपाणि च तथा कथयामि तवानघे।

येन ते साधकाः सर्व्वे वाञ्छितं प्राप्नुयुः क्षणात् ॥ १९ ॥

प्रोक्तेष्वाधारपद्मेषु लोहितात्मैक्यविग्रहाम् ।

विभाव्य तेजोनिचये तत्र सिद्धिञ्च चिन्तयेत् ॥ २० ॥

तेन सर्व्वमभीष्टन्तु समवाप्नोत्ययत्नतः ।

पूजातर्पणहोमादिरहितं भावनेन वै ॥ २१ ॥

परन्तुध्यानमुदितमखण्डात्मविमर्शतः ।

निर्व्वातदीपसङ्काशमात्मनात्मसमीक्षणात् ॥ २२ ॥

स्थूलेन साधयेत्तत्तदिष्टञ्चैव शुभाशुबम् ।

प्रोक्तक्रमेण देवेशि सततं साध्यसाधकैः ॥ २३ ॥

सिद्धन्तु सूक्ष्मरूपेण ध्यानेन सकलेप्सितम् ।

साधयेत् पररूपन्तु साध्यं साधनसिद्धये ॥ २४ ॥

ब्रूहि देव महेशान स्थूलसूक्ष्मस्वरूपयोः ।

ध्यानयोः कर्म्मणा सिद्धिं विविधां फलयोगतः ॥ २५ ॥

तासां तत्तत्करेषूक्तेष्वायुधान्यप्यशेषतः ।

शृणु वक्ष्ये महेशानि क्रमेण तव साम्प्रतम् ॥ २६ ॥

वामदक्षिणयोः स्यातां द्विभुजे तु वराभये ।

पाषाङ्कुशौ चतुर्ब्बाहौ षड्भुजे चापसायकौ ॥ २७ ॥

चर्म्मखड्गौ चाष्टभुजे गदाशूलौ दशोदिते ।

सुखपाण्यायुधानान्तु रूपसंख्यादिवाञ्छया ॥ २८ ॥

यस्मिन् कर्म्मणि तां देवि यथा स्मरति साधकः।

तथा तस्याग्रतो भूत्वा पालयति तमादरात्॥ २९॥

सर्व्वत्र स्मेरवदननयनाः शुभकर्म्मसु।

दंष्ट्रोग्रा भीमनयनवदनाः क्रूरकर्म्मसु॥ ३०॥

शुभेषु कर्म्मस्वासीना स्थिता वाहनगा अपि।

शुबेतरेषु ताः सर्व्वाः प्रयोगेषु तु सर्व्वदा॥ ३१॥

वलयैरङ्गदै रत्नमयैरप्यङ्गुलीयकैः।

विराजमानास्ताः सर्व्वा दिव्यांशुकधरा अपि॥ ३२॥

हारग्रैवेयरत्नादिमुद्रिका नूपुरादिभिः ।

नवरत्नमयैः सर्व्वास्तवकैश्चोपशोभिताः॥ ३३॥

एवं सामान्यमुदितं ध्यानं तासां महेश्वरि।

विशेषं शृणु वक्ष्यामि तत्तत्कर्म्मसु सिद्धिदम्॥ ३४॥

गजवाजिरथारुढा विमानस्थाश्च सिंहगाः।

व्याघ्रतार्क्ष्यसमारूढा ध्येया रक्षासु सर्व्वदा॥ ३५॥

समरेषु जयावाप्त्यै नृपराष्ट्रादिरक्षणे।

पिशाचचोरव्यालादिदुर्गमेऽरण्यवर्त्मनि ॥ ३६॥

ध्यायेत्ता देवताः सर्व्वाः सर्व्वशक्तिभिरावृताः।

एकैकशः समस्ता वा सुखी भवति निश्चितम्॥ ३७॥

ऋक्षवानरभल्लूकखरसौरभवाहनाः।

उच्चाटनेषु सर्व्वास्ता भौमा ध्येयः सुदारुणाः ॥ ३८ ॥

कङ्कश्येनकक्रौञ्चकाककौशिकवाहनाः ।

विद्वेषणेषु सर्वास्ता घोरप्रहरणाकुलाः ॥ ३९ ॥

खड्गगोमायुशल्लीगवयाहरिणाश्वगाः ।

चिन्तयेत् सकलाः सर्व्वक्षुद्रकर्म्मसु साधकः ॥ ४० ॥

पिशाचवेतालगा ध्येयाः सर्व्वत्रामारणे ।

इति वाहनभेदेन फलभेदाः समीरितः ॥ ४१ ॥

सर्वास्ताक्ष्र्यगता वह्निवायुहस्तद्वान्वितः ।

द्विनेत्रास्त्वेकवदना दंष्ट्रोग्रा भीमविग्रहाः ॥ ४२ ॥

दहन्त्यो वैर्विवहं ध्येयाः  साकारशक्तिभिः ।

भौमरावाभिरभितो वेष्टिता रणमुर्द्धनि ॥ ४३ ॥

विजयी भवति क्षिप्रं वैर्सेनाविनाशतः ।

पलायनोत्सगहनात् पादयोः पतनेन वा ॥ ४४ ॥

चतुर्मुखा अष्टभुजा छिन्दन्त्यः महतीं चमूम् ।

विभाव्य वा जयं युद्धे प्राप्नोत्युक्तक्रमेण वै ॥ ४५ ॥

नवाननास्तुद्विगुणभुजा वा भीमविग्रहाः ।

वामैः कोदण्डनिवहमन्यैः खड्गञ्च विभ्रतीः ॥ ४६ ॥

ध्यात्वारिसेनां सकलां शरभिन्नकलेवराम् ।

वमद्रुधिरधाराञ्च विजयं प्रोक्तमाप्नुयात् ॥ ४७ ॥

अथवा नवभिः खेटमन्यैः खड्गञ्च विभ्रती।
चतुरङ्गरिपोः सेनां छिन्दतीस्तरवारिभिः॥ ४८॥
चिन्तयित्वा जयं युद्धे भीमाकारे सुदुर्जये।
पत्त्यश्वेभरथाटोपवाद्यनिःशनसङ्कुले॥ ४९॥
प्राप्नोत्ययत्नतः क्षिप्रं प्रागुक्तक्रमयोगतः।
अथवा नवभिर्हस्तैर्गदा वामैस्तथेतरैः॥ ५०॥
नखरान् पाणिभिर्भीमा दधातीः समरे स्मरन्।
तद्भिन्नचतुरङ्गांञ्च सेनां विजयमाप्नुयात्॥ ५१॥
तथा शूलकुठारौघैः पातयन्तीर्द्विषां वलम्।
विजयी भवति प्रोक्तक्रमाद्घोरे रणाङ्गणे॥ ५२॥
तथैव चर्म्मच्छूरिकानिवहैर्निघ्नतीर्वलम्।
ध्यात्वा वा विजयी भूयात् समरे रोमहर्षणे॥ ५३॥
निद्रातिमिरहस्ता वा मोहयन्ती द्विषां वलम्।
ध्यात्वा विजयमाप्नोति नियतं समरे नृपः॥ ५४॥
पिशाचसर्पहस्ता वा तैः सेना मृदतीः स्मरन्ः।
विजयं समरे शश्वदश्नुते शङ्करोपमः॥ ५५॥
पाशकर्त्तरिकाभिर्व्वा निघ्नतीः पृतनां रणे।
स्मृत्वा विजयमाप्नोति नृपः प्रोक्तक्रमाद् ध्रुवम्॥ ५६॥
अङ्कुशक्रकचाभ्याञ्च दारयन्तीश्चमूः क्षणात्।

चिन्तयन् समरे मीमे विजयी स्यात् सुनिश्चितम् ॥ ५७ ॥

हलैश्च मुशलैर्नत्यं प्रहरन्तीर्द्विषां बलम् ।

स्मरन् प्रविजयं युद्धे प्राप्नोति ध्यानवैभवात् ॥ ५८ ॥

तथा षोडशवक्त्रास्ता द्वात्रिंशैर्व्बाहुभिर्युताः ।

प्राग्वत् प्रमथितारातिपृतनाश्चिन्तयन् जपेत् ॥ ५९ ॥

पञ्चविंशतिवक्त्रा व पञ्चाशद्भुजसंयुताः ।

तैस्तैरेकादशभिर्भेदैरायुधैर्निघ्नतीर्व्वलम् ॥ ६० ॥

विचिन्त्य जयमाप्नोति समरे सर्वदा नृपः ।

तथा स्मरणसंयुक्तैः पूजयेत्तास्तदाऽऽग्रहे ॥ ६१ ॥

षट् त्रिंशद्वदना देवीर्द्विसाप्ततिकराः स्मरेत् ।

तथैव दशरूपैस्तैर्वारैः प्रहरणैर्युताः ॥ ६२ ॥

एकोनपञ्चाशद्वक्त्रा हस्तैस्तद्विगुणैर्युताः ।

प्रहरन्तीस्तथारातीन् स्मृत्वा जयमवाप्नुयात् ॥ ६३ ॥

चतुःषष्टिमुखा देवीः करैस्तद्विगुणैर्युताः ।

प्रहरन्तीः स्मरेद् युद्धे जयी भवति निश्चितम् ॥ ६४ ॥

एकाशीतिमुखा देवीस्तद्वैगुण्यभुजैर्युताः ।

तथाविधैः प्रहरणैः स्मरन् युद्धे जयी भवेत् ॥ ६५ ॥

शतवक्त्रास्तद्विगुणकरास्तद्धेतिभिर्युताः ।

स्मृत्वा विजयमाप्नोति स्मरे तश्च षोडश ॥ ६६ ॥

एवं वक्त्रकरैर्युक्तास्त्वनेकैरिष्टरूपतः ।
तथा तैर्हेतिनिवहैर्व्याकुलक्रमहस्तकैः ॥ ६७ ॥
असंख्याता भवेयुस्ताः साधकाभीष्टसिद्धिदाः ।
एवमुद्दामसमरसंकटादिषु चिन्तयन् ॥ ६८ ॥
देवीस्तास्तरति क्षिप्रमापदो मनुजोऽथवा ।
देवो वा राक्षसो यक्षः किन्नरो वा भुजङ्गमः ॥ ६९ ॥
पिशाचो वा गुह्यको वा सिद्धो वा दानवोऽथवा ।
न कदाचित् स्मरन्नित्यं भङ्गमाप्नोति निश्चितम् ॥ ७० ॥
चोरादिसङ्कटेऽरण्ये गिरिदुर्गमवर्त्मनि ।
द्विविधैर्वैरिभिजातैः कृच्छ्रे राजभयेऽथवा ॥ ७१ ॥
क्षुद्रपीडासु भूतापस्माररराक्षससङ्कटे ।
पिशाचडाकिनीवृन्दब्रह्मराक्षसपीडने ॥ ७२ ॥
अन्येष्वपि च कृच्छ्रेषु विस्तरेषु महत्स्वपि ।
स्मरन्नित्थं यजेत् सर्वा विपदो ध्यानवैभवात् ॥ ७३ ॥
एकवक्त्राश्च द्विभुजाः साधकाभीष्टधारिकाः ।
सपादुकाः समागत्य सर्वाभरणभूषिताः ॥ ७४ ॥
स्वसमानाभिरभितः शक्तिभिः परिवारिताः ।
गायन्तीभिश्च नृत्येषु वनमालाभिरन्विताः ॥ ७५ ॥
ध्यायन्नभिमतं सर्वमाप्नुयात् षोडशापि ताः ।

नासाध्यमस्ति भुवने ध्यानादासां महेश्वरि ॥ ७६ ॥

अलङ्कृतहयारूढाः शक्तिभिश्च तथावृताः ।

स्मेराननश्च गायन्तीः स्मृत्वा विश्वं वशं नयेत् ॥ ७७ ॥

तथाविधा गजारूढास्तथा शक्तिभिरावृताः ।

सङ्गीतासक्तमहिलावृन्दसं कुलमध्यगाः ॥ ७८ ॥

स्मृत्वा लक्ष्मीमवाप्नोति राजमान्यामतिस्थिराम् ।

नानाभोगसमोपेतां प्रख्यातनिजवैभवाम् ॥ ७९ ॥

तथाविधरथारूढास्तथाशक्तिभिरावृताः ।

तथा  सङ्गितसंसक्तशक्तिवृन्दसमन्विताः ॥ ८० ॥

स्मरन् भुवमवाप्नोति राजा वै वैर्मण्डलम् ।

एवं तत्त्रिविधध्यानात् सौभाग्यमतुलं यशः ॥ ८१ ॥

कदलीकाननेऽरण्ये निर्जने तास्तथा स्मरन् ।

पादुकासक्तचरणा आगच्छन्ति स्वशक्तिभिः ॥ ८२ ॥

मण्डलं मासमर्द्धं वा जपन् विद्यां ततो विशेत् ।

निधिं संप्राप्य भुवने भोगी स्याद् यावदायुषम् ॥ ८३ ॥

पूगारामे तथ स्मृत्वा निधिमाप्नोत्ययत्नतः ।

एवं चम्पकपुन्नागनमेरुवकुलेष्वपि ॥ ८४ ॥

तथा पर्वतकुञ्जेषु ताः स्मृत्वा वित्तमाप्नुयात् ।

राजतो धनितोऽन्यस्माद् येनासौ स्यात् सुखी चिरम् ॥ ८५ ॥

समुद्रतीरेऽरण्येषु तथा नित्यं स्मरन् धिया।
प्राप्नोत्यनर्घरत्नानि बहूनि ध्यानवैभवात्॥ ८६॥
समुद्रगासरिन्मध्यतरुवाटीषु तास्तथा।
स्मरन् कनकमाप्नोति वर्णोत्कृष्टमसंख्यकम्॥ ८७॥
निर्जने विपिने स्मृत्वा प्राप्नोति महिलाः शुभाः।
रूपयौवनशीलाढ्याः प्रेमनिघ्नास्त्वनन्यगाः॥ ८८॥
उक्तेषु तेषु स्थानेषु हयारूढाः स्मरन्नरः।
नृपतिं कुरुते वश्यं मनोवाक्कायकर्म्मभिः॥ ८९॥
तेषूक्तेषु गजारूढाः स्मृत्वा नारीर्नरान्नृपान्।
वशीकरोति भुवने प्राणिनश्चा विशेषतः॥ ९०॥
तथा तेषु रथारूढाः स्मृत्वा देवीस्तथोदिताः।
वाञ्छितं समवाप्नोति मुक्तः स्यान्निगडादितः॥ ९१॥
शतवक्त्रास्तद्द्विगुणभुजास्तेष्वायुधान्यपि।
वाञ्छितानि लिखित्वा ताः पटेषु नवसु स्फुटम्॥ ९२॥
पटांस्तान्मध्यपर्य्यन्तद्वये संस्थापयेत्तथा।
रथदन्तिहयानान्तु तिरस्करणिकायुतान्॥ ९३॥
प्रतिसैन्याभिमुख्ये तु तांस्तु सम्यक् प्रदर्शयेत्।
वज्रालिखितनिशानभेरीपणवमर्द्दलान्॥ ९४॥
आहत्य वहयन् शृङ्गशङ्खकाहलकादिकम्।

वज्रादिभिमुखं वैरी धावत्याशु पराजितः ॥ ९५ ॥

तत्सेनासंमुखा पश्चान्न जातु भवति ध्रुवम् ।

इति ध्यानान्यशेषेण कथितानि तवानघे ॥ ९६ ॥

सूक्ष्मध्यानेन सिद्धानां साधकानां फलोदयः ।

अतस्तच्छृणु वक्ष्यामि सर्वाभीष्टाभिकारकाः ॥ ९७ ॥

दाडिमीकेसरप्रख्यतेजोरूपां स्मरन् धिया ।

तन्मध्ये साध्यरूपञ्च निजवाच्छानुरूपकम् ॥ ९८ ॥

समस्तमिष्टमाप्नोति शुभानप्यशुभानपि ।

तथा सुषुम्नान्तस्तच्च चिन्तयेद्वा गमागमम् ॥ ९९ ॥

तेनाखिलं निजेष्टन्तु प्राप्नोति ध्यानवैभवात् ।

साधश्च तथा सिद्धस्तयोरेवाशुसिद्धिकृत् ॥ १०० ॥

प्रकृत्यात्ममयी व्याप्तिरिति सम्यक् समीरिता ।

अस्या निफालनाच्चित्ते तत्तत्त्वं स्वात्मसात्कृतम् ॥ १०१ ॥

इति षोडशनित्यातन्त्रे श्रीकादिमते चतुर्व्विंशति पटलं परिपूर्णं परामृष्टम् ।

पञ्चविंशअटलम् ।

अथ षोडशनित्यानां षट्त्रिंशत्तत्त्वविग्रहैः ।

वर्णैस्तज्जनितैर्म्मन्त्रैर्यन्त्रैः कालात्मतां क्रमात् ॥ १ ॥

कथयामि प्रयोगांश्च नानाभीष्टाप्रतिकारणाण् ।

यज्ज्ञानिपास्तिभेदाभ्यां मन्त्राः सिध्यन्ति वर्णिनः॥ २॥

स्वराः षोडश नित्याः स्युः कादिक्षान्ताः स्वरान्विताः।

तेषु तत्त्वानि षड्विंशद्वर्गी नाथनवात्मिकाः॥ ३॥

अष्टावष्टौ स्वरे वर्गः परतः पञ्च पञ्च वै।

मातृणान्तु स्वरैरेको वर्गः पूर्ववदुत्तरम्॥ ४॥

नित्यानां तत्त्वसंयोगे वर्णसंख्याः समीरिताः।

षट्सप्तत्या पञ्चशतं (५७६)

तत्संख्याब्देस्तु पूर्णता॥ ५॥

तत्संख्यानाञ्च यन्त्राणां तावदब्दैस्तु पूर्णता।

पूर्णकालसमावृत्तिर्युगकल्पादिनामभाक्॥ ६॥

त्रिसहस्रसमावृत्त्या प्रोक्तः कृतयुगावधिः।

तस्य तुर्य्यांशतुर्य्यांशहान्या त्रेतादिसम्भवः॥ ७॥

मायाधराग्निवातस्वैः कृताद्यर्णाः स्मीरिताः।

तान् दिनाक्षरसंयुक्तान्मध्ययोनौ समालिखेत्॥ ८॥

दिनार्णेषु स्वरा न्यासे बिन्दुरूपा अनुक्रमात्।

वामोर्ध्वदक्षपार्श्वेषु पञ्च पञ्च समीरिताः॥ ९॥

तत्तद्युगार्णास्तत्स्थाने स्वरूपेण व्यवस्थिताः।

व्यञ्जनेषु तु सर्व्वत्र सुश्लिष्टाः स्वेन संयुताः॥ १०॥

सर्वत्र यन्त्रविन्यासप्रतिष्ठार्चाद्यनुग्रहे।

निग्रहे वास्तुविन्यासे गर्भन्यासेष्टसिद्धिकृत्॥ ११ ॥

आरभ्य भानोरुदयमेकशो घटिकाक्रमात्।

एकैकं मातृकावर्णपञ्चाशत्परिवृत्तितः॥ १२ ॥

दिवसैः पञ्चभिस्तस्याः षडावृत्त्या उदीरिताः।

एवं युगादिमारभ्य कालात्मार्णैः प्रवर्त्तते॥ १३ ॥

योनौ त्रिकोणमालिख्य तस्मिन् योनिं समालिखेत्।

तेषु पर्य्यायनित्यार्णवर्णानालिख्य बाह्यतः॥ १४ ॥

युगार्णं घटिकार्णेन मध्ये विन्यस्य तत्र वै।

नित्याः षोढश देवेशि पूजयेन्नित्यमर्च्चकः॥ १५ ॥

उत्तमा नित्यनित्यं हि मध्यमा पर्वपर्वणि।

अधमा मासमात्रेण मासादूर्ध्वमयोग्यता॥ १६ ॥

पूर्णमण्डलवर्णाः स्युः प्रथमे त्वादितः क्रमात्।

षट् त्रिंशत्तत्त्ववर्णास्तद्वितीया मरुता क्रमात्॥ १७ ॥

तृतीया सर्वतो वह्निरेवं विद्यास्तु त्र्यक्षराः।

त्रिपुराः सर्व्वसिद्धानामाकराः कथिताः क्रमात्॥ १८ ॥

एताः पुस्तकमारोप्य पीठे संस्थाप्य पूजयेत्।

यत्र तत्र गदालक्ष्मीग्रहदुर्भिक्षशात्रवाः॥ १९ ॥

भूतापमृत्युकृत्याद्या न भवन्ति पुरादिके।

अभीप्सितानि सिध्यन्ति तस्य योऽर्च्चति नित्यशः॥ २० ॥

षट् त्रिंशत्तत् सप्तशतं सहस्राणि च विंशतिः ।

तासां संख्या समाख्याता तदावृत्तिस्तदाप्तिकृत् ॥ २१ ॥

स्तम्भनाद्येषु तद्वर्णास्तद्रूपा हेतिवाहनैः ।

एतद् ग्रन्थितजापेन मन्त्राः सिध्यन्ति वर्णिनः ॥ २२ ॥

नाथावृत्तिर्म्मन्त्रराशौ द्विसहस्रं शतद्वयम् ।

चत्वरि चेति विज्ञेयास्तत्त्वावृत्तिरुदीरिताः ॥ २३ ॥

पूर्णमण्डलसंख्यैव नित्यावृत्तिः सस्रतः ।

द्विशतं षणवत्यश्च निःशेषं समुदीरिताः ॥ २४ ॥

कृतादीनां युगानान्तु दिनेष्वेकैकशः क्रमात् ।

ता विद्यास्तत्त्वरूपिण्यः शेषास्त्वन्ते द्विशः स्मृताः ॥ २५ ॥

प्रयोगेषु तु सर्व्वत्र तत्तद्दिनप्रपूजनम् ।

विशेषतो विधातव्यं जयारोग्यादिसिद्धये ॥ २६ ॥

धातुक्षेत्रेशयोः पूजां कुर्य्यात्तत्तदवाप्तये ।

तत्प्रकारः प्रयोगानां पटले साधु वक्ष्यते ॥ २७ ॥

तेषु पञ्चाशदर्णानां पञ्चाशन्मिथुनानि वै ।

घटिकाक्रमयोगेन भजन्ते परिवर्त्तनम् ॥ २८ ॥

अथ यन्त्राणि वक्ष्यन्ते प्रोक्तसंख्यान्यनुक्रमात् ।

वृत्तं षट्त्रिंशदस्रञ्च तद्वदष्टादशास्रकम् ॥ २९ ॥

द्वादशास्त्रं नवास्त्रं वा स्वरे चास्त्रं नवास्रकम् ।

चतुरस्रमथ त्र्यस्रमिति भेदा नव क्रमात्॥ ३० ॥

एतानि वर्णविन्यासभेदात् प्रत्येकमष्टधा ।

तेन द्वासप्ततिर्भेदास्तेषु नित्यार्णभेदतः ॥ ३१ ॥

प्रत्येकमष्टधेत्येवमुक्तसंख्याः समीरिताः ।

एतेष्वाद्यस्य वृत्तस्य विन्यासेनान्यदुन्नयेत्॥ ३२ ॥

षडङ्गुलपरिभ्रान्त्या वृत्तमेकन्तु वर्त्तयेत्।

एवं पुनः पुनः कुर्य्यादेककाङ्गुलतो बहिः ॥ ३३ ॥

यदा सप्तदशाभुवंस्तदा तद्विबहेदरैः ।

षट्त्रिंशद्भिस्ततस्तेषु न्यसेदर्णान् तथादितः ॥ ३४ ॥

अनुलोमविलोमौ च बाह्याभ्यन्तरसंपुटे ।

बाह्याभ्यन्तःप्रावृत्तौ तथा व्याकीर्णमित्यपि ॥ ३५ ॥

कर्णिकायां मरुद्वह्निनिनाम्ना संलिख्य सर्व्वतः ।

योजयेद्बाह्यकोष्ठस्थैः प्रागुक्तविधिना क्रमात्॥ ३६ ॥

अन्येषामरविन्यासः षट्त्रिंशत् समुदीरितः ।

अष्टास्रे षोडशाराः स्युः षट्त्रिंशद्वृत्तमन्यवत्॥ ३७ ॥

एतत् पटे समालिख्य बहिरष्टच्छदाम्बुजम्।

कृत्वा दलेषु क्रमशो वाग्देव्यष्टकमालिखेत्॥ ३८ ॥

प्रोक्तरूपं ततस्तस्य प्रतिष्ठा सम्यगीरिता ।

विधाय पूजयेन्नित्यं पुस्तपूजोक्तसिद्धये ॥ ३९ ॥

उभयं यः प्रकुरुते तस्य वंशे स्थिरा रमा।

न कदाचिच्छ्रियो हानिर्भविष्यति च तत्कुले॥ ४०॥

वर्णौषधिक्वाथजलैरापूर्य्य कलशं महत्।

तत्र देवीं समावाह्य संपूज्य विधिविन्निशि॥ ४१॥

नित्यानां तत्त्वविद्याश्च जपित्वाऽन्येद्युरासने।

संपूज्य शिष्यं संस्थाप्य शक्त्या तमभिषेचयेत्॥ ४२॥

एवं जन्मानुजन्मादि पौर्णमासीषु साधकः।

कुर्य्यात् कर्षसुवर्णस्य मुद्रिकां गाश्च दक्षिणाम्॥ ४३॥

एवं निरन्तरं वर्षं योऽभिषिक्तः स साधकः।

पारिथिवस्तस्य वन्द्यो वा भविष्यति न संशयः॥ ४४॥

वर्षद्वयाभिषेकेन तस्य वंशे स्थिरा रमा।

वर्षत्रयाभिषेकेण सिद्धिर्वैद्याधरी भवेत्॥ ४५॥

चतुर्व्वर्षाभिषेकेण खेचरीमेलेनं भवेत्।

पञ्चवर्षाभिषेकेण पञ्चत्वं नाधिगच्छति॥ ४६॥

षड्वर्षमभिषेकेण लोकपालसमो भवेत्।

सप्तवर्षाभिषेकेण दिवाकरसमो भवेत्॥ ४७॥

अष्टवर्षाभिषेकेण चन्द्रमःसदृशो भवेत्।

नववर्षाभिषेकेण देवीसारूप्यमाप्नुयात्॥ ४८॥

जयाय विद्याः षट्त्रिंशदेकपञ्चाशदेव वा।

आवृत्तीर्जपहोमार्चातर्पणैः साधु साधयेत्॥ ४९॥

तेन जित्वा रिपून् सर्व्वांनिधये तपनो यथा।

तथोत्पातेषु सर्व्वेषु तथा रोगाद्युपद्रवे॥ ५०॥

तथा वाञ्छितसिद्ध्यर्थं तथा कृत्यानिवारणे।

तथा कृत्यासमुत्पत्तवित्थं सर्व्वार्थिसिद्धिदम्॥ ५१॥

एतच्चक्रारमास्थाय ग्रहृक्षादि प्रवर्त्तते।

एतच्चक्रारविन्यासरूपा भूमीश्च दृश्यते॥ ५२॥

तस्मादेतन्मयं सर्व्वमेतस्य भजनेन च।

सर्व्वे मनोरथाः सिद्धा भजनं सम्प्रदायतः॥ ५३॥

कालप्राप्तक्रमं पूर्व्वमावर्त्त्यान्यक्रमं भजेत्।

कृष्णपक्षेषु शुक्लेषु केवलोक्तक्रमं भजेत्॥ ५४॥

जपतर्पणहोमार्चास्नापनेष्वप्ययं क्रमः।

अमुं ज्ञात्वा विधातव्यमन्यथानर्थमावहेत्॥ ५५॥

कृत्योत्पत्तौ शत्रुभङ्गे निग्रहे प्रतिलोमकम्।

कालेन प्राप्तमन्यत्र सर्वत्र समुदीरितम्॥ ५६॥

वशीकरणरक्षासु सम्पुटद्वितयं क्रमात्।

रोगशत्रुजये प्रोक्ते परावृत्तक्रमेण वै॥ ५७॥

गोभूहिरण्यवाहादिलाभेषु च समीरितः।

उच्चाटनेषु व्याकीर्णं तेषु शान्त्यै क्रमं यजेत्॥ ५८॥

एतद्विधाननिष्णातं प्रणमन्ति सुरासुराः ।

तस्मिन्नरिकृताः पीडाः कृत्याद्या नैव सन्मुखाः ॥ ५९ ॥

प्रत्युतैव परावृत्ताः कर्त्तारं नाशयन्ति वै ।

यत्रासौ निवसत्येष तत्क्षेत्रं तत्तपोवनम् ॥ ६० ॥

श्मशाने पर्वते शून्ये विपिने क्षुद्रपीडने ।

प्रतिष्ठिते यन्त्रराजे तत् स्याज्जनपदं महत् ॥ ६१ ॥

सर्वव्याकीर्णचक्रेण स्थापितेनामरावती ।

उच्चाटिना पुनर्देवि मयापि च न रक्ष्वते ॥ ६२ ॥

शिलायां ताम्रपट्टे वा राजते हेमनिर्म्मिते ।

विलिख्य भूमौ निखनेद् ग्रामराष्ट्रपुरादिषु ॥ ६३ ॥

कृत्वा देवालयं तत्र चक्रं संस्थाप्य्य तस्य वै ।

कर्णिकामध्यगे वेरं कुर्य्यात् सान्निध्यसिद्धये ॥ ६४ ॥

ग्रामादिरक्षणे तत्र मध्ये चाष्टसु दिक्ष्वपि ।

खात्वावटं पुनस्तेषु पाषाणैर्घटितं दृढम् ।

समावाह्याभिपूज्याथ स्थापयेन्मूलविद्यया ।

पाषाणेन तदाच्छाद्य पीठं कृत्वोपरि स्थिरम् ॥ ६६ ॥

नित्यशः पूजयेद् गन्धपुष्पधूपादिभिः समम् ।

त्रिसन्ध्यमेवं कुर्व्वित नान्यथा सिद्धिदायकम् ॥ ६७ ॥

तत्कालोक्तानि कुण्डानि नव होमेषु सर्वतः ।

होतृणां दक्षिणा वस्त्रभूषादासगोधनैः ॥ ६८ ॥

यद्यन्निजेप्सितं तत्तद्दुष्करं सुकरन्तु वा ।

जपतर्पणहोमैर्व्वा सेकैः संसाधयेत् स्थिरः ॥ ६९ ॥

नैताभिह् सदृशी कापि विद्या लोकेषु विद्यते ।

तस्मात्तदाभिरुपायैः साधयेत् सर्वमीप्सितम् ॥ ७० ॥

पञ्चाशद्वारमावर्त्त्य विद्याभक्तिसमन्वितः ।

मुच्यते  निगडैः चःऐर्वैरिरोधैः मुद्रारुणैः ॥ ७१ ॥

शतवारं समावर्त्त्य विद्याविविधवैभवाः ।

लभन्ते तनयान् वन्ध्या अपि सर्वगुणान्वितान् ॥ ७२ ॥

अध्यर्द्धशतवारन्तु विद्या आवर्त्त्य भक्तितः ।

गुणरूपादिसम्पन्नां भार्य्यां विन्दन्त्ययत्नतः ॥ ७३ ॥

तावदावर्त्त्य कन्या वा पतिं सर्व्वगुणान्वितम् ।

लभन्ते पुत्रपौत्राद्यैरेधन्ते सम्पदन्विताः ॥ ७४ ॥

द्विशतं ताः समावर्त्त्य दारिद्र्यान्मुच्यते ध्रुवम् ।

त्रिशैर्भुमिशस्याढ्अश्चतुर्भिस्तु शतैर्धनौ ॥ ७५ ॥

पञ्चभिस्तु शतैर्भूपो भवेत् षड्भिः शुतैर्नृपः ।

सप्तभिस्तु शतैरस्य न मुञ्चत्यन्वयं रमा ॥ ७६ ॥

अष्टभिस्तु शतैरासां  नृपाः सर्व्वेऽस्य किङ्कराः ।

नवभिस्तु शतैरेष कन्दर्पो वनिताजने ॥ ७७ ॥

एवं नवशतं जप्त्वा सर्व्वान् कामानवाप्नुयात्।
आसान्तु विद्यानित्यानामङ्गानि शृणु सुन्दरि॥ ७८॥
द्विरुक्त्या तैः षडङ्गानि कुर्य्याद्वर्णैः कराङ्गयोः।
विन्यस्य मातृकायुक्तां जपेद्विद्यान्तमेकशाः॥ ७९॥
रक्ता रक्ताम्बरा रक्तभुषणस्रग्विलेपनाः।
पाशाङ्कुशेक्षुकोदण्डप्रसूनविशिखाः स्मरेत्॥ ८०॥
तदा वृत्तानां पञ्चानां शक्तीस्तत्सदृशाः स्मरेत्।
चतुरस्रद्वयं कृत्वा द्वारद्वयविभूषितम्॥ ८१॥
अष्टपत्राम्बुजं मध्ये नवयोनौ च तां यजेत्।
अङ्गावृत्तिं मधयोनावन्तरे त्वायुधावृतिम्॥ ८२॥
पृष्ठतो गुरुपंक्तिञ्च कोणेष्वष्टसु च क्रमात्।
बहिर्दलेष्वपि तथा यजेद्वर्णैर्विलोमतः॥ ८३॥
रूपिणीशक्तिसहितैर्म्मायाा सप्ताक्षरीयुतैः।
ब्राह्मयादिशकीस्तद्बाह्ये चतुरस्रद्वये यजेत्॥ ८४॥
आसां बलिप्रदानञ्च करोतु कुरुकुल्लया।
सप्ताक्षर्य्या केवलया प्रोक्तरूपां स्मरन् धिया॥ ८५॥
विलिख्य नाम्ना विद्यान्तु मध्ये बाह्येष्टयुग्मके।
तन्मध्यार्णं स्वरैर्भिन्नं लिखित्वास्त्रिषु मायया॥ ८६॥
हंसेलाग्रासमालिख्य निर्ऋत्यादुविलोमतः।

वाताद्यर्णं हृदन्तं स्याद्द्वादश द्वादश क्रमात्॥ ८७॥

साधयेदीप्सितं सर्व्वं षट्कर्म्मात्मकमीश्वरि।

स्तुत्वा द्वादशभिः श्लोकैस्तैः स्वान्ते ताः समुद्वसेत्॥ ८८॥

एतासां चक्रमध्यस्थो जपेद्विद्यां यदा वशी।

तदैव देवताचक्रसाम्यमस्य भविष्यति॥ ८९॥

महाचक्रस्य मध्यस्थं कृत्वा श्रीचक्रमुज्ज्वलम्।

तत्रैवे देवीमावाह्य पूजयेत् सर्वसिद्धये॥ ९०॥

एवं कृत्वा प्रतिष्ठाप्य बिधानेनार्च्चयेद्यतः।

तत्राज्ञासिद्धयो लोके प्रकाशन्ते महाद्भुताः॥ ९१॥

तथा च कृत्वा तन्मध्ये लोहितां लोहिताम्बराम्।

सुन्दरीं युवतीं तत्र संस्थाप्याभ्यर्च्चयेत् क्रमैः॥ ९२॥

प्रत्यब्दमेवं कुर्वीत मीनस्थे भास्करे बिधौ।

पूर्णे तु दिवसे तेन देवी तुष्टेष्टदा भवेत्॥ ९३॥

नखरं क्षुरिकां खड्गं चापशूलगदाशरान्।

अन्यद्वा शस्त्रमखिलं महाचक्रस्य मध्यगम्॥ ९४॥

कृत्वाभिपूज्य विद्याभिः साधयोनिवलिं पुरः।

दत्त्वा तैः समरे शत्रून् हत्वा विजयमाप्नुयात्॥ ९५॥

दिनतो वारतः पक्षान्मासात् षट्त्रिंशता दिनैः।

जपन्तो कारमेकन्तु विद्या नित्यात्मिकास्तु ताः॥ ९६॥

आयुरारोग्यमैश्वर्य्यं विजयं वाञ्छितं क्रमात्।
लभन्ते ललिता याभिः सम्प्रदायवती भवेत्॥ ९७॥
अन्यथासम्प्रदायत्वाज्जपहोमार्च्चनादिकम्।
कृतं जन्मान्तरे सम्यक् सम्प्रदायाय कल्पते॥ ९८॥
जपतर्पणहोमार्चाक्रमे विद्या भजेदिमाः।
तेनाक्षराणां सिद्धत्वान्मन्त्राः सिध्यन्त्यशेषतः॥ ९९॥
तासामुपासितुर्लोके नास्ति साधनदुष्करम्।
नृपाणामङ्गनानाञ्च वल्लभो जायते शिवः॥ १००॥
पुरुषात्ममयी व्याप्तिरिति सम्यक् समीरिता।
अस्या निफालनाच्चित्ते तत्तत्त्वं स्वात्मसात् कृतम्॥ १०१॥
इति षोडशनित्यातन्ते श्रीकादिमते मातृकाव्याप्तिर्नाम पञ्चविंशतिपटलम्॥ २५॥

## षड्विंशपटलम्।

अथ षोडशनित्यानां विद्याव्याप्तिस्वरूपतः।
मन्त्राणां वैभवं वक्ष्ये शृणु देवि यथाविधि॥ १॥
नादोत्पत्तिञ्च तद्रूपं स्थानाप्त्या तस्य वर्णताम्।
ततः पदानि वाक्यानि मन्त्ररूपाणि कानिचित्॥ २॥
तत्संख्यां विद्यया स्वात्मसंस्कारस्य् क्रमं तथा।
अमृतेश्वरिदेव्यास्तु वर्णैस्तैर्म्मिथुनैरपि॥ ३॥

व्याप्तिं प्रयोगांस्तैः सम्यगभीष्टप्राप्तिहेतवे ।

समुद्दिष्टक्रमेणैव सर्व्वमेत्ददशेषतः ॥ ४ ॥

स्वात्मेच्छाशक्तिघातेन प्राणवायुस्वरूपतः ।

मूलाधारे समुत्पन्नः पराख्यो नादसम्भवः ॥ ५ ॥

स एव चोद्ध्र्वतां नीतः स्वाधिष्ठाने विजृम्भ्रतः ।

पश्यन्त्याख्यामवाप्नोति तथैवोद्ध्र्वं शनैः शनैः ॥ ६ ॥

अनाहते बुद्धितत्त्वसमेतो मध्यमाभिधः ।

तथा तयोर्द्धनुन्नः स विशुद्धौ कण्ठदेशतः ॥ ७ ॥

वैक्कर्य्याख्यस्ततः शीर्षकण्ठताल्वोष्ठदन्ततः ।

जिह्वामूलाग्रपृष्ठस्थस्तथा नासाग्रतः क्रमात् ॥ ८ ॥

कण्ठताल्वोष्ठकण्ठौष्ठाद्दन्तौष्ठद्वयस्तथा ।

समुत्पन्नान्यक्षराणि क्रमादादिक्षकाबधि ॥ ९ ॥

आदिक्षान्तरतेत्येषामक्षरत्वमुदीरितम् ।

तेषु स्वराः स्वतन्त्राः स्युस्तैर्य्यज्याद्यञ्जनं भवेत् ॥ १० ॥

षोडशानां स्वराणाञ्च षत् त्रिंशद्यञ्जनैः क्रमात् ।

संयोगेनैव जायन्ते तद्रूपाणि तु संख्यया ॥ ११ ॥

षड्सप्ततियुतं पञ्चशतं तैः स्युः पदानि वै ।

तैर्व्वाक्यानि च मन्त्राश्च वेदभाशान्यभेदतः ॥ १२ ॥

वाचका विश्वरूपस्य प्रपञ्चस्यात्मनस्तथा ।

शब्दव्याकरणादीनां नियमादियुतास्तथा ॥ १३ ॥

तेषामन्योन्यसम्भेदजातानामेकयुग्मतः ।

त्रिभिरित्यादिरूपाणां संख्या कर्त्तुं न शक्यते ॥ १४ ॥

अनन्तत्वादचिन्त्यत्वात्तद्रूपाणां न कीर्त्तनम् ।

एवं शब्दस्य माहात्म्यं वक्तुं कस्यापि नास्ति हि ॥ १५ ॥

शक्तिस्तथापि ते किञ्चिद्वदामि शृणु प्रिये ॥ १६ ॥

चतुः षष्टिमिताः कोट्यस्ताः सम्भुय पुरोदिताः ।

कोट्यः स्युस्तत्क्रमात्तासां विद्या वक्ष्यामि ताः क्रमात् ॥ १७ ॥

षट्सप्तत्या पञ्चशतं प्रथमान्यक्षराणि वै ।

द्वितीयानि च तान्येव क्रमेण स्युरथादितः ॥ १८ ॥

तृतीयानि च तान्येव योजयेदादितः क्रमात् ।

क्षान्तैः षत्रिंशदर्णैस्तैः समायैरुक्तसंख्यकाः ॥ १९ ॥

विद्या भवनि शिष्टाः स्युरेकाकारास्तु तैर्विना ।

ताभिस्तत्कोटिसंख्याका विद्यास्त्रिचतुरर्णकाः ॥ २० ॥

तासामपि तु सर्व्वासां ध्यानार्च्चायन्त्रपूजनैः ।

पुरुषार्थास्तु सिध्यन्ति तदुक्तं मातृकायुधैः ॥ २१ ॥

संस्कारान् शृणु देवेशि गुरुणा शिष्यरक्षणे ।

समानत्वेऽपि देहादेर्व्यापारे गुरुशिष्ययोः ॥ २२ ॥

पूज्यपूजकभावत्वकारणैः प्रत्ययं तथा ।

प्रत्यक्षं यैस्तु दृष्टान्तैराशु ते दर्शयाम्यहम् ॥ २३ ॥

संस्कारो मन्त्रयन्त्रार्च्चाभिषेकाद्यैस्तुनोर्यदि ।

सा जरारोगमरणक्लेशैर्न स्पृश्यतेऽन्यथा ॥ २४ ॥

प्राणस्य वै तदारभ्य नित्यता स्याच्च देहिनाम् ।

आत्मनश्चेदरूपस्य संस्कारो नैव युज्यते ॥ २५ ॥

इन्द्रियाणां यदि भवेत्तदा प्राणस्मानता ।

बुद्धेश्चेदात्मना साम्यात् कस्य स्याद् गुरुवीक्षणम् ॥ २६ ॥

इत्यादिसंशयैः खिन्नचित्तानां कीणपाप्मनाम् ।

सेकेक्षणोपदेशैस्तु गुरुणा क्रियते तु यत् ॥ २७ ॥

तदहं सुस्फुटं सम्यग्वक्ष्ये गुह्यतरं परम् ।

यदवाप्य त्यजत्याशु संशयाख्यं महामलम् ॥ २८ ॥

देहेन्द्रियमनःप्राणसाक्षिणस्त्वात्मनः प्रिये ।

संस्कारः क्रियते सम्यग् गुरुणा तत्त्ववेदिना ॥ २९ ॥

सेकेन देहे यत्किञ्चिदशुभं तन्निरस्यये ।

वीक्षणादात्मनो बुद्धेरयथार्थनिकृन्तनम् ॥ ३० ॥

उपदेशेन या तस्य चिरारूढा तु वासना ।

दुस्तरां तां धिया स्वात्मविमर्शेन विनाशयेत् ॥ ३१ ॥

एवं कृते बुद्ध्वृत्तेः संसाराज्ञानरूपिता ।

विनाशो नित्यशुद्धात्मस्वरूपालम्भ इत्युभे ॥ ३२ ॥

भवतस्तत्र दृष्टान्तं प्रत्यक्षं पश्य पार्वति ।
शस्यानां बीजरूपस्य बह्निस्पर्शात् प्ररोहिता ॥ ३३ ॥
न भवत्येव तत्रास्य शक्तिरेव तु दह्यते ।
तथास्याज्ञानजन्मादि कारणं यत्तथैव तत् ॥ ३४ ॥
किञ्च कार्पासबिजानि लाक्षया रञ्जितानि तु ।
दृश्यते तत्प्ररोहश्च पुष्पादि च तथा भवेत् ॥ ३५ ॥
रह्स्यं परमं सर्व्वसिद्धिचिन्तामणिस्थिरम् ।
सुसाध्यं सद्गुरुप्राप्तमघानां सङ्गवर्ज्जितम् ॥ ३६ ॥
पुरश्चरणहोमार्च्चातर्पणस्तुतियन्त्रकैः ।
रहितं ते वदाम्यद्य मन्त्रविद्यास्त्वनन्तकाः ॥ ३७ ॥
ताः शृणु त्वं महेशानि सर्व्वाभीष्टाप्तयेऽनिशम् ।
साधकानाञ्च सिद्धानां नेतरेषां कथञ्चन ॥ ३८ ॥
वेदभाषेतरात्मत्वत्रिभेदानामशेषतः ।
स्द्वासनां साध्वसाधुचिन्ताविरहितं सदा ॥ ३९ ॥
त्वदात्मकं समुदयं विश्रान्तिश्च मदात्मकम् ।
उभयात्मकमात्मस्वरूपं नादस्य तस्य तैः ॥ ४० ॥
कालेनान्यत्वदुःखार्त्तिवासनानाशतो ध्रुवम् ।
पराहन्तामयं सर्वस्वरूपस्वात्मविग्रहम् ॥ ४१ ॥
सदात्मकं स्फुरत्ताख्यमशेषोपाधिवर्जितम् ।

प्रकाशरूपमात्मत्वे वस्तु तद्भासते परम् ॥ ४२ ॥
यत एवमतो लोके नास्त्यमन्त्रं यदक्षरम् ।
वति मन्दि त्रीधेहिस दासतः वं सथावस ॥ ४३ ॥
षडष्टद्वादशार्णानां वैष्णवानामशेषतः ।
मन्त्राणां परतत्त्वार्थवाचकत्वादभेदता ॥ ४४ ॥
ललिताविद्यया तद्वत् प्रासादस्य् त्रयात्मनः ।
तथैव च प्रायाश्च गायत्र्याश्चोक्तरूपतः ॥ ४५ ॥
व्याहृतीनां महावाक्यपरमात्माजपात्मनाम् ।
प्रणवस्य च तद्रूपयोगात् स्यात्तत्तदात्मता ॥ ४६ ॥
बिन्दुभ्यां तां तथा मायामुभयोरैक्यविग्रहम् ।
हंसरूपां प्राणशक्तिं तद्वैलाम्यसमुद्भवम् ॥ ४७ ॥
प्रणवञ्च विजानाति योऽसौ नित्याविदीरितः ।
इतरे भक्तिमन्तस्चेत् कालात्तज्ज्ञानमाप्नुयुः ॥ ४८ ॥
अभक्तिभजनं लोके नित्यानां क्लेशदायकम् ।
भक्तिभेदे च कथय ययाप्नोत्यखिलं ध्रुवम् ॥ ४९ ॥
देवतामन्त्रयन्त्राणां ध्यानादीनामशेषतः ।
यदन्वयात् फलावाप्ति र्यद्वियोगे श्रमो वृथा ॥ ५० ॥
तां भक्तिं तव वक्ष्यामि रहस्यामद्भुताद्भुताम् ।
सम्यक् फलमयीं सिद्धमलभ्यामल्पपुण्यतः ॥ ५१ ॥

उक्तलक्षणसम्पन्ने गुरौ तत्प्रोक्तयोस्तथा ।
विद्यानुष्ठानयोः स्थैर्य्यं धियः संशयनाशतः ॥ ५२ ॥
तारकत्वाप्तमत्तत्त्वे भक्तिरुक्ताखिलार्थदा ।
यया विहीना नियतमिहामुत्र च दुःखिनः ॥ ५३ ॥
सर्व्वक्लेशापदम्भोधिपोतरूपां महाद्युतिं ।हू
आधिमहादावप्रावृषञ्चामृतेश्वरीम् ॥ ५४ ॥
शृणु वक्ष्ये समस्तानां प्राणिनां जीवविग्रहाम् ।
षड् विधां जपहोमार्च्चातर्पणध्यानयन्त्रकैः ॥ ५५ ॥
दावाम्बुस्वैर्भवेदाद्या त्वन्या हृद्धं समायया ।
ज्याकं दाहवनस्वैः स्यात्तृतीया सामृतेश्वरी ॥ ५६ ॥
वासनोक्तप्रकारेण षद् विधा सा समीरिता ।
अङ्गानि तासामाद्याया दीर्घस्वरनियोजनात् ॥ ५७ ॥
कृत्वा कराङ्गयोः पञ्चात्तत्त्रयं षोडशस्वरैः ।
संयोज्यामृतसंस्थानान्न्यसेदन्यत्तु तद्गतम् ॥ ५८ ॥
अङ्गुष्ठपृष्ठतत्सन्धिलिङ्गनाभिषु हृत्स्तने ।
गलनासाक्षिकर्णभ्रूशङ्खमूर्द्धसु वै क्रमात् ॥ ५९ ॥
दक्षवामसमारम्भात् पुंस्त्रियोरप्ययं क्रमः ।
शुक्ले पूर्णान्तमितरे मूर्द्धादिप्रतिलोमतः ॥ ६० ॥
भगद्वयस्य व्यत्यासाद्दर्शान्तेऽङ्गुष्टगा क्रमात् ।

नित्यशो मृतगस्थानसमारम्भावसानकम् ॥ ६१ ॥

न्यसेत्ताः षद् विधा प्रोक्तक्रमान्ते न तु नित्यशः ।

न्यासेनामृतरूपी स्यात्  साधकः क्षिणकल्मषः ॥ ६२ ॥

ध्यानं तासां प्रवक्ष्यामि शृणु प्रोक्तक्रमेण वै ।

यासां स्मरणमात्रेण क्लेशा नश्यन्त्यशेषतः ॥ ६३ ॥

शुद्धस्फटिकसङ्काशां मौलिवद्धेन्दुनिर्गतैः ।

अभृतैरार्द्रदेहास्तास्त्वमलाभरणान्विताः ॥ ६४ ॥

कुमुदं पुण्डरीकञ्च साकेन्दुभमृतं करैः ।

दधानाः स्मेरवदना मुक्ताभरणभूषिताः ॥ ६५ ॥

षोडशच्छदयुक्तानां पद्मानां दलमध्यगाः ।

ताभिः षष्टिशतार्णात्मशक्तिभिः परिवारिताः ॥ ६६ ॥

तत्तद्विद्याक्षरोपेतं तदर्णं रूपिणीपदम् ।

शक्तीतिद्व्यक्षरं प्रोक्तसप्ताक्षर्य्या च संयुतम् ॥ ६७ ॥

चतुर्दशाक्षरी विद्या कृत्वैवं ताभिरर्च्चयेत् ।

बाह्यात् प्रवेशगत्यैव प्रादक्षिण्यात् सुगन्धिभिः ॥ ६८ ॥

सितैः प्रसूनैः श्रीखण्डकर्पूरद्रवलोलितैः ।

पूजयेद्वहिरासान्तु विदध्याद्वलियुग्मकम् ॥ ६९ ॥

निवेद्य पायसं दुन्धकदलीफलशर्कराः ।

होमञ्च तैस्तर्पणस्तु जलैः कर्पूरवासितैः ॥ ७० ॥

तद्लक्षं जपेद्विद्यां पयोभक्ष्यः समाहितः।

एवं जपादिसंसिद्धविद्यो मन्त्री यदा जलम्॥ ७१॥

समुद्रजं स्पृषन् हस्ततलेन प्रजपेच्च ताः।

एकैकशः शतादेवं तत्तोयं दुग्धसन्निभम्॥ ७२॥

तेष्वेव तत्तद्विद्यार्णसमेतान् षष्टिसंयुतान्।

शतार्णानालिखेन्मध्ये तदाद्यं मध्यतो लिखेत्॥ ७३॥

साध्याक्षरसमोपेतं यन्त्रं स्यादिष्टसिद्धिकृत्।

तेषामन्तो?

न्यसम्भेदालिखनात् स्युरनन्तकाः॥ ७४॥

प्राक्प्रत्यग्दक्षिणोदक्क कृत्वा विंशतिसूत्रकम्।

कोष्टान्युत्पाद्य सुसमान्येकषष्ट्या शतत्रयम्॥ ७५॥

तत्कोणतो मार्जयीत चत्वारिंशत् सपञ्चकम्।

शेषं वज्रं भवेत् कोष्ठैरेकाशीतिशतेन वै॥ ७६॥

तत्र दिक्षु यथा पूर्वं चतुर्भिः स्यात्त्रिकोणकम्।

तेषु तास्ता लिखेद्विद्यां षड्साध्याख्यासमायुताम्॥ ७७॥

प्राग्वत् प्राङ्मध्यमारम्भात् प्रादक्षिण्यप्रवेषेतः।

विलिखेदमृतार्णांस्तु क्रमात् षष्टिशतं प्रिये॥ ७८॥

शेषेषु कोणमध्यस्थपञ्चकेऽभिहितक्रमात्।

बाह्यादिमध्यमान्तन्तु लिखेदन्यास्तु पञ्च वै॥ ७९॥

साध्याक्षरयुतान्येव षड्भिः षड्यन्त्रकाणि तु ।
यन्त्राणि तेषां सर्वत्र गदादिपरिरक्षणम् ॥ ८० ॥
उत्पातशान्तिमन्यानि मङ्गलानि च कारयेत् ।
यस्मिन् देशे त्विदं यन्त्रषकंट्के त्वेवं  सुपूजितम् ॥ ८१ ॥
तत्र चीरग्रहव्याधिमारीदुर्भिक्षशात्रवः ।
सदा न सम्भवन्त्येवं भवन्त्येव च सम्पदः ॥ ८२ ॥
प्राक्प्रर्तग्दक्षिणोदक्क कृत्वा द्वादशसूत्रकम् ।
सैकविंशच्छतं कोष्ठान्यभितो मार्जयेत् क्रमात् ॥ ८३ ॥
दशपञ्चसमोपेतं शिष्टे वज्रैकषष्तिके ।
मध्ये तद्दिनजां विद्यां आलिख्याख्यासमन्विताम् ॥ ८४ ॥
तद्दिक्ष्वेकैकतः कृत्वा त्रिकोणानि यथाविधि ।
प्राग्वदग्रत्रिकोणात्तु विलिखेदुदयाक्षरात् ॥ ८५ ॥
षष्ट्यक्षराणि क्रमतो मिथुनान्यत्र पूजयेत् ।
घटिकाक्रमयोगेन गन्धपुष्पादिभिस्तथा ॥ ८६ ॥
तीव्रार्त्तिषु रणोत्थासु गदोत्थास्वन्यजासु च ।
शीघ्रं शमं प्रयान्त्येव क्लेशास्तत्र प्रपूजनात् ॥ ८७ ॥
सम्पदे चार्च्चयेदेवमरुणैर्गन्धपुष्पकैः ।
सितैर्व्वा सौरभोपेतैर्मण्डाच्छ्रियमाप्नुयात् ॥ ८८ ॥
पूर्णस्वेवं समाराध्य मिथुनानि तथाविधि ।

समस्तवाञ्छितं वर्षादवाप्नोत्येव निश्चितम्॥ ८९॥
एवं त्रिजन्मस्वर्च्चातो जीवेद्वर्षशतं सुखी।
नीरोगो निर्गताधिश्च निवृत्तिनीतिसंयुतः॥ ९०॥
क्रूरेषु चाभिचारेषु पूजयेन्मिथुनानि वै।
मध्ये साध्यसमोपेते वज्रयन्त्रे दिनानिशम्॥ ९१॥
मान्त्रिकैर्यामतो वारकल्पितैः स्वगृहे नृपः।
नित्याभक्तैः समीचीनैः स्निग्धैः संप्राप्तदक्षिणैः॥ ९२॥
सुदक्षिणैर्दिनैः कैश्चित् प्रयोकारं निहन्ति सः।
तथा त्रिलोहाश्मतले कृत्वा वज्रं सुविस्तृतम्॥ ९३॥
सर्वतो विलिखेच्छक्तीस्तत्पुटे तानि संलिखेत्।
मध्ये साध्यं समालिख्य तत् खनेद्भवनादिषु॥ ९४॥
तत्रानिशं सम्पदः स्युरीप्सिताश्च निराकुलाः।
निःसपत्ना निरुपमा नीतियुक्ता निरन्तराः॥ ९५॥
पूर्णाभिषेके यास्चक्रे पूज्याः प्रोक्तास्तु शक्तयः।
तासां विद्यां शृणु प्राज्ञे याभिः स्यात् सिद्धविग्रहः॥ ९६॥
खरोत्थाभिः सहोत्थाभिर्नित्याविद्याभिरेव तु।
समीरिता विषोढाभिः स्वरवर्जमशेषतः॥ ९७॥
सहस्रेण समायुक्तश्चत्वारिंशाच्चतुःशतम्।
ललिताशक्तिपूजोक्तवीजद्वयसमन्वितम्॥ ९८॥

रूपशक्तीति सहितं सप्ताक्षर्य्यन्तमर्चयेत्।

प्रत्येकं षोडशार्णाभिर्विद्याभिस्ताभिरम्बिके॥ ९९॥

एवं ते गदितं सर्वं विद्याया व्याप्तिवैभवम्।

यन्मयं विश्वमखिलं दृश्यते सचराचरम्॥ १००॥

नियमात्ममयी व्याप्तिरिति सम्यक् समीरिता।

अस्या निफालनाच्चित्ते तत्तत्त्वं स्वात्मसात् कृतम्॥ १०१॥

इति षोडशनित्यातन्त्रेषु श्रीकादिमते मन्त्रवैभवं नाम षड्विंशं पटलं परिपूर्णं

परामृष्टम्॥ २६॥ ॐ॥

सप्तविंशपटलम्।

अथ षोडशनित्यानां कालेन प्राणतोच्यते।

मातृकाभूतनाथाद्यैः श्रिचक्रेण च शक्तिभिः॥ १॥

लवादीनान्तु कालस्य दुर्लक्ष्यत्वात्तदीरितम्।

एकश्वासं समारभ्य तत्संख्याभिः क्रमेण वै॥ २॥

अहोरात्रस्य तद्व्याप्तिगुत्त्वा तेनान्यदूहयेत्।

विशेषांश्चान्तराद्बाह्यात्तत्तत्सिद्ध्युपपादकान्॥ ३॥

मूलाधारोद्भवो वायुः प्राणाद्याख्यां समश्नुते।

स तु पञ्चविधो भूतभेदादुद्भवदेशतः॥ ४॥

नासायाः पुटयोः पार्श्वतुङ्गमध्याधरन्ध्रगाः।

प्राणाग्नीलाम्बुखात्मानः पवनाः स्युर्यथाक्रमन्॥ ५॥

गुरुकेतू भृगुकुजौ बुधार्कौ चन्द्रसुर्य्यजौ।

क्रमाच्चतुर्षु भूतेषु व्योम सर्व्वात्मकं भवेत्॥ ६॥

उभयस्थो भवेद्राहुश्चन्दूसूर्य्यौ पुटक्रमात्।

वामदक्षौ तयोस्तस्य प्रवेशो निर्गमस्तथा॥ ७॥

जीवश्चन्द्रो रविः शून्यो भागः स्त्रीपुरुषौ तथा।

पृथिवी सलिलं चन्द्रो रविरन्यत्रयं भवेत्॥ ८॥

गृहेषु चन्द्रो गुर्व्विन्दुगुरुज्ञा भास्करः परे।

मातृकाञ्च तथा विद्या स्वरव्यञ्जनभेदतः॥ ९॥

अधः पृष्ठञ्च चन्द्रः स्यादुर्द्धाग्रे दिनकृद्भवेत्।

शरीरेऽपि घटेरूर्द्धं चन्द्राधो रविरीरितः॥ १०॥

अस्तीति वाक्यं चन्द्रः स्यान्नास्तीयुक्तो रविः स्मृतः।

शुक्लकृष्णौ तथा प्रक्षाविति चन्द्रा दशान्तराः॥ ११॥

एवं सूर्य्या दश प्रोक्ता बाह्याभ्याञ्च यशस्विनि।

एकादशविधौ चन्द्रभास्करौ सम्यगीरिती॥ १२॥

तयोश्चन्द्राः प्रीतिकरा भास्कराः क्लेशकारिणः।

राहु शून्यञ्च सर्व्वत्र नाशाय भवति क्षणात्॥ १३॥

सूर्य्येषु शस्तः सर्व्वत्र मृधभोजनमैथुनैः।

संग्रहश्चान्यदखिलं चन्द्रे सिध्यत्ययत्नतः॥ १४॥

जीवे तु कथितं तथ्यं मेध्यदर्शश्च  सिध्यति।
निश्चित्य भवतीत्युक्तमन्यथा चेतदन्यथा॥ १५॥
अनिश्चिते विधौ कन्या गर्भप्रश्नेऽन्यतः पुमान्।
शून्ये गर्भविपत्तिः स्यादित्याद्यूह्य वदेद्दृढम्॥ १६॥
शून्ये नभसि राहौ च शुभान्येवाशुभान्यपि।
शुबानि तत्र सर्व्वाणि नश्यन्ति परमेश्वरि॥ १७॥
वामे वहति वायौ तु वदेद्देशिकशिष्ययोः।
तत्स्थाने स्थापयित्वा तं तत्कर्णे कथयेन्मनुम्॥ १८॥
अथवा जीवगस्थाने तत्कर्णे मन्त्रमादिशेत्।
अन्यथा शून्यराहोस्तु नाशाय गुरुशिष्ययोः॥ १९॥
षष्ट्या युतैस्तु त्रिशतैर्निश्वासैर्नाडिका मता।
तासां षष्ट्या दिनं पूर्णं तद्दिनं स्यात् पुनः पुनः॥ २०॥
एकस्मिंस्तु दिने श्वासाः सहस्राण्येजविंशतिः।
षट्शतञ्च ततस्तेषां स्वरूपम् शृणु सुन्दरि॥ २१॥
आरभ्यार्कोदयं प्रातः सप्तत्या द्विशतं क्रमात्।
प्राणाग्नीलाम्बुखानि स्युर्नवत्यान्यत्र संक्रमः॥ २२॥
तत्राप्येवमतोन्यत्राप्येवञ्च दशमक्रमात्।
दिनमेवं ब्रजेदादौ दर्शप्रतिपदं प्रति॥ २३॥
एवं क्रमेण सर्व्वेषां प्राणोदय उदीरितः।

एतत्क्रमविपर्य्यासादभव्यानि भवन्ति हि ॥ २४ ॥

वलाधिकाश्चरा वामे वलिनो दक्षिणे स्थिराः ।

उभयत्रोभयात्मानः शुभाशुभपरीक्षणे ॥ २५ ॥

सार्द्धद्वाविंशतिश्वासक्रमाद्द्वादशराशयः ।

तत्र सार्द्धचतुष्केण भूतानि स्युरिति क्रमात् ॥ २६ ॥

घटिकार्णेषु सर्वत्र वाय्वाद्येकान्तरोदये ।

तत्तदर्णभवाः श्वासाः षष्ट्या त्रिशतमीरितम् ॥ २७ ॥

तेषु तद्भूतवर्णानां दशानामादितो दश ।

सप्तावृत्त्या ततः शेषाः प्राणाग्नीलाम्बुखाक्षरैः ॥ २८ ॥

संख्याभिर्व्वासनाव्याप्तिं श्वासानां शृणु सुन्दरि ।

यया विहितया मन्त्री सदा दर्शनवान् भवेत् ॥ २९ ॥

नित्याविद्याप्तितत्त्वानां संख्याः स्युः पूर्वमेकशः ।

ततो दिनार्णाः सन्ध्याः स्युस्ततश्च घटिकार्णकाः ॥ ३० ॥

राशयो द्वादश ततो ग्रहा भूतानि पञ्च वै ।

मातृकाश्चापि पञ्चाशच्छ्रीचक्रस्थाश्च शक्तयः ॥ ३१ ॥

सैका नवतयः प्रोक्ता देवी सर्व्वात्मना स्थिता ।

एवं विद्यां वासनां यो भावयेत् परमेश्वरि ॥ ३२ ॥

नाडीचक्रञ्च मर्माणि देहान्तर्म्मरुतां क्रियाम् ।

योगाभ्यासं तदङ्गैश्च स्वेच्छोत्क्रान्तिविधानकम् ॥ ३३ ॥

परकायप्रवेशश्च योगसिद्धस्य लक्षणम् ।
आसन्नमृत्युचिह्नानि कथयामि यथाक्रमम् ॥ ३४ ॥
प्राक्प्रोक्तमूलाधारस्य मध्यगा त्र्यस्रमध्यतः ।
सुषुम्ना पृष्ठवंशाख्यवीणादण्डस्य मध्यगा ॥ ३५ ॥
मूलादिब्रह्मरन्ध्रान्ता नासाग्राद्द्वादशाङ्गुले ।
तदग्रात् पायुगा प्रोक्तालम्बुषाख्या तु नाडिका ॥ ३६ ॥
त्र्यस्राग्रादुत्थिता नाडी  कुहूर्नाम ध्वजान्तिका ।
तद्वामदक्षपार्श्वाभ्यां सविश्वोदरवारणे ॥ ३७ ॥
जठरान्त सर्वगा च प्रोक्ते तद्वदनन्तरे ।
हस्तिजिह्वायशस्विन्यौ तत्तदङ्गुष्ठगे पदोः ॥ ३८ ॥
तथैवेडापिङ्गले च नासारन्ध्रद्वयान्तगे ।
गान्धारी च तथा पूषा नेत्रद्वयगते क्रमात् ॥ ३९ ॥
तया कर्णगते शङ्खपयस्विन्यौ क्रमेण वै ।
सरस्वती तु या नाडी सा तु जिह्वाग्रगामिनी ॥ ४० ॥
एवं चतुर्द्दश प्रोक्ता नाड्यो देहे प्रधानकाः ।
तासां सन्धिषु तत्सन्धिष्वेवं नाड्यः स्थितास्तनौ ॥ ४१ ॥
तासां प्रधाननाडीनां संख्या सार्द्धत्रिलक्षकम् ।
अप्रधानाः शिरा देहे त्वसंख्या याभिरेव वै ॥ ४२ ॥
वेष्टुतौर्य्यैर्नरः सर्वैः स्वकीयैरक्षया निशाम् ।

नाड्यः सुषिरा रक्तमरुत्पूर्णाश्च सर्व्वगाः ॥ ४३ ॥

सुषुम्नामध्यगा वज्रा नाडी तन्मध्यगा परा ।

चित्राभिधाना तन्मध्ये स्थिता सा कुण्डली परा ॥ ४४ ॥

मर्म्माण्यङ्गुष्ठगुल्फाङ्घ्रिपृष्ठजङ्घाख्यजानुषु ।

ऊरूसौवनिकामुष्कमेढ्रनाभिषु पार्श्वयोः ॥ ४५ ॥

हृदयस्तनकण्ठांसकृकाटीकर्णमूर्द्धसु ।

शङ्खयोः फाल्गुनासादिमध्यान्तास्यकपिलतः ॥ ४६ ॥

अष्टत्रिंशदिति प्रोक्तान्येषु वायोस्तु धारणात् ।

परकायप्रवेशश्च स्वेच्छोत्क्रान्तिश्च सिध्यति ॥ ४७ ॥

दशानामपि वयूनां देहस्थानां क्रियाः शृणु ।

ऊर्द्ध्वाधोगमनासक्तौ प्राणापानौ सदा तनौ ॥ ४८ ॥

नाग उद्गारकृत् प्रोक्तः क्षुत्कृत् कृकरकस्तथा ।

देवदत्तो जृम्भणकृत् रवकृच्च धनञ्जयः ॥ ४९ ॥

कूर्म्म उन्मेषकृत् प्रोक्त उदानोऽपि तथा द्विकृत् ।

समानवायुः कायाग्निं सन्धुक्षयति पाचितुम् ॥ ५० ॥

व्यानाख्यो रसमादाय व्यापयेदखिलां तनुम् ।

एषां दशानामंशास्तु मरुतां स्युरनन्तकाः ॥ ५१ ॥

तेषां प्रसाराद्देहस्य समीचीना स्थितिर्भवेत् ।

वैलोम्ये विकृताङ्गत्वाल्लोकैर्नाशाय कल्प्यते ॥ ५२ ॥

जीवात्माभेदरूपेण मनसा पर्मात्मनः।

योगो योगस्तु विज्ञेयस्तस्याङ्गानि तथाष्ट वै॥ ५३॥

यमोथ नियमः पश्चादासनं तदनन्तरम्।

प्राणायामस्तथा प्रत्याहारस्तदनु धारणम्॥ ५४॥

ध्यानं समाधिरित्युक्तान्यष्टाङ्गानि यथाक्रमात्।

कथयामि शृणु प्राज्ञे यैर्म्मर्त्त्यो मत्समो भवेत्॥ ५५॥

तत्प्रत्यूहाः षडाख्याताः कामक्रोधौ ततस्तथा।

लोभमोहौ मान्मदौ वह्निवत् सर्वनाशकाः॥ ५६॥

आत्मापरोक्षप्रत्यूहकर्म्मणस्तु यनो यमः।

तथैकादशरूपः स्यान्नियमः परिकीर्त्तितः॥ ५७॥

अहिंसा सत्यमास्तिक्यमार्जवं समता धृतिः।

क्षमा दया त्रिधाशौचं सन्तोषो गुरुसेवनम्॥ ५८॥

पद्मस्वस्तिकवीराख्यभद्राण्युक्तानि वै क्रमात्।

आसनानि मनःस्थैर्य्यकरणे साधानि वै॥ ५९॥

ऊर्वोरुपरि विन्यस्य व्यत्यासात् पादयोस्तले।

बाह्यपार्श्वद्वयस्पर्शात्तत् पद्मासनमीरितम्॥ ६०॥

तथा तयोरधोभागतदन्तः पार्श्वसङ्गमात्।

स्वस्तिकाकारतः प्रोक्तं तद्भद्रासनमीश्वरि॥ ६१॥

तलान्तः पार्श्वगं कुर्य्यादेकमन्यन्तु बाह्यगम्।

ऊर्वोरधस्तथोर्द्ध्वे च द्विधा भद्रासनं स्मृतम्॥ ६२॥

व्यत्यस्तत्लयोरूर्द्ध्वसंस्पर्शादुच्चजङ्घयोः।

पादयोर्जानुदेशे वै वीराख्यां योगपट्टतः॥ ६३॥

प्राणायामन्त्रिधा प्रोक्त उत्तमाधममध्यमाः।

लाघवो भूतलत्याग उत्तमे चित्तनिर्वृतिः॥ ६४॥

सर्व्वाङ्गे स्वेदसंवृद्धिरधमे मध्यमे तथा।

सर्व्वाङ्गकम्पनं प्रोक्तमभ्यासात् कालसंयुतात्॥ ६५॥

तेप्युत्तमगुणा भूयुरभ्यासात् कालयोगतः।

तस्मात् समभ्यसेत् प्रातः सायञ्च नियमेन वै॥ ६६॥

वामेन नासारन्ध्रेण पूरयेदमृतात्मना।

स्मरन्नम्बु मरुत् पश्चाद्दक्षिणेनापसारयेत्॥ ६७॥

एवं सुसाधिते पश्चाद्द्वात्रिंशन्मात्रयाहरेत्।

धारयेत्तच्चतुःषष्ट्या रेचयेत्तत्तुरीयतः॥ ६८॥

कम्पश्च पुलकानन्दौ वैमल्यस्थैर्य्यलाघवाः।

तद्वत् कान्तिप्रकाशौ च योगसिद्धस्य लक्षणम्॥ ६९॥

मूलाधारे मनः कृत्वा वायुनापूर्य्य मूलतः।

नाडीचक्रान्तरं नीत्वा सर्व्वाङ्गानि च चारयेत्॥ ७०॥

एवं संसाधिते वायावष्टत्रिंशत्।सु मर्म्मसु।

धारयन् वायेदिच्छावशेनाङ्गानि सर्वतः॥ ७१॥

तथाधारगतं कृत्वा मनः पवनसंयुतम्।

रसाम्बुदाहव्याप्तस्वैः सहंसैर्व्यापयेत्ततनुम्॥ ७२॥

एवं तैरक्षरैर्देहे वायुना तन्मयीकृते।

त्रिकालज्ञो विशुद्धात्म सुखी जीवेच्चिरं भुवि॥ ७३॥

स्वेच्छाचारी व्योमगश्च ब्रजेत्देवैश्च सङ्गमम्।

स्वेच्छया देहमध्यस्थः कुड्मगृहगतो यथा॥ ७४॥

एवं संसिद्धयोगस्तु स्वेच्छया देहमात्मनः।

प्राणानाकृष्य मध्यस्थसुषुम्नारन्ध्रतस्तथा॥ ७५॥

ब्रह्मरन्ध्राद्विनिर्गत्य भूयात् सर्व्वात्मनात्मवान्।

अथवोत्तरसंप्रोक्तचूर्णा स्वादनतो वशी॥ ७६॥

विरक्तचित्तः स्वं देहं तेनोपायेन सन्त्यजेत्।

स्वेच्छोत्क्रान्तिरिति प्रोक्ता योगयुक्तात्मनां प्रिये॥ ७७॥

परकायप्रावेशन्तु वक्ष्ये देवि महाद्भुतम्।

कलौ दुःशाटकं प्रायो मर्त्त्ये सिद्धिरपीश्वरि॥ ७८॥

अक्लेशतः परित्यज्य प्राणान् स्वकतनुं तथा।

परिपूर्णाङ्गसंयुक्तामग्रतो वीक्ष्य योगतः॥ ७९॥

प्रविशेत्तत्तनुं प्राणप्रतिष्ठोक्तविधानतः।

स्वां तनुं गोपयेत् स्वियैस्ततस्ताञ्च तथा ब्रजेत्॥ ८०॥

सिद्धस्य लक्षणान्यष्टौ योगाभ्यासेन सर्वदा।

शृणु तानि महादेवि यैरन्यैर्जायते गुणैः ॥ ८१ ॥

द्वन्द्वहानिः सुखावाप्तिरारोग्यं वश्यवृत्तिता ।

जितेन्द्रियत्वमक्रोधः कृपया जनगोपिता ॥ ८२ ॥

आसन्नमृत्योश्चिह्नानि ?

कथयामि शृणु प्रिये ।

यैः साध्यसाधकौ ज्ञात्वा देहत्यागमतन्द्रितौ ॥ ८३ ॥

देवतास्वात्मभजनपरौ स्यातां ततस्तु तौ ।

सुगतिं प्राप्य सिद्ध्यै तु भवतो जातमात्रतः ॥ ८४ ॥

अकारणं निजां पूर्वां विमुच्य प्रकृतिं नरः ।

समाश्रयेत्ततस्त्वब्दान्मृतिस्तस्य सुनिश्चितम् ॥ ८५ ॥

अरुन्धतीं ध्रुवं व्योम्नि नेक्षते च तदर्द्धतः ।

दृशौ नासान्तिकाक्रान्त्या चन्द्रके योङ्गयोर्न चेत् ॥ ८६ ॥

विलोकयति तस्यार्द्धान्मृतिमेति सुनिश्चितं ।

गुल्फाधः स्फुरणं नाड्योः पादयोश्चेन्न जायते ॥ ८७ ॥

तस्याशु नाशो गदितो भानौ रुण्डं च पश्यतः ।

निरुद्धकर्णरन्ध्रस्य न चेत् कुण्डलिनीध्वनिः ॥ ८८ ॥

धूमो वा दृश्यते मूर्द्धिर्न गृहक्षेत्रादितोऽपि वा ।

मूर्द्धिर्नगा विहगा लीनाः परासुं तं न को वदेत् ॥ ८९ ॥

परस्चात्कृतार्को गण्डूषे न पश्येच्छक्रचापकम् ।

सद्यः परासुमात्मानं जानीयात् सर्वथा नरः ॥ ९० ॥

स्वमस्तककरः पश्येत् प्रकोष्ठं स्थूलमात्मनः ।

आगुल्‌।फोरन्तराष्टभ्या पश्यन्नातो विनश्यति ॥ ९१ ॥

श्लेष्मशुक्रमलानि स्युर्निमग्नानि जले यदा ।

तस्मिन् पक्षे प्रयात्येव यमं सन्त्यज्य जीवितम् ॥ ९२ ॥

हाटकां प्रतिमां पश्यन् ध्रुवं याति यमालयम् ।

भास्करं भगणैः पश्यन्नपि याति यमालयम् ॥ ९३ ॥

जलादिषु तनुच्छायां विकृतां वीक्ष्य मासतः ।

प्रयाति निधनं छिद्रं पश्यन् भानोश्च मण्डले ॥ ९४ ॥

स्नातानुलिप्तगात्रस्य पुरः शुष्यति चेदुरः ।

स पक्षाद्याति निधनं सर्वैरपि सुरक्षितः ॥ ९५ ॥

गुरुमातृगणान् विप्रान् चन्द्रसूर्य्यौ च देवताः ।

आस्तिकान् सततं निन्दन्नकारणत एव च ॥ ९६ ॥

श्वास्ववैरस्य दलने परित्यागे स्वरोषतः ।

गुरुमन्त्रपरित्यागेऽप्यचिराज्जायते मृतिः ॥ ९७ ॥

गुरुं विद्याञ्च जनकं जननीं सर्वदेवताः ।

सदाधिक्षेपशापाभ्यां न्यक्कुर्वन्नाशु नश्यति ॥ ९८ ॥

पुस्तकं निजगेहं वा विष्टरं शयनन्तु वा ।

निष्कारणे निराकुर्वन्नाशु नश्यति मानवः ॥ ९९ ॥

दृग्देहचक्रवालानां वैवर्ण्ये मासतो मृतिः ।
ध्याते स्वदेववैरूप्ये मासतो निधनं भवेत् ॥ १०० ॥
कालतत्त्वमयी व्याप्तिरिति सम्यक् समीरिता ।
अस्या निफालनाच्चित्ते तत्तत्त्वं स्वात्मसात् कृतम् ॥ १०१ ॥
इति षोडशनित्यातन्त्रे श्रिकादिमते श्वासरूपं नाम सप्तविंशं पटलम् ॥ २७ ॥

## अष्टविंशपटलम्

अथ षोडशनित्यानां लोकात्मत्वं वदामि ते ।
यन्मयं विश्वमखिलं वर्तते सचराचरं ॥ १ ॥
कालभतृकयोर्व्योमाप्ति प्रागेवोक्ता मया तव ।
वाच्यवाचकयोगेन मातृकालोकयोरपि ॥ २ ॥
व्याप्तिमद्य प्रवक्ष्यामि सम्यक् ते काललोकयोः ।
यदायत्तमिदं विश्वं नित्यास्तत्कालविग्रहाः ॥ ३ ॥
कालस्य शोडशाकारो रूपो दृश्यत एव हि ।
वृड्विक्षयाभ्यां चन्द्रस्य आद्यया कलया तथा ॥ ४ ॥
लोकरूपं तत्प्रमाणं कालचक्रञ्च तादृशम् ।
तयोरन्योन्यनित्यात्वव्याप्तिं तद्वत् स्थितिं तयोः ॥ ५ ॥
नित्यालोकस्थितिं मानं तासां कवचविग्रहम् ।
ग्रहाणां मातृकारूपं शृणु प्रोक्तं क्रमेण वे ॥ ६ ॥

हेमरूपो भुवो मध्ये मेरुस्तिष्ठति पर्व्वतः ।
तस्याभितो महौपार्श्वे पञ्चाशच्छतयोजनाः ॥ ७ ॥
लवणेक्षुसुरासर्पिर्दधिक्षीरजलात्मभिः ।
सिन्धुभिः सप्तभिर्द्वीपैस्तत्संख्यैर्द्विगुणोत्तरैः ॥ ८ ॥
आवृता बाह्यसलिलजलधेर्व्वाह्यपार्श्वयोः ।
मध्ये विस्तारमानात्तु बहिरावृत्य तत् पुनः ॥ ९ ॥
कालचक्रं पराशक्तिमारुतेन सदैव तु ।
नूनं परिभ्रमत्येव पश्चिमाधोपसव्यतः ॥ १० ॥
तच्च तन्मानवीथिभिर्युतमष्टभिरद्भुतैः ।
तेजोमयैर्द्वादशारैर्युक्तं मेषादिविग्रहैः ॥ ११ ॥
तेषु वीथिषु पूर्व्वाशाभुखाः सप्तग्रहाः स्थिताः ।
राशियुक्तेन कालेन प्रोक्तेनोपर्य्यधस्तथा ॥ १२ ॥
प्रयान्ति तेषां चारेण लोकानां भवति स्थितिः ।
मध्यस्थमेरौ ललिता सदैवास्ते महाद्युतिः ॥ १३ ॥
तस्याभितो जलान्तस्थाः शेषास्ताः स्युश्चतुर्द्दश ।
तद्बहिः परमे व्योम्नि त्वेता चित्रा तु संस्थिता ॥ १४ ॥
कृतादिवर्षादारभ्य प्रतिवर्षमिति स्थिता ।
द्वितीयादिषु वर्षेषु क्रमात्ताः परिवृत्तिभिः ॥ १५ ॥
षोडशाब्दे परे व्योम्नि ललिता सलिलाम्बुधौ ।

चित्रा च भवतीत्थं हि भजन्ते परिवर्त्तनम्॥ १६ ॥

एवं युगेषु चान्येषु वर्त्तते प्रोक्तरूपतः।

कालेष्वपि च मध्यादि परव्योमान्तमीश्वरि ॥ १७ ॥

परिवृत्तिं भजन्ते ता मध्यस्था स्वा ।शतश्चरेत्।

अन्याः सर्व्वास्तत्र तत्र चरन्ति स्वयमेव वै ॥ १८ ॥

तथा कालक्रमात्तास्तु भजन्ते परिवर्त्तनम्।

कालतो देशतश्चक्रादैक्यं संजायते यदा ॥ १९ ॥

तदा भवन्ति भूपाला धार्म्मिकाः कालवर्षतः।

प्रजाश्च सुखिनो भूयुररोगाः कालमृत्यवः ॥ २० ॥

कालचक्रस्य बाह्यस्थवीथ्यां तिष्ठन्ति तारकाः।

तद्बहिः परमव्योम स्थितिस्तत्र तदन्तिका ॥ २१ ॥

तासामपि च नित्यानां षोडशानाञ्च तत् क्रमात्।

एवं देशे च काले च तन्मयं समुदीरितम् ॥ २२ ॥

देशवर्षतिथीनाञ्च सम्पातादैक्यमागताम्।

पूजयेत् सविशेषं तां प्रजपेच्चाखिलाप्तये ॥ २३ ॥

तेषु विद्योपदेशात्तु तस्यास्तत् सन्निधिर्भवेत्।

महाशक्तिश्च जायेत त्रयाणामैक्यवैभवात्॥ २४ ॥

कालप्राप्तां यजेत् स्वाब्दजन्मवासरके तु तां।

देशप्राप्तान्तु तन्मासपूर्णायां पूजयेच्छिवे ॥ २५ ॥

प्रत्यब्दमेवं कुर्व्वाणं न मुञ्चति रमा यशः।
कदाचिदपि दीर्घायुररोगो ज्ञानवान् सुखी ॥ २६ ॥
राजभिर्म्मनुजैस्त्रीभिरन्यैः प्राणिभिरप्यसौ।
मान्यते सर्वमन्त्राश्च सिद्धाः स्युस्तत्र पूजनात् ॥ २७ ॥
जम्बूः प्लक्षः शाल्मली च कुशक्रौञ्चौ यथाक्रमम्।
शाकश्च पुष्करश्चेति सप्तद्वीपेषु भूरुहाः ॥ २८ ॥
तेषां नामभिरेव स्युस्तत्तन्नामानि तन्मुखात्।
तत्तन्नामभिरभ्यर्च्च्य तद्वीपं तत्र पूजयेत् ॥ २९ ॥
तां तां नित्यां तत्र तत्र काले काले तु साधकः।
एवं पूजयितुर्लोके न समोस्ति न चाधिकः ॥ ३० ॥
मध्ये भूमिं तामभितः कालचक्रं ततो बहिः।
महाव्योम च निःसीमं तत्रैतद्द्वयसंस्थितिः ॥ ३१ ॥
सुस्थिराया भुवो मध्ये चक्रस्य भ्रमतोऽनिशम्।
ग्रहाणां तत्र संवासप्रचारनित्यतास्मनाम् ॥ ३२ ॥
कारणं परमेशानि तवेच्छैव तु केवलम्।
न त्वन्यदवलम्बाय तयोः कुत्रापि विद्यते ॥ ३३ ॥
तयोर्ब्बहिः परे व्योम्नि क्वचिदब्धिचतुष्टयम्।
प्रागुक्तरूपां तत्तीरे कोलवक्त्रान्तु पञ्चमीं ॥ ३४ ॥
सलिले कुरुकुल्लाञ्च पोतारूढां शुचिस्मिताम्।

तन्मध्ये नवरत्नानि महाद्वीपञ्च तत्र वै ॥ ३५ ॥

कल्पकोद्यानमृतुभिः षड्भिः सेवितविग्रहम् ।

तन्मध्येऽसंख्यरूपाभिर्वृतांसङ्गीतशक्तिभीः ॥ ३६ ॥

गीतवादित्रनृत्यादिसंसक्ताभिरनारतम् ।

विनोद्यमानां विलसन्मदमन्थरवीक्षणाम् ॥ ३७ ॥

रत्नमण्डपमध्यस्त्विराजहरत्नसिंहासनोपरि ।

शुचिस्मितां शक्तिवृन्दगीताकर्षणनन्दिताम् ॥ ३८ ॥

सहजासवसम्बिगैः संजातानन्दविग्रहाम् ।

दयामदारुणापाङ्गविलोकितसुसाधकाम् ॥ ३९ ॥

परितो भूषणैश्चित्रैः स्वर्णचामरकादिभिः ।

मानान्दिरदानश्वानपि तथाविधान् ॥ ४० ॥

शक्तिभिर्दर्शितानग्रे पश्यन्तीमभितोत्सवाम् ।

स्वसमानाभिरभितो नित्याभिः सेवितान्तथा ॥ ४१ ॥

याति तासां पूजयिता तत्समाकारतां शनैः ।

तद्विनोदस्तत्समीपनिवासी स्यात् सुनिश्चितम् ॥ ४२ ॥

कोटियोजनविस्तीर्णसमायामं सहाद्भुतम् ।

नवरत्नमयं द्वीपं तन्मानाब्धिभिरावृतम् ॥ ४३ ॥

तत्तृतीयांशमानस्य सहस्रादित्यतेजसम् ।

रत्नद्वीपस्य मध्यस्थतृतीयांशे तु मण्डपे ॥ ४४ ॥

क्टयादित्यद्युतिप्रान्तेष्वभितोऽसंख्यशक्तिभिः।

तथा समन्वित्तं ध्यायन्नरो भवति मत्समः॥ ४५॥

एवं ध्यात्वार्च्चयेद्देवीं भक्त्या परमयोक्तया।

नरो निरस्तसंसारमूलाज्ञानो जितेन्द्रियः॥ ४६॥

निपुणश्च कलादक्षः सुखिभिः समवित्तवान्।

अपापः पुण्यशीलश्च सत्यार्जवसमन्वितः॥ ४७॥

देशिकः स्वकुलोत्तुङ्गः सर्व्वसम्भावितात्मवान्।

जायते तस्य परितो योजनं पावनं भवेत्॥ ४८॥

तदालोकनसंलापसंस्पर्शादिकृतां नृणाम्।

पापकर्म्मक्षयात्तेन रहिताः स्युश्च तत्समाः॥ ४९॥

कालचक्रस्य नित्याया लोकस्य च बहिःस्थितिः।

व्योमरूपमनाद्यन्तं यत्तच्चिन्मयमावयोः॥ ५०॥

यो वेत्त्येवमशेषन्तु नित्यावैभवमीरितम्।

स जीवन्मुक्त एवेति प्रोक्तं तल्लक्षणञ्च ते॥ ५१॥

समस्तापद्विमुक्त्यर्थं सर्वसम्पदवाप्तये।

भूतप्रेतपिशाचादिपीडाशान्त्यै सुखाप्तये॥ ५२॥

समस्तरोगनाशाय समरे विजयाय च।

चोरसिंहद्वीपिगजनवयादिभयानके॥ ५३॥

अरण्ये शैलगहने मार्गे दुर्भिक्षके तथा।

सलिलादिमनः पीडास्वब्धौ पोतादिसङ्कटे ॥ ५४ ॥

प्रजप्य नित्याकवचं सकृत् सर्व्वन्तरत्यसौ ।

सुखी जीवति निर्द्वन्द्वो निःसपत्नो जितेन्द्रियः ॥ ५५ ॥

शृणु तत् कवचं देवि वक्ष्ये तव तदात्मकम् ।

येनाहमपि दुद्धेषु देवासुरजयी सदा ॥ ५६ ॥

सर्वतः सर्वदात्मानं ललिता पातु सर्वगा ।

कामेशी पुरतः पातु भगमाला त्वनन्तरम् ॥ ५७ ॥

दिशं पातु तथा दक्षपार्श्वं मे पातु सर्वदा ।

नित्यक्लिन्ना च भेरुण्डा दिशं पातु सदा मम ॥ ५८ ॥

तथैव पश्चिमं भागं रक्षेत् सा वह्निवासिनी ।

महावज्रेश्वरी रक्षेदनन्तरदिशं सदा ॥ ५९ ॥

वामपार्श्वं सदा पातु दूती मे त्वरिता ततः ।

पालयेत्तु दिशं चान्यां रक्षेन्मां कुलसुन्दरी ॥ ६० ॥

नित्या मामूर्द्धतः पातु साधो मे पातु सर्व्वदा ।

नित्या नीलपताकाख्या विजया सर्व्वतश्च माम् ॥ ६१ ॥

करोतु मे मङ्गलानि सर्व्वदा सर्व्वमङ्गला ।

देहेन्द्रियमनःप्राणान् ज्वालामालिनिविग्रहा ॥ ६२ ॥

पालयेदनिशं चित्रा चित्तं मे पातु सर्व्वदा ।

कामात् क्रोधात्तथा लोभान्मोहान्मानान्मदादपि ॥ ६३ ॥

पापान्मत्सरतः शोकात् संशयात् सर्व्वतः सदा ।

स्तैमित्याच्च समुद्योगादशुभेषु तु कर्म्मसु ॥ ६४ ॥

असत्यक्रूरचिन्तातो हिंसातश्चौर्य्यतस्तथा ।

रक्षन्तु मां सर्व्वदा ताः कुर्वन्त्विच्छां शुभेषु च ॥ ६५ ॥

नित्याः षोडश मां पान्तु गजारूढाः स्वशक्तिभिः ।

तथ हयसमारूढाः पान्तु मां सर्वतः सदा ॥ ६६ ॥

सिंहारूढाः स्तथा पान्तु मान्तरक्षगता अपि ।

रथारूढाश्च मां पान्तु सर्वतः सर्वदा रणे ॥ ६७ ॥

ताक्ष्यारूढाश्च मां पान्तु तथा व्योमगता स्तथा ।

भूगताः सर्वदा पान्तु माञ्च सर्वत्र सर्वदा ॥ ६८ ॥

भूप्रेतपिशाचापस्मारकृत्यादिकान् गदान् ।

द्रावयन्तु स्वशक्तीनां भीषणैरायुधैर्म्मम् ॥ ६९ ॥

गजाश्वद्विपिपञ्चास्यताक्ष्यरूढाखिलायुधाः ।

असंख्याः शक्तयो देव्याः पान्तु मां सर्वतः सदा ॥ ७० ॥

सायं प्रातर्जपन्नित्या कवचं सर्वरक्षकम् ।

कदाचिन्नाशुभं पशेन्न णोति च मत्समः ॥ ७१ ॥

ग्रहाणां मातृकाविद्याविग्रहं विग्रहं यतः ।

तेन तेषान्तु पूजार्थं वक्ष्ये तद्धाममण्डलम् ॥ ७२ ॥

सुधास्वरैर्भवेदिन्दोर्मण्डलं भास्करस्य तु ।

सुधाव्यञ्जनरूपं स्यादितरे तन्मया यतः ॥ ७३ ॥
तेन तेषां मण्डलानि तैस्तैर्व्वर्णैर्व्वदामि ते ।
तेषां नवानां पूजासु तन्मयं नवमण्डलम् ॥ ७४ ॥
चन्द्रार्कयोः पृथक् पूजास्वभ्यर्च्च्य मण्डलं तयोः ।
क्रमेण शृणु देवेशि सर्वश्रेयस्करात्मकम् ॥ ७५ ॥
प्राक्प्रत्यग्दक्षिणोदक्चतुःसूत्रनिपातनात् ।
त्रिहस्तमात्रे जनयेन्नव  कोष्ठानि तेषु वै ॥ ७६ ॥
मध्ये प्रकोष्ठयोः कृत्वा वृत्तत्रयमतिस्फुटम् ।
तन्मध्ये तिर्य्यगूर्द्धञ्च सूत्रद्वयनिपातनात् ॥ ७७ ॥
विधाय नवधा मध्यमीशादि विलिखेत् क्रमात् ।
वाताद्यष्टस्वरान्मध्ये प्रणवं नभसा युतम् ॥ ७८ ॥
वृत्तवीथ्योः स्वरोपेतं नभसा मातृकां लिखेत् ।
तत्रार्कमर्च्चयेत्तस्य नामभिर्द्वादशोदितैः ॥ ७९ ॥
प्रणवाद्यैर्नमोन्तैश्च भानोः सर्व्वत्र सर्व्वदा ।
सोमस्याद्यं स्वसंयुक्तं कृत्वा तेन तथार्च्चयेत् ॥ ८० ॥
तन्नाम्ना तत्र विलिखेद्विन्वाटयञ्च स्वराष्टकम् ।
षोडशस्वरयुक्तञ्च मातृकाञ्च स्वयोगतः ॥ ८१ ॥
विलिखेद्वृत्तयोर्म्मध्ये मध्यकोष्ठेपि तं लिखेत् ।
दाहवह्निस्वसहितमर्च्चयेत्तत्र मण्डले ॥ ८२ ॥

सोममुक्तक्रमेणैव प्रोक्तकालेषु सर्व्वदा ।
निवेद्य शर्करादुग्धपायसैश्चोपचारकैः ॥ ८३ ॥
सप्तस्वन्येषु कोष्ठेषु कृत्वा वृत्तत्रयं तथा ।
तत्तद्वर्गादिवर्णञ्च स्वरैस्तां मातृकामपि ॥ ८४ ॥
विलिख्य मध्यञ्च तथा कृत्वा तेषु च तत्क्रमात् ।
तत्तद्वर्गाक्षराण्याख्यात्र्यक्षरैरालिखेदपि ॥ ८५ ॥
मध्ये प्रणवगर्भस्थवर्गाद्यक्षरमालिखेत् ।
एवं कृतेषु नवसु पूजयेच्च नवग्रहान् ॥ ८६ ॥
अग्न्यादिशान्तमभितो लिखेन्नामान्यनुक्रमात् ।
त्र्यक्षरीणि चतुर्थ्यन्तान्यर्चयेत्तैश्च तानिति ॥ ८७ ॥
भौमं बुधं तथा सौरिं गुरुं राहुञ्च शुक्रकम् ।
केतुमेतैस्तु सर्वत्र मन्त्रानुक्तौ च पूजनम् ॥ ८८ ॥
एवं नवग्रहाणान्तु मण्डलान्युदितानि वै ।
तेष्वेव तेषामर्च्चातस्ते कुर्य्युस्तदनुग्रहम् ॥ ८९ ॥
भास्करेन्दोश्च तद्वारद्वये दर्शे च पूर्णिके ।
स्वोच्चयोः स्थितपूजाञ्च मण्डलं शृणु पार्वति ॥ ९० ॥
विलिख्य वृत्तयुगलं तन्मध्ये तिर्य्यगूर्द्ध्वतः ।
रेखाभिरष्टभिर्म्मध्ये त्वेकाशीतिपदे लिखेत् ॥ ९१ ॥
ईशकोष्ठादिपरितः प्रवेशेनामृतार्णकान् ।

मायान्ताशीतिसंख्यातान्मध्ये दावगतञ्च तत्॥ ९२॥

वृत्तयोरन्तरा कृत्वा मातृकां ग्रथिताञ्च तैः।

पञ्चभिश्च लिखेत्तत्र बिम्बे सोमं समर्चयेत्॥ ९३॥

कर्पूरचन्दनाभ्यान्तदालिखेदिन्दुबिम्बकम्।

रक्तचन्दनसिन्दूरगैरिकैरेकतो रवेः॥ ९४॥

कृत्वा बिम्बं तत्र तञ्च पूजयेत् प्रोक्तरूपतः।

द्विवृत्तान्तस्तिर्य्यगूर्द्ध्वाः कृत्वा रेखाः समान्तरम्॥ ९५॥

एकोनविंशं तन्मध्येष्वालिखेत् प्राग्वदीरितान्।

प्राणादिकान्नभोऽन्तांस्तु स्वैरुपेतान् स्वरैर्युतान्॥ ९६॥

वृत्तयोरन्तरा तैश्च पञ्चविंशतिवर्णकैः।

स्वरैर्भान्तयुतैर्वह्निदशार्णैर्ग्रथितां लिपिम्॥ ९७॥

विलिख्य विशदाकारं त्रिहस्तायामविस्तरम्।

तन्मध्ये भानुमावाह्य पूजयेत् प्राग्वदीश्वरि॥ ९८॥

पीठे वा सुधया क्लिप्ते भूतले वा शिलातले।

सुसमेनावृते कृत्वा बिम्बान्युक्तानि पूजयेत्॥ ९९॥

एवं सर्वत्र तन्त्रेस्मिन् ग्रहपूजा समीरिता।

विशेषादेशरहिते तत्र तत्क्रमतोर्चयेत्॥ १००॥

एवं ते देवि विद्यायाः काल्देशात्मतोदिता।

सर्व्वात्मना सर्वदा च सैवार्च्या सर्वविग्रहा॥ १०१॥

रागतत्त्वमयी व्याप्तिरिति सम्यक् समीरिता ।
अस्या निफालनाच्चित्ते तत्तत्त्वं स्वात्मसात् कृतम् ॥

इति षोडशनित्यातन्त्रेषु श्रीकादिमते लोकतादात्म्यादिकथनं नाम अष्टाविंशं पटलम् ॥ २८ ॥

## एकोनत्रिंशपटलम्

अथ षोडशनित्यानां होमाय विधिवच्छिवे ।
प्राच्यादिदिग्भागञ्च मण्डपादेस्तु लक्षणम् ॥ १ ॥
कुण्डानां स्थाननिम्माणैर्नाभियोन्यादिलक्षणम् ।
मानानि तेषामग्नेस्तु ध्यानं जिह्वास्तदर्च्चनम् ॥ २ ॥
होम्द्रव्याणि सामान्यविशेषाणि हुतक्रियाम् ।
उपक्रमोपसंहारौ फलानि च यथाक्रमम् ॥ ३ ॥
कथयामि शृणु प्राज्ञे यैर्म्मन्त्री सिद्धिमाप्नुयात् ।
यदि कुर्य्याद् यथादृष्टं विपन्नो निरयं ब्रजेत् ॥ ४ ॥
भानोर्गत्या दिशो ज्ञात्वा कुर्य्यात् कर्म्माणि देशिकः ।
तद्गत्या दिक् ।परिज्ञानं शृणु वक्ष्ये यथाविधि ॥ ५ ॥
सुसमे भूतले कृत्वा वृत्तं भ्रमणरुपतः ।
तन्मध्ये बिन्दुमध्यन्तु शङ्कुं संस्थाप्य तस्य वै ॥ ६ ॥
अग्रच्छायान्वयवशाद्वृत्ते पूर्वापरद्वये ।

पूर्वापराह्णयोः  कृत्वा चिह्नेतमभितस्तथा ॥ ७ ॥

स्वसमानपरिभ्रान्त्या कृत्वा वृत्तद्वयं पुनः ।

तयोः संश्लेषसञ्जातमध्यदक्षोत्तरस्थिते ॥ ८ ॥

सन्धिद्वये च प्राक्प्रत्यक्सूत्रमध्ये तु विन्यसेत् ।

सूत्रं दक्षोत्तरं तेषां अश्रैः प्रागादि कल्पयेत् ॥ ९ ॥

राज्ञां होमाभिषेकादिप्रयोगार्थन्तु मण्डपम् ।

विदध्यान्नवहस्तेन विस्तारायामसंयुतम् ॥ १० ॥

षोडशस्तम्भसंयुक्तं चतुर्द्वारं सुतोरणम् ।

उदुम्बरवटाश्वत्थप्लक्षैश्छदनमालया ॥ ११ ॥

पिहिताशेषकोणञ्च तत्त्रैभागैकभागतः ।

विदध्यान्मध्यतो देवीं करमात्रसमुन्नताम् ॥ १२ ॥

दर्पणोदरसङ्काशमध्यां तदभितस्तथा ।

प्रागादिदिक्षु कोणेषु वह्न्यादिषु च कल्पयेत् ॥ १३ ॥

कुण्डान्यष्टौ चतुष्कञ्च तेषां रुपञ्च नामकम् ।

निर्म्माणं सकलं वक्ष्ये यथाविधि तवानघे ॥ १४ ॥

तुलाकुलीरमेषाणां मकरस्य च देशतः ।

विदध्याद्वृत्तकुण्डानि चरराशिचतुष्टये ॥ १५ ॥

वृषे सिंहे वृश्चिके च कुम्भे च स्थिरराशिषु ।

विदध्याच्चतुरस्राणि ततः कुण्डान्यनुक्रमात् ॥ १६ ॥

मिथुने कन्यकायाञ्च चापे मीने क्रमेण वै ।
उभयात्मसु कुर्वीत योनिकुण्डानि मङ्गले ॥ १७ ॥
अमङ्गलेषु कुर्वीत चरेषःवर्द्धशशाङ्ककम् ।
शिरेष्वपि त्रिकोणानि परेषु तु चतुष्टये ॥ १८ ॥
पञ्चास्रञ्च षदस्रञ्च चाष्टकोणे सकर्णिकम् ।
एवं नवानां कुण्डानां शृणु मानादिलक्षणम् ॥ १९ ॥
मध्यमाङ्गुलिमध्यस्थपर्वणः परिणाहतः ।
तृतीयांशो भवेदेव तन्त्रे सर्वत्र चाङ्गुलिः ॥ २० ॥
तैश्चतुर्भिर्भवेन्मुष्टिर्वितस्तिस्तत्त्रिभिर्गुनैः ।
अरत्निस्तद्द्वयेन स्याद्धस्तस्तद्द्वयतः शिवे ॥ २१ ॥
तद्द्वयन्तु भवेद्व्यांअः तन्मानं स्यान्नरोन्नतिः ।
षणवत्यङ्गुला सा स्यात्तन्मानैः कुण्डकल्पनम् ॥ २२ ॥
प्राक्प्रत्यक्सूत्रमास्फाल्य तन्मध्ये चिह्नकल्पनम् ।
कृत्वा तत्पूर्वतः पश्चाद्द्वादशाङ्गुलमानतः ॥ २३ ॥
परं प्रमृज्य तत्रापि विदध्याच्चिह्नयुग्मकम् ।
प्राक्प्रत्यक्ँहिह्नमानेन तयोरेवावलम्बतः ॥ २४ ॥
दक्षिणोत्तरतो हंसपदे कृत्वा ततस्तयोः ।
प्रसार्य्य सूत्रं तच्चापि मार्जयित्वोक्तमानतः ॥ २५ ॥
ततस्तदग्राण्यालम्ब्य मध्यचिह्नस्य मानतः ।

कुर्याद्धंसपदं कोष्ठान्यभितस्तेषु पातयेत् ॥ २६ ॥
चतुष्तयन्दु सूत्रं च चतुरस्त्रं भवेत् समम् ।
तस्मिन्नन्यानि कुण्डानि वदामि तव मानतः ॥ २७ ॥
तेषां प्रोक्तक्रमेणैव चरादिषु तु राशिषु ।
माननिम्र्माणयोर्वक्ष्ये विधानं सुस्फुटं शिवे ॥ २८ ॥
तन्मध्याष्टादशांशेन प्राक्सूत्राग्रं विकाशयेत् ।
तिर्य्यक्सूत्राद्वहिस्तेन मानेन भ्रमयेत्तथा ॥ । २९ ॥
मध्यचिह्नावलम्बेन भवेत्तद्वृत्तकुण्डकम् ।
चतुरस्त्राभितः सा तु त्याज्या भूरन्यतस्तथा ॥ ३० ॥
लभ्यते सर्वकुण्डेषु तेन सर्वाणि सर्वतः ।
तत्समान्येव जायन्ते षणवत्यङ्गुलात्मना ॥ ३१ ॥
तन्मध्ये दशमांशं तु परित्यज्याध ऊर्द्धतः ।
तेषं शशाङ्कमानेन तन्मध्याद्भामयेत्तथा ॥ ३२ ॥
अर्द्धचन्द्राकृतिर्येन भवेत् कुण्डं तदीरितम् ।
येन द्वयं चराणां स्याद्राशीनां क्रमतः शिवे ॥ ३३ ॥
तस्यैव षष्ठमंशन्तु पार्श्वयोस्तु विकाशयेत् ।
प्रत्येकं पश्चिमं सूत्रं तन्मानेनाथ सूत्रयोः ॥ ३४ ॥
विन्यासाद्ब्रह्मसूचान्तं तद्वयाग्रावलम्बनात् ।
कुण्डं त्रिकोणमुदितं चतुर्षु स्थिरराशिषु ॥ ३५ ॥

तन्मध्यपञ्चमांशेन विकाश्य ब्रह्मसूत्रकम् ।

पूर्वतः पस्चिमद्वन्द्वं कोष्ठयोर्म्मध्यदेशतः ॥ ३६ ॥

तत्कोणमानेन तथा भ्रामयेत् पश्चिमाग्रकान् ।

उत्तराग्रावधि तथा दक्षिणाग्रावधि प्रिये ॥ ३७ ॥

तन्मध्यतिर्य्यक्सूत्राग्रद्वयावष्टम्भतस्तथा ।

विकाशितब्रह्मसूत्रावधि सूत्रद्वयं भवेत् ॥ ३८ ॥

योनि कुण्डमिदं भद्रे स्याच्चतुर्षूभयात्मसु ।

राषिषु प्रोक्तकल्याणकर्म्मसूक्तार्थसिद्धिकृत् ॥ ३९ ॥

तन्मध्यसप्तमांशेन ब्रह्मसूत्रं विकाश्य तत् ।

मानेन परितो भ्रान्त्या कृत्वा वृत्तं तथा ततः ॥ ४० ॥

तत्त्र्यंशमानात्तद्वृत्ते कृत्वा चिह्नानि तत्र वै ।

पातयेत् पञ्चसूत्राणि तत् स्यात् पञ्चास्रकुण्डकम् ॥ ४१ ॥

तन्मध्यषोडशांशेन विकाश्य ब्रह्मसूत्रकम् ।

तेन मानेन च तथा कृत्वा वृत्तमतिस्फुटम् ॥ ४२ ॥

तद्वृत्ते वृत्तमध्यस्य कुर्य्यादर्द्धेन चाङ्कनम् ।

तत्र षट्सूत्रपातेन भवेत् कुण्डं षदस्रकम् ॥ ४३ ॥

तन्मध्यदशमांशेन विकाश्य ब्रह्मसूत्रकम् ।

तेन मानेन सम्भ्रान्त्या कृत्वा वृत्तं तथा ततः ॥ ४४ ॥

तच्चतुःषष्टिभागेषु त्रयस्त्रिंशांशमानतः ।

वृत्ते विधाय चिह्नानि सप्तसूत्राणि पातयेत्॥ ४५॥
तत् सप्तास्रं भवेत् कुण्डं चापगं वायुदिग्गतम्।
समस्तवैरिनाशाय प्रोक्तं कुण्डमिदं शिवे॥ ४६॥
तन्मध्यस्य चतुर्विंशमाने बाह्येपि पूर्ववत्।
विधाय चतुरस्रन्तु पूर्वकोणार्द्धमानतः॥ ४७॥
कोणादभित एकास्य कृत्वा चिह्नानि चाष्ट वै।
तेषु चिह्नेषु कृत्वाष्ट सूत्राणि परितः शिवे॥ ४८॥
कुर्य्यादष्टास्रकं कुण्डमेतेषःआं मेखलादिकम्।
प्रवक्ष्यामि शृणु प्राज्ञे समुद्दिष्टं क्रमेण वै॥ ४९॥
वृत्तमध्यभुवो मानं त्रिगुणं विभजेत् क्रमात्।
स्ववाञ्छितेन मानेन तदस्राणि भवन्ति हि॥ ५०॥
एवं यन्त्रादिषुक्तेषु षत्त्रिंशेषु विधिर्भवेत्।
कुण्डेषु च तथा कोटिहोमादिषु समीरितम्॥ ५१॥
प्रोक्तेष्वन्यस्तमे कुण्डे नवहस्तप्रमाणके।
कारयेत् कोटिहोमन्तु पुरुषैरष्टभिस्तथा॥ ५२॥
दिग्विदिक्स्थैः क्रमात् पञ्चवासरैः सर्वसिद्धये।
तेषाञ्च दक्षिणां दद्यात् पूजाप्रणतिपूर्वकम्॥ ५३॥
गोचर्म्मद्वयमात्रन्तु भुवं गां प्रस्नुतस्तनीम्।
महिषीं सप्रजामश्वदासदासीविभूषणाम्॥ ५४॥

वासांसि हेमनिष्काणां शतं तेषामथैकशः ।

ततो गुरोश्च तान्येव तैः समानमुदीरितम् ॥ ५५ ॥

दिव्योत्पातेषु रोगार्त्तौ घोरे च रिपुनिग्रहे ।

तथा दिग्विजयेऽन्यस्य परकृत्यादिसम्भवे ॥ ५६ ॥

कारयेत् कोटिहोमन्तु विद्यया नित्ययाद्यया ।

सुरूपैश्च सुशीलैश्च नित्याभक्तैस्तथास्तिकैः ॥ ५७ ॥

प्रोक्तानां सर्वकुण्डानां अरत्निखातमात्रकम् ।

कोटिहोमस्य कुण्डस्य खातमूर्द्धन्तु तस्य वै ॥ ५८ ॥

सर्वेषां मेखलामानं वितस्त्यष्टतदर्द्धकैः ।

विस्तारोत्सेधयोः कुर्य्याद्योनिहोत्रासनाग्रतः ॥ ५९ ॥

महाकुण्डस्य तु पुनर्मे खला हस्तमानतः ।

तिसृणामपि विस्ताराः प्रत्येकं षोडशाङ्गुलाः ॥ ६० ॥

तेषामुत्सेधस ।ख्याश्च षोडश स्युः क्रमेण वै ।

योनिनिर्म्माणमधुना वासनाञ्च शृणु प्रिये ॥ ६१ ॥

वहिष्ठमेखलामध्यादारभ्य निजनालकम् ।

वितस्तिमात्रकां कोष्ठामश्वत्थदलसन्निभाम् ॥ ६२ ॥

वितस्त्यायामसंयुक्तां तदर्द्धेन तु विस्तृताम् ।

एकाङ्गुलोत्सेधयुतां मेखलोपरि सर्वतः ॥ ६३ ॥

मूलान्निम्नाग्रकां स्तोकं कुर्याद्योनिञ्च सर्वतः ।

योनिः कारणभूतस्य तत्त्वस्य् स्यात् पदं महत् ॥ ६४ ॥
तेन तत्रैव हव्यानां विधानं तन्मयत्वतः ।
फलानि पूर्णान्यचिरादयत्नाद्वितरत्यसौ ॥ ६५ ॥
महाकुण्डस्य चैवैतत् कुर्य्यान्मानं समुहतः ।
नाभिं कुर्य्यात्तु सर्व्वत्र कुण्डमध्ये विधानतः ॥ ६६ ॥
अष्टच्छदं सरोजन्तु विदध्याच्चारुविग्रहम् ।
चतुर्भिरङ्गुलैः कुर्य्यात् कर्णिकां दलमेव च ॥ ६७ ॥
विस्तारादपि चोत्सेधं षड्भिः षड्भिरुदीरितम् ।
प्राग्वन्महति कुण्डे च कुर्य्यदूहेन तत्तथा ॥ ६८ ॥
ध्यानमग्नेर्द्विधा प्रोक्तं सौम्यक्रौर्य्यविभागतः ।
सौम्यं नित्यासमाकारं ध्यानमन्यच्छृणु प्रिये ॥ ६९ ॥
द्विशीर्षसप्तहस्तञ्च त्रिपादसप्तजिह्वकम् ।
त्रिधारूपमतिक्रूरैररुणैः षड्भिरीक्षणैः ॥ ७० ॥
सव्यैश्चतुर्भिर्हस्तैस्तु शक्त्यक्षस्रुक्स्रुवौ तथा ।
इतरैस्तोमरं तालवृन्तं सर्पिःसुभाजनम् ॥ ७१ ॥
निहन्तुमनिशं व्यात्तवक्त्रं ध्यायेद्धविर्भुजम् ।
क्रूरेषु सर्व्वहोमेषु ध्यानवैभवमीरितम् ॥ ७२ ॥
वह्नेः शिरसि देहे वा श्रोत्रेष्वक्षिषु वा तथा ।
जुहुयाच्चेत्तदा क्षिप्रं तदधैस्तं विनाशयेत् ॥ ७३ ॥

ततस्तद्वक्त्रयोर्जिह्वासप्तकं सम्यगर्च्चयेत्।
जुहुयाच्च समाप्नोति वाञ्छितं सकलं क्षणात्॥ ७४॥
हिरण्या कनका रक्ता कृष्णा जिह्वायथार्थका।
दक्षवक्त्रगता सर्व्वसिद्धिदा तु समर्च्चनात्॥ ७५॥
सुप्रभा चातिरक्ता च बहुरूपा च वामगा।
बहुरूपायां जिह्वायां होमः सर्व्वर्थसाधकः॥ ७६॥
इतरासु हुनेत् क्रूरकर्म्मस्वभिमतेषु तु।
यस्यां जुहोति तामाद्यां समभ्यर्च्च्याथ सप्तशः॥ ७७॥
ततो हुनेच्च जिह्वायामुक्तायां तत्र कर्म्मणि।
सामान्यतो नित्यहोमे द्रव्याणि शृणु सुन्दरि॥ ७८॥
आज्यमन्नं पायसञ्च तिलतण्डुलमप्यथ।
तद्वयं चेति संप्रोक्तान्युक्तान्येतानि नित्यके॥ ७९॥
शुभैर्दर्भैः परिस्तीर्य्यं सर्व्वत्र शुभकर्मसु।
अभिचारेषु वान्येषु क्रूरेष्वन्येष्वपि प्रिये॥ ८०॥
नक्षत्रवृक्षैस्तद्योनिरक्तोत्थचरुणा तथा।
तन्मांसैस्तत्र तन्त्रोक्तैर्द्रव्यैः क्रूरेषु कर्मसु॥ ८१॥
प्रसूनान्येकसेकन्तु फलानि च तथा हुनेत्।
अन्नाज्यादि समस्तन्तु निष्कमात्रं हुनेत् क्रमात्॥ ८२॥
स्नातो विशुद्धवसनो धूमस्त्रग्गन्धवासितः।

प्रसन्नचित्तवदनः कुर्य्याद्धोमन्तु साधकः ॥ ८३ ॥
प्राङ्मुखो विष्टरासीनः प्राणायामपुरःसरम् ।
न्यस्तगात्रेऽर्घतोयेन प्रोक्षयेत् कुण्डमध्यकम् ॥ ८४ ॥
द्रव्याण्यन्यानि तत्रस्थान्यशेषःआणि विशुद्धये ।
दर्भेण विलिखेत् कुण्डमध्ये रेखाचतुष्टयम् ॥ ८५ ॥
प्राक्प्रत्यग्दक्षिणोदक् च तत्र जिह्वाः समर्च्चयेत् ।
प्रागादिषु तु सप्तापि मध्ये वह्निं तथा स्मरन् ॥ ८६ ॥
पूजयेत् सर्पिषा होमं कुर्य्यात् सप्त क्रमेण वै ।
जिह्वानामभिरेकैकं वह्नेश्च द्व्यक्षरादिकम् ॥ ८७ ॥
स्वाहान्तमन्त्रमुदितमष्टानां क्रमतः शिवे ।
वह्निं सभाजनंहस्ते गृहीत्वाङ्गारकञ्च तत् ॥ ८८ ॥
क्रव्यादेभ्यो नम इति प्रोक्त्वान्यत्तु सभाजनम् ।
विपरिभ्राम्य कुण्डन्तु तन्मध्ये विन्यसेत्ततः ॥ ८९ ॥
प्रज्वाल्य ललिताद्याभिर्विद्याभिः परिषेचनम् ।
कृत्वा दर्भैः परिस्तीर्य्य पलाशाश्वत्थपत्रकैः ॥ ९० ॥
तथ घृताहुतीः कृत्वा नित्या षोडश मूलतः ।
जुहुयादेकमेकन्तु नाथनित्यात्मभूतजैः ॥ ९१ ॥
ततश्च परिषच्यात्मानं स्वात्मानं विभाव्य ताम् ।
स्वाज्ञास्थानगतां बुद्ध्वा परिस्तरणपूर्वकम् ॥ ९२ ॥

दन्ध्वाग्नौ भस्मना कृत्वा तिलकं न्यस्तगात्रकः ।

पूजां समाप्य विचरेत् सुखी तद्रूपवान्नरः ॥ ९३ ॥

क्रूरकर्म्मसु होमेषु विधिरेष उदीरितः ।

तेषु तद्धोमकरणं समाप्ते नित्यशस्तथा ॥ ९४ ॥

साभ्यङ्गं विद्ययात्मानं कुर्य्यात् सम्पूजयेत्तथ ।

नित्यक्रमं ततो नित्यं तत्तद्दिवसविद्यया ॥ ९५ ॥

मिथुनानि च पञ्चाशत् पूजयेत् प्रणमेदपि ।

मङ्गले पूर्वमुदिते पाहि मामित्युदीरयेत् ॥ ९६ ॥

एवं ते कथितं सर्वं कुण्डादिषु समीरितम् ।

होमं तं त्रिविधं प्रोक्तं स्थूलसूक्ष्मपरत्वतः ॥ ९७ ॥

स्थूलं परञ्चोत्तरस्मिन् पटले सम्यगीरितम् ।

इतरस्य विधाने तु यानि ज्ञेयानि तानि तु ॥ ९८ ॥

प्रोक्तानि सकलानीत्थं होमाल्लक्ष्मीमवाप्नुयात् ।

विनाशयेदरातींश्च होमः पापानि चात्मनः ॥ ९९ ॥

नासाध्यमस्ति होमेन नानवाप्यमपीश्वरि ।

तस्माद्धोमेन सकलं साधयेत् सर्व्वाञ्छितम् ॥ १०० ॥

विद्यातत्त्वमयी व्याप्तिरिति सम्यक् समीरिता ।

अस्या निफालनाच्चित्ते तत्तत्त्वं स्वात्मसात् कृतम् ॥ १०१ ॥

इति षोडशनित्यातन्त्रेषु श्रीकादिमते कुण्डल्कृप्तिर्नाम एकोनत्रिंशं पटलम् ॥२९॥

ॐ ॥

त्रिंशपटलम् ।

अथ षोडशनित्यानां सामान्या वास्तुदेवताः ।

तासां चक्रं तत्र पूजाक्रमं सम्यग्वदामि ते ॥ १ ॥

तत्फलानि च तद्धोमविधानानि तथा विलम् ।

सूक्ष्महोमविधानानि तत्फलानि परं तथा ॥ २ ॥

क्रमेण शृणु देवेशि प्रोक्तानि फलसिद्धये ।

यैर्विना भुवने मन्त्राः सर्वे स्युर्निष्फला ध्रुवम् ॥ ३ ॥

चतुरस्त्राकृतिः कश्चिदसुरः सर्वनाशकृत् ।

पुरा तस्य वधायैव सर्वे देवाः स्मुद्यमम् ॥ ४ ॥

कृत्वा निहन्तुमुद्युक्तास्तैरवध्योऽभवद्वरात् ।

आवयोस्तन्निरासाय मामेत्याकथयत्तदा ॥ ५ ॥

कथयास्माकमधुना तद्वास्तुपुरुषस्य तु ।

दर्पशान्तिं नचेत्तेन विश्वमासीदुपद्रुतम् ॥ ६ ॥

इत्युक्ते तैर्मया प्रोक्तं निधनं तस्य दुःशकम् ।

खात्वा तमवनौ तस्य शरीरे स्थापयेत्तथा ॥ ७ ॥

नित्यशश्च त्रिपञ्चाशन्निःस्पन्दाक्रमणाय वै ।

नियोज्य तेषां ये पूजाविमुखास्तैः कृतानि तु ॥ ८ ॥

सुकृतानि समादद्युर्दुष्कृतानि च कुर्वते ।

तस्मात्तेषामर्च्चनन्तु प्रत्यहं कुर्वतां सदा ॥ ९॥

शुभान्येवाशु जायन्ते नैवाशुभकथापि च ।

तच्चक्रादिविधानन्तु शृणु सम्यग्वदामि ते ॥ १० ॥

प्राक्प्रत्यगुदक्षिणोदक् च कृत्वा वै दशसूत्रकम् ।

तैरेकाशीतिकोष्ठानि जातानि स्युः समानि च ॥ ११ ॥

तेषु मध्ये नवैकन्तु कुर्य्यात् कोष्ठानि तद्बहिः ।

एकीकुर्य्यात्त्रिकोष्ठानि दिक्षु प्रागादिषु क्रमात् ॥ १२ ॥

ततश्चतुर्षु कोणेषु तिर्य्यक्सूत्रचतुष्कतः ।

द्विधा कुर्य्यात् कोणकोष्ठान्यष्टौ तत्पर्श्वयोः पुनः ॥ १३ ॥

एकीकुर्य्यात्तथा द्वे द्वे तद्विथ्यां दिक्षु मध्यतः ।

एकमेकं भवेच्छिष्टं बहिर्द्वात्रिंशदीरितम् ॥ १४ ॥

सर्वमध्ये यजेत् सम्यग्ब्रह्माणं कमलासनम् ।

हेमाभञ्च चतुर्वक्रं वेदाध्ययनशीलिनम् ॥ १५ ॥

प्रागादि तद्बहिश्चापि यजेदेतान् प्रदक्षिणम् ।

आर्य्यकञ्च विवस्वन्तं मित्रमन्यं महीधरम् ॥ १६ ॥

कोणार्द्धकोष्ठयोरेकमेकमष्टौ च तद्द्वये ।

वह्न्यादीशान्तमभितः पूजयेत् पूर्ववत् प्रिये ॥ १७ ॥

सावित्रः सविता शक्र इन्द्रजिद्रुद्रतज्जयौ ।

आयापवत्सकौ चेति प्रोक्तास्तेऽष्टौ तु नामतः ॥ १८ ॥

कोणार्द्धकोणपार्श्वस्थेष्वग्न्यादोशान्तमर्च्चयेत् ।
अष्टौ क्रमेण ताराद्यैर्नमोन्तैर्नामभिस्तथा ॥ १९ ॥
अन्यानपि च चक्रेस्मिन् प्रोक्तान् सर्व्वांस्तथार्च्चयेत् ।
सर्व्वं गुहञ्चार्य्यमणं भञ्जकं पिलिपिच्छक्तम् ॥ २० ॥
चरकी च विदारी च पूतना च महेश्वरि ।
बहिरीशादि परितो यजेदष्टौ दिशं प्रति ॥ २१ ॥
ईशानस्चाथ पर्जन्यो जयन्तः शक्रभास्करौ ।
सत्यो वृषोन्तरिक्षश्च पूर्वाशाकोष्ठगाः क्रमात् ॥ २२ ॥
अग्निः पूषा च वितथो यमोऽथ गृहरक्षकः ।
गन्धर्व्वो भृङ्गराजश्च मृगो दक्षिणोकोष्ठगः ॥ २३ ॥
निऋतिश्च तथा दौवारिकः सुग्रीवकस्तथा ।
वरुणः पुष्पदन्तश्चासुराख्यशोषरोगकाः ॥ २४ ॥
पश्चिमाशास्थकोष्ठेषुपूज्या एते यथाक्रमम् ।
वायुर्नागस्तथा मुख्यः सोमो भल्लातकस्तथा ॥ २५ ॥
अर्गलो दितिरप्येवमदितिश्च यथाक्रमम् ।
कोष्ठेशूत्तरसंस्थेषु देवतास्ताः समीरिताः ॥ २६ ॥
द्वितीयवीथिमध्यस्थचतुष्कं कोणसूत्रतः ।
कृत्वा चतुर्द्धा तेष्वेव प्रागादिषु यथाक्रमात् ॥ २७ ॥
प्राच्ये युगार्णपर्य्ययनित्यार्णानालिखेत् क्रमात् ।

प्रागादिषु तथा दक्षे नित्यार्णाणुदयार्णकम्॥ २८॥

पश्चिमे भूमितोयाग्निवायुकर्म्मान्तिकान् लिखेत्।

उत्तरे पूजयामीति विलिकिह्यात्र यजेच्च तान्॥ २९॥

प्रत्येकं तैर्हुनेत् कुण्डे चतुरस्रेन्द्रदिङ्मुखः।

ब्रीहमुद्गयवैः क्षौद्रघृतदुग्धाप्लुतैः क्रमात्॥ ३०॥

अष्टोत्तरशतं वाष्टोत्तरविंशतिमेव वा।

प्रत्येकं तैर्हुनेद्द्रव्यैर्म्मन्त्रैस्तद्वच्च पायसैः॥ ३१॥

बलिश्च तेषां कुर्व्वित पायसैर्व्यञ्जनान्वितैः।

ससितैर्दुग्धकदलीफलापूपादिसंयुतम्॥ ३२॥

एवं सिंहगते भानौ पूर्णायां प्रतिवत्सरम्।

स्वगेहे वास्तुपूजायां मण्डले सर्वतः क्रमात्॥ ३३॥

कुर्य्यात्तद्दिवसे विप्रान् नित्याभक्तान् यथावलम्।

त्रयादहीनान् विविधैर्म्मधुराद्यैस्तु भोजयेत्॥ ३४॥

भ्यक्तेभ्यो दक्षिणां दद्याद्यथाशक्ति समर्च्य तान्।

एवं विदधातो गेहे नाकल्याणं कदाचन॥ ३५॥

न वालमरणं व्याधिभूतप्रेतादिकानि च।

न सर्पपीडा नान्योन्यकलहान्यशुभानि च॥ ३६॥

पुत्रपौत्रधनारोम्यपशुदासौसमृद्धिभाक्।

अरोगी विजयी ख्यातश्चिरं जीवति तद्गृहे॥ ३७॥

राजवेश्मसु सर्वत्र तथा च महिषिगृहे ।
सचिवामात्यसेनानीभवनेषु पुरे तथा ॥ ३८ ॥
विदध्यात् प्रतिवर्षन्तु प्रोक्तसिद्ध्यै तु देशिकः ।
न चेदुक्तान्यथारूपफलैः क्लेशोऽनिशं भवेत् ॥ ३९ ॥
त्रिलोहाश्मतलेष्वन्यतमे हस्तप्रमाणके ।
तत्तद्दैवतनामानि मायागर्भे समालिख्तेत् ॥ ४० ॥
तत्र तान् पूजयेत् सप्तपञ्चद्वित्र्येकवासरैः ।
स्थापयेद्वश्मसु क्वापि नित्यशश्चापि तत्र वै ॥ ४१ ॥
स्मरेत्तान् देवताबुद्ध्या कुर्य्यात् पुष्पाञ्जलिं त्रिशः ।
तद्वेश्ममङ्गलं ग्रामपुरखर्वटकादिषु ॥ ४२ ॥
विदध्यादखिलं क्षुद्रक्लेशशान्त्यै समृद्धये ।
ततः सूक्ष्मैः पराख्यैश्च होमैः सिद्धिं शृणु प्रिये ॥ ४३ ॥
स्वमूलाधारके वह्नौ कुण्डलिन्यास्यगामिनि ।
वाच्यवाचकरूपञ्च प्रपञ्चं जुहुयात्तथ ॥ ४४ ॥
येनावयोः समो देवि जायते हवनेन वै ।
तद्विधानं वद प्राज्ञ शम्भो सम्यङ्ममाधुना ॥ ४५ ॥
आधारे वह्निसंस्थानं कुण्डलिन्याः स्थितिं ततः ।
तद्रूपं तत्क्रियां सर्वं वद मे विशदं प्रभो ॥ ४६ ॥
शृणु वक्ष्ये विधानं ते सम्यग्विस्तरतोऽधुना ।

प्राणाग्निहोत्रविद्येति यत्त्रय्यां श्रूयते परम्॥ ४७॥

यज्ज्ञात्वा वनितागर्भं न प्रयाति नरो ध्रुवम्।

यद्व्ययायासरहितमनन्या पिक्षनिर्वहम्॥ ४८॥

यन्मनः क्लेशविश्रान्तोः स्थानं निःशेषकल्मषम्।

सुखास्पदं स्वगं विश्वमयं चिद्वेद्यवदनात् ?

॥ ४९॥

अत्रोक्तशेषमखिलं षड् त्रिंशे पटले स्फुटम्।

प्रदर्श्यते ततस्तत्र वर्णयामि च किञ्चन॥ ५०॥

नित्यानित्योदिते मूलाधारमध्येऽस्ति पावकः।

सर्वेषां प्राणिनां तद्वद्धृदये च प्रभाकरः॥ ५१॥

मूर्द्धनि ब्रह्मरन्ध्राधश्चन्द्रमाश्च व्यवस्थितः।

तत्तयात्मकमेव स्यादाद्या नित्या त्रिखण्डकम्॥ ५२॥

तेषां त्रयाणामैक्यन्तु मनसा भावयेत्तथा।

गमागमाभ्यां तेजोभिस्तेषामन्योन्यजैः शिवे॥ ५३॥

तथा समिद्धं तत्तेजस्त्रयं वुद्धाथ तन्मयम्।

चित्तविकल्पविधुरं भावयेदद्भुताञ्च यत्॥ ५४॥

तेषां त्रयाणां वर्णानां प्रागुक्तानां क्रमेण वै।

द्वाभ्यामन्यतमं कृत्वा पुटितं जुहुयाच्च तैः॥ ५५॥

पुटितान् भानुहृद्वर्णैः स्वरांस्तारेण हुङ्कृतैः।

कुण्डलीमुखमार्गाग्नौ जुहुयान्निश्चलाशयः ॥ ५६ ॥
वह्निभानुपुटान्तःस्थैश्चान्द्रैस्तद्वद्धुनेत् क्रमात् ।
चन्द्रभानुपुटान्तःस्थैर्वह्न्यर्णैर्जुहुयात्तथा ॥ ५७ ॥
भानुचन्द्रपुटान्तःस्थैर्वह्न्यैर्णैर्जुहुयात्तथा ।
चन्द्रवह्निपुटान्तःस्थैर्भान्वर्णैर्जुहुयादपि ॥ ५८ ॥
वह्निचन्द्रपुटान्तःस्थैरपि तद्वद्धनेत्ततः ।
तथा तेषां प्रातिलोम्यात् षोडशानां हुनेदपि ॥ ५९ ॥
एवं द्वादशधा होममक्षरैः स्यादुदीरितैः ।
कृत्वा तद्वाच्यमखिलमर्थरूपञ्च तैः समम् ॥ ६० ॥
तेजस्त्रयात्मरूपं स्यादावयोरपि तद्वपुः ।
अन्यानि चावयोरिच्छागृहीतानि वपूंषि वै ॥ ६१ ॥
तान्यन्यदेवतादेहसम्यगिच्छावशानि च ।
मुक्तिश्च तन्मयीभावस्थैर्य्यमेव समीरितम् ॥ ६२ ॥
तत्र कुण्डलिनीं ब्रूहि स्फुटं ने परमेश्वर ।
तां वदामि शृणु प्राज्ञे रहस्यं परमाद्भुतम् ॥ ६३ ॥
मूलाधारस्थवह्न्यात्मतेजोमध्ये व्यवस्थिता ।
जीवशक्तिः कुण्डलाख्या प्राणाकारेण तेन सा ॥ ६४ ॥
प्रसुप्तभुजगाकारा त्रिरावर्त्ता महाद्युतिः ।
मायाशीर्षा नदनी तामुच्चरन्त्यनिशं स्वगे ॥ ६५ ॥

सुषुम्नामध्यदेशे सा यदा कर्णद्वयस्य तु ।
पिधाय न शृणोत्यस्या ध्वनिं तस्य तदा मृतिः ॥ ६६ ॥
एवं सा जीवशक्तिस्तु यदा कुण्डलिनीस्थितिम् ।
विहाय ऋजुतां याति स्वेच्छादण्डाहता सती ॥ ६७ ॥
तदा विश्वप्रतीतिः स्यात् प्राणिनामन्यदा पुनः ।
निशान्धकारे भुवनस्थितिवत् स्वात्मनः स्थितिः ॥ ६८ ॥
एवं तां वेत्ति यो देहे देशिकादेशदर्शिताम् ।
स वेत्ति ब्रह्म परमं मां त्वामपि च सधकः ॥ ६९ ॥
जीवन्मुक्तः स विज्ञेयः शुद्धात्मासक्तमानसः ।
अस्पृष्टपुण्यपापश्च शोकहर्षातिभूमिगः ॥ ७० ॥
रागद्वेषविनिर्मुक्तस्त्यक्तसर्व्वक्रियाफलः ।
निरुपाधिकसन्तुष्टः स्वेच्छाधीनेच्छयाः युतः ॥ ७१ ॥
स्वदेहमात्रयात्रश्च समश्च स्तुतिनिन्दयोः ।
समारिमित्रकल्याणगुणशीलदयान्वितः ॥ ७२ ॥
एवं स कथितो जीवन्मुक्तो लोकेषु साधकः ।
इतरः पूजने देव्या भजने च सकौतुकः ॥ ७३ ॥
कालेन सिद्धिभाग्भूयादितरो दुःखभाजनम् ।
जन्मभिर्व्वहुभिः क्लिष्टो मूर्खो विद्याधनोद्भवैः ॥ ७४ ॥
मुदैरुन्मत्तचित्तः सन्नधोधो याति योनिषु ।

नित्यासु भक्तिर्भुवने प्रक्षीणे पापकर्म्मणि ॥ ७५ ॥

जायते यद्बलाल्लोके भवेत्  प्रगुक्तलक्षणः ।

नरो भवन्ति तां भक्तिं प्राप्य लोकेषु देवताः ॥ ७६ ॥

दृश्यन्ते भानुचन्द्रारबुधजीवसितासिताः ।

अन्ये च लोकपालाद्यास्तद्भक्तिप्राप्तसम्पदः ॥ ७७ ॥

बहुना किं परं देवि नित्याभिः सदृशानघे ।

न सन्ति देवता विद्यास्तस्मात्ता एव सर्व्वदा ॥ ७८ ॥

भावयाम्यहमद्यापि त्रिकाले विग्रहान्वितः ।

तद्वर्णव्याप्तचक्रस्था ग्रहाश्च तव?

दर्शिताः ॥ ७९ ॥

विधिबिष्णुशिवात्मत्वं तासामेव निजेच्छया ।

अन्याश्च देवता या यास्तास्तास्तन्मयविग्रहाः ॥ ८० ॥

पररूपन्तु वक्ष्यामि होमन्ते महद्भुतम् ।

यत्सिद्धिः सिद्धरूपाणां प्रागुक्तानां भवेत् सदा ॥ ८१ ॥

अन्येषां न भवेद्भावः तथा सर्व्वाश्च यो महान् ।

प्रक्षीणाशेषपापानां भक्तिः स्यात्तज्ज्ञसेविनाम् ॥ ८२ ॥

नित्याविद्यासु भक्तानां लक्षणं शृणु सुन्दरि ।

आमुष्मिकासंशयत्वं सन्तोषो नित्यपूर्णता ॥ ८३ ॥

मुखिता त्यागिता ज्ञानं कृतज्ञत्वमलुब्धता ।

अकार्षण्यमदीनत्वं परचितानिरुद्यमः ॥ ८४ ॥
दयालता मनस्वित्वमवैषम्यं मनःस्थितौ ।
लाभहान्योः प्रीतिरोषाभावः  कल्याणशीलता ॥ ८५ ॥
कल्याणाभिनिवेशित्वं  सदा कल्याणकीर्त्तनम् ।
अकल्याणकथालापवैमुख्यं स्वेच्छया स्थितिः ॥ ८६ ॥
सदैश्वर्य्यञ्च भोक्तृत्वं नैष्ठिकत्वमजिह्मता ।
सर्व्वानुकूल्यं सङ्गीतप्रियत्वं वाञ्छिताप्तयः ॥ ८७ ॥
राजयोषित् प्रभुप्राज्ञवहुमानममत्सरः ।
सर्व्वोत्तरत्ववञ्छा च लक्षणानीरितानि ते ॥ ८८ ॥
यद्विकल्पस्वरूपन्तु मनस्तन्निर्व्विकल्पके ।
निधानं परहोमन्तु स्थूलसूक्ष्मञ्च यन्मयम् ॥ ८९ ॥
उच्चावचविकल्पानां वस्तूनामग्निदाहतः ।
तन्मयत्वादैक्यरूपं स्थूलहोममुदीरितम् ॥ ९० ॥
सूक्ष्महोमं तथा शब्दैर्नानारूपैस्तु वाचकैः ।
वाच्यार्थानामशेषेण वेद्यवेत्तृविदात्मना ॥ ९१ ॥
स्थितिः परो भवेधोमः सर्व्वभेदविलापनात् ।
स्वात्मरूपमहावह्निज्वालारूपिषु सर्व्वदा ॥ ९२ ॥
निरिन्धनेद्धरूपेषु परमार्थात्मनि स्थिरे ।
निर्व्युत्थानविलापस्तु परहोमः समीरितः ॥ ९३ ॥

तेषु प्रोक्तेषु कुण्डेषु चतुरस्रे समाचरेत्।

होमकर्म्म समस्तं तु शुभात्मकमुदीरितम्॥ ९४॥

अशुभात्मवमुक्तन्तु कुर्य्यात्त्यस्रे समीरिते।

अन्येष्वन्यानि कार्य्याणि प्रोक्तानि प्रोक्तरूपतः॥ ९५॥

प्रागुदक्शिवदिग्व?

कुर्य्याधोमन्तु मङ्गलम्।

दक्षिणास्योभिचारन्तु गदे वह्निमुखो द्विषाम्॥ ९६॥

उच्चाटनं वायुमुखो विद्वेषं राक्षसोन्मुखः।

विदध्यात् पश्चिमास्यस्तु क्रूराण्यन्यानि कृत्स्नशः॥ ९७॥

स्वदेशग्रामगेहादौ तानि कर्म्माणि तद्दिशि।

विदध्यादुपविश्योक्तमन्यथानर्थमावहेत्॥ ९८॥

कुण्डादिकरणाशक्तौ स्थण्डिले होममाचरेत्।

गोमयैः परिमृष्टे तु सुसमे भूतले शुभे॥ ९९॥

बालुकाहस्तविस्तारायाममास्तीर्य्य तत्र वै।

मध्ये विदध्याद्धोमन्तु प्रोक्तमेवमशेषतः॥ १००॥

कालतत्त्वमयी व्याप्तिरिति सम्यक् समीरिता।

अस्या निफालनाच्चित्ते तत्तत्त्वं स्वात्मसात् कृतम्॥ १०१॥

इति षोडशनित्यातन्त्रेषु श्रीकादिमते त्रिंशत्तमं पटलम्॥ ३०॥

# एकत्रिंशपटलम्

सूक्ष्मं परं च होमं ते कथितं परमेश्वरि ।

इदानीं स्थूलहोमन्तु कथयाम्यरिमर्द्दनम् ॥ १ ॥

तत्तत्कर्म्मोदिते कुण्डे कुर्य्याधोममुदीरितैः ।

विधानैर्द्वेशनिधनरोगनिग्रहच्चाटनम् ॥ २ ॥

आयुर्दायं रिपोर्ज्ञात्वा  लग्नोक्तर्क्षानुगुण्यतः ।

तदात्मिकग्रहाणाञ्च स्थितिमष्टकवर्गकम् ॥ ३ ॥

त्रयाणामानुगुण्ये न कुर्य्यात्तदभिचारकम् ।

अन्यथा क्रूरकर्म्माणि कुर्व्वाणं नाशयन्ति हि ॥ ४ ॥

तान्येव कर्म्माणि तथा तत्त्रयप्रातिकूल्यतः ।

कुर्य्यात्तद्देवताभक्तिमास्तिक्यं वर्त्तनं गुरुम् ॥ ५ ॥

तत्पार्श्ववर्त्तिमन्त्रज्ञानालोच्य रिपुनिग्रहम् ।

विदध्यादन्यथा शक्त्या नैष्फल्यं वात्मनाशनम् ॥ ६ ॥

रिपोरष्टमलग्ने च काले त्वष्टमराशिगे ।

स्थाने कुर्य्यादनिष्टानि तद्विनाशाय साधकः ॥ ७ ॥

प्राच्यां मेषवृषौ वह्नौ मिथुनं दक्षिणे तथा ।

कुलीरसिंहमथ तन्निरृत्यां कन्यका स्थिता ॥ ८ ॥

तुलाकीटौ पस्चिमतो धनुर्वायौ तु तु संस्थितम् ।

नक्रकुम्भावृत्तरतो मीन ईशे तु संस्थितम् ॥ ९ ॥

एवं राशिक्रम ज्ञात्वा कुर्य्यात् कर्म्माणि देशतः।
काले तु पञ्च पञ्च स्युर्घटिकाः क्रमयोगतः॥ १० ॥
चैत्रादिषु तु मासेषु द्वादशस्वपि भास्करः।
मेषादिराशिगो याति तथान्यैर्ग्रहमण्डलैः॥ ११ ॥
देहेषु प्राणिनां तद्वदष्टाङ्गुलिविभेदतः।
मूर्द्धादिचरणान्तन्तु तान् द्वादशसु लक्षयेत्॥ १२ ॥
त्रयाणामानुगुण्येन कुर्य्यात् कर्माणि नान्यथा।
शुभाशुभानि सर्व्वाणि फलन्त्येवं कृते ध्रुवम्॥ १३ ॥
तथाहनि विषस्थानान्यमृतस्थानकानि च।
ज्ञात्वा विदध्यात् पुत्तल्याः प्रयागं सर्वतस्तथा॥ १४ ॥
सिते हृदि स्तनगले नासाक्षीणि तथा श्रुतौ।
भ्रूशङ्खमूर्द्धमध्येषु तत्र भ्रूशङ्खमध्यतः॥ १५॥
वर्ण नेत्रे नासिकायां वर्त्तते पुरुषस्य तु।
सव्यकण्ठस्तनतटे हृदि नाभौ च गुह्तके॥ १६ ॥
जानुसन्ध्यङ्घ्रपार्श्वेषु तथाङ्गुष्ठे च दक्षिणे।
अङ्घ्रौ सन्धौ जानुगुह्ये नाभौ चेति सिततरे॥ १७ ॥
तिष्ठेद्विषकला पुंसि स्त्रियां वामादि वर्त्तते।
विषनाड्यां विषस्थाने वेधयेत् कण्टकेन तु॥ १८ ॥
सङ्कोचकाख्येन तदा तीव्रेणास्थिमयेन वै।

वदरादिसमुत्थैर्व्वा तथायःसारसूचिभिः ॥ १९ ॥
पुत्तल्यां यत्न तद्विद्धं तदङ्गं शत्रुदेहजम् ।
वुधिना पीडितं कालादविधेयं भवेद्ध्रुवम् ॥ २० ॥
तत्र तेनार्त्तिना क्लिष्टो जीवितेशपुरं व्रजेत् ।
पुत्तलीकरणं वक्ष्ये शृणु निग्रहसिद्धये ॥ २१ ॥
भौमशुक्रबुधाश्चन्द्रौ भास्करः सौम्यभार्गवौ ।
मङ्गलो गुरुमन्दार्किगुरवोंशकराशिपाः ॥ २२ ॥
नक्षत्राणि चतुष्पादान्येकमष्टोत्तरं शतम् ।
एतावत्यश्च पुत्तल्यस्त्वशकक्रमयोगतः ॥ २३ ॥
प्रथमे नवके चन्द्रभास्करांशकयोः क्रमात् ।
षोडश द्वादश तथा मानमङ्गुलिसंख्यया ॥ २४ ॥
अन्यांशकेषु सर्व्वाश्च चतुर्द्दश समीरिताः ।
द्वितीये नवकेन्येषामध्यर्द्धाः स्युस्त्रयोदश ॥ २५ ॥
तृतीये नवकेन्येषां त्रयोदश समीरितम् ।
चन्द्रार्कयोरेकविधः प्रोक्तसंख्याक्रमस्तथा ॥ २६ ॥
पुत्तलीकरणे द्रव्यं चक्रिहस्तमृदान्वितम् ।
चितामृद्भस्मलवणं शुण्ठीपिप्पलिकायुतम् ॥ २७ ॥
मरीचं गृहधूमञ्च लसुनं हिङ्गुसैन्धवम् ।
गैरिकञ्चेति कथितं पुत्तलीद्रव्यमीश्वरि ॥ २८ ॥

साध्यर्क्षवृक्षैः पिष्टैश्च माषचुर्णैश्च सिक्थकैः।

वैरिदेहजरोमाद्यैरुपेतैः पुत्तलीक्रिया॥ २९॥

पुत्तलीदैर्ध्यमानन्तु कृत्वाष्टांशमथैकतः।

शीर्षं त्रयात् कटेरूर्द्धं त्रयात् पादद्वयं तथा॥ ३०॥

कटिप्रपदयोरेकमंशमे(व)

कन्तु पुत्तलीम्।

विधाय तन्त्रे सर्व्वत्र प्रयोगानाचरेन्नरः॥ ३१॥

पातालयोगे नीचाख्ये विषयोगे च त्युजे।

नाशयोगे च दिनजमृत्यय् क्रकचयोगके॥ ३२॥

चण्डीशचण्डायुधके महाशूले च काणके।

रक्तस्थूणे कणतकाख्ये स्थूणे पञ्चार्कस।ङ्कके॥ ३३॥

कुर्य्यत् प्रयोगान् प्रत्यर्थिभङ्गाय निधनाय व।

निग्रहाय निरीक्ष्यैवं कुर्य्यात् सिद्धिमवाप्नुयात्॥ ३४॥

वश्याकर्षणविद्वेषस्तम्भनोच्चाटमारणे।

विदध्यात् पुत्तलीः सम्यक् चतस्त्रः प्रोक्तयोगतः॥ ३५॥

पिष्टेन सिक्।थेन तथा चक्रिहस्तमृदापि च।

साध्यनक्षत्रवृक्षेणाप्युक्तलक्षणसंयुताः॥ ३६॥

आसने पादयोः स्थाने कुण्डमध्ये च साधकः।

पिष्टमृत्तरुजाः खात्वा स्थापयेत् सिक्थमम्बरे॥ ३७॥

कुण्डमध्ये उपर्य्यूर्द्ध्वपदान्यच्छीर्षिकामपि ।
एवं साधारणं कृत्वा कुर्य्यात् कर्म्म समीरितम् ॥ ३८ ॥
सर्पशीर्षस्त्रचा होमं कुर्य्यादशुभकर्म्मसु ।
वैरियोन्यसृजा कृत्वा तया तु जुहुयात्तथा ॥ ३९ ॥
त्रिकोणकुण्डे यमदिङ्मुखो भूत्वार्द्धरात्रके ।
श्मशाने निर्जने देशे विदध्यादभिचारकम् ॥ ४० ॥
यत्राभिचारहोमन्तु करोति भुवि साधकः ।
तत्राभितो नृपौ रक्षौ कारयेदात्मसिद्धये ॥ ४१ ॥
न चेदरातिनृपतिश्चारैर्ज्ञात्वा निहन्त्यमुम् ।
स्वराष्ट्रसन्धौ कुर्व्वित न कुर्व्वीत स्वमण्डले ॥ ४२ ॥
यदि कुर्य्यात् प्रमादेन मान्त्रिको ज्ञानमोहतः ।
तद्राष्ट्रं पीडयन्येव शनकैर्व्वैरिभूभृतः ॥ ४३ ॥
अक्षद्रुमसमिद्धेग्नौ तत्फलैर्व्वा तथाहुतैः ।
हैमीदलरसाक्तैस्तु होमाच्छत्रुं विनाशयेत् ॥ ४४ ॥
नक्तमालसमिद्धेग्नौ तत्फलैर्व्वा तथा हुतैः ।
रिपुरग्रोऽपि रोगार्त्तः प्रयाति यमसादनम् ॥ ४५ ॥
उन्मत्तकाष्ठैः प्रज्वाल्य वह्निं तद्बीजकैर्हुनेत् ।
तत्पत्राम्बुप्लुतैर्म्मासादरातिर्भ्रान्तिमाप्नुयात् ॥ ४६ ॥
आरग्वधसमिद्धेग्नौ तत्समिद्भिश्च तत्फलैः ।

वितस्तिमात्रैस्तैलाक्तैर्हवनाद्वैरिणो मृतिः ॥ ४७ ॥

अरुष्करसमिद्धेऽग्नौ तद्विजास्तद्धृताप्लुतैः ।

होमादरातेस्तीव्रार्त्ति ज्वरेण स्यान्मृतिर्ध्रुवम् ॥ ४८ ॥

सौवीराक्तैस्तु कार्पासवीजैर्होमात्तु मन्द्रजात् ।

अरातीनामथान्योन्यकलहान्निधनं भवेत् ॥ ४९ ॥

सर्षपाज्यप्लुतैः शुण्ठीमागधीमरिचैर्हुनेत् ।

वैरिजन्मार्क्षवृक्षाग्नौ मण्डलान्तं मृतिर्ज्वरात् ॥ ५० ॥

प्रागुक्तैः पुत्तलीं कृत्वा द्रव्यैरुक्तविधानतः ।

सर्षपारुष्करघृतसंसिक्तैर्जुहुयान्निशि ॥ ५१ ॥

प्राग्वच्छित्वा तदङ्गैस्तु क्रुद्धचित्तोऽरुणाम्बरः ।

रक्तस्रग्गन्धपुष्पादियुतः शत्रून् विनाशयेत् ॥ ५२ ॥

अरुष्करघृताभ्यक्तैस्तद्विजैः सर्पशिर्षकैः ।

हवनाद्वैरिणो दाहज्वरप्राप्तिस्त्रिभिर्दिनैः ॥ ५३ ॥

वैर्नक्षत्रयोन्युत्थमांसैस्तद्रक्तसंप्लुतैः ।

हवनात्तत्तरूद्भूतसमिधां हवनादपि ॥ ५४ ॥

दिनैः कैस्चिद्रिपुः क्लृप्तो नाशमेति सुनिश्चितम् ।

द्रुमकुड्यसर्पदंशान्मत्तद्विपादिघातवान् ॥ ५५ ॥

द्रुमकुड्यकनिर्घातसलिलानलपातनात् ।

यक्षराक्षसगन्धर्व्वपिशाचब्रह्मराक्षसैः ॥ ५६ ॥

अन्यैर्व्वा कारणैह् क्षिप्त्रं नाशमेति रिपुर्ध्रुवम्।

निम्बपत्रैश्च कार्पासबिजैस्तज्जैः करञ्जजैः॥ ५७॥

हवनात् सर्ष्पस्नेहसिक्तैर्व्विद्वेषणं भवेत्।

नीचयोगे हुनेदग्नौ रिपुवृक्षसमेधिते॥ ५८॥

तद्वृक्षखण्डैस्तैलाक्तैर्निशामध्ये रिपुर्द्दिनैः।

उच्चाटनं प्रयात्येव मन्त्रशक्त्याभिताडितः॥ ५९॥

मृत्युपत्रैश्च तत्काण्डैस्तद्विजैस्तच्छुचौ हुनेत्।

अरातेर्दन्तिनो वाहा रोगैर्नश्यन्ति निश्चितम्॥ ६०॥

गैरिकैः पुत्तली कृत्वा रिपोरष्टमराशिके।

प्रागुक्तकण्टकाद्यैस्तु यदङ्गं वेधयेच्छनैः॥ ६१॥

विषनाड्यां विषस्थाने तथा च यमकण्टके।

अर्द्धप्रहरके शीर्षे प्रहरेद्वा शनैः शनैः॥ ६२॥

अरातेस्तत्तदङ्गैः स्यान्निधनं प्रहरादिना।

ग्रन्थिभिर्व्वा कण्टकादिक्षतवृद्धिविदारुणैः॥ ६३॥

तन्नक्षत्रोक्तवृक्षोत्थपुत्तलीं स्थापितेरकाम्।

गर्दभीमेहसलिले संस्थाप्य क्वाथयेच्छनैः॥ ६४॥

रिपुर्दाहज्वरग्रस्तः स निर्याति यमालयम्।

मधूच्ःइष्टेन तां कृत्वा तापयेन्निशि तां शनैः॥ ६५॥

तेनोन्मादज्वरग्रस्तः प्रयाति निधनं शनैः।

तां तत्कण्तकविद्धाङ्गीं खनेत् पितृगृहे निशि ॥ ६६ ॥

व्रणात् प्शाचाविष्टः स रिपुर्याति यमालयम् ।

प्रागुतैरेव तद्वैरशेषैः पुत्तलीं तथा ॥ ६७ ॥

निर्म्माय कुण्डमध्ये तां चैवारातिमहीरुहैः ।

समिद्धेग्नौ तत्सभिद्भिस्तैलाक्तैर्जुहुयान्निशि ॥ ६८ ॥

सन्निपातज्वरस्तस्य वक्र(क्र)जिह्वे(ह्व)

ति मूढधीः ।

प्रलयंशनकैर्देहं त्यजन् याति यमालयम् ॥ ६९ ॥

तथाविधां तां प्रतिमां निखनेत् कृष्णपक्षके ।

नवम्यङ्गारदिवसे मातृगेहेग्रपीठके ॥ ७० ॥

सप्ताहान्निधनं वैरी प्रयाति निशि ताडितः ।

भूताद्यैः शिरसि स्वीये निर्घातवदलक्षितम् ॥ ७१ ॥

सर्षपं माषचुर्णञ्च तिलं शालिजतण्डुलम् ।

पिष्ट्वा साध्यवर्क्षवृक्षस्य शकलैरपि संयुतम् ॥ ७२ ॥

एरण्डबिजैर्म्मिलितं कृत्वा पुत्तलिकां ततः ।

तद्वक्षोन्तर्निधायारिनाम तालस्य पत्रगम् ॥ ७३ ॥

संजप्य तां स्पृशन् विद्यां तार्त्तीयप्रतिलोमजाम् ।

सहस्रवारं साध्यस्य् वधर्क्षेऽष्टमराशिगे ॥ ७४ ॥

निवध्य तां पादयोस्तु भानुवृक्षोत्थतन्तुना ।

गृहीत्वा जीवहस्तेन तां जपेत् प्रयजेच्छुचौ ॥ ७५ ॥

हुत्वाग्नौ तैः सहस्रन्तु तामूर्धाङ्घ्रिमवाङ्मुखीम् ।

तद्दिने तापतृड्ष्णार्त्तिविह्वलेन ज्वरेण सः ॥ ७६ ॥

ग्रस्तदेहो लुठन् भूमौ विसंज्ञः प्रलपन्मुहुः ।

प्रयाति निधनं तूर्णं प्रयोगवलतः शिवे ॥ ७७ ॥

साध्यर्क्षक्षसंभूतां पुत्तलीमर्कदुग्धतः ।

वज्रीक्षीरेण वा लिप्तां बद्धां प्राग्वदधोमुखीम् ॥ ७८ ॥

साध्यनाआदिसंयुक्तां कुण्डादूर्द्ध्वं प्रलम्बयेत् ।

जुहुयात्तत्समिद्भिस्तु तत्क्षीराक्तैर्निशान्तरा ॥ ७९ ॥

ज्वरार्त्तः स्यादरातिस्तु त्रिभिरेव दिनैस्ततः ।

यद्यस्ति तस्य रक्षेच्छा तां तटाकोदरे खनेत् ॥ ८० ॥

जम्बालमध्ये तेनास्मात् सौख्यं तस्य शनैः शनैः ।

तथा यदि न कुर्वीत चिरं रोगात्मको भवेत् ॥ ८१ ॥

तथा तामनुभाण्डे तु निवेश्याङ्गारवासरे ।

चण्डिकायतने खात्वा तद्योनिं तत्पुरो वलिम् ॥ ८२ ॥

निहत्य दत्त्वारातिन्तु निहन्यादुपसर्गकैः ।

स्वगेहे वल्यधः खात्वा तदुपर्य्यग्तिवर्द्धनात् ?

॥ ८३ ॥

अविच्छिन्नमरातोः स्याज्ज्वरादिगदसम्भवः ।

तां तथाकृतरूपान्तु रुरुजङ्घास्थिसंयुताम्॥ ८४ ॥

निवध्य पूर्व्वसूत्रेण द्विषद्देहे खनेन्निशि ।

राशौ तदष्टमे मासात् प्रयात्युद्यात्यतोन्यतः ॥ ८५ ॥

तथाविधं पुत्तलिकायुगं कृत्वोक्तमार्गतः ।

विडालमूषिकाचर्म्मनद्धं साध्याख्यया युतम्॥ ८६ ॥

निखनेत्तीरयोर्नद्याः पितृगेहेथवा ततः ।

मातृगेहे नदीपूर्त्त्यां विद्वेषः स्याद्वयोस्तदा ॥ ८७ ॥

ता एव प्राग्वदुत्थाय साध्याख्यादिसमन्विताः ।

तद्विद्याजापसिद्धास्ताः खनेदरिगृहे पुनः ॥ ८८ ॥

मध्येष्टदिक्षु तु तथा तत्कुलोत्सादनं भवेत् ।

एवं निकटवर्त्तिनां अभिचार उदीरितः ॥ ८९ ॥

दूरस्थितानां द्विषतां कथं स्यादभिचारकम् ।

वदामि ते शृणु प्राज्ञे सुदूरस्थस्य वैरिणः ॥ ९० ॥

विनाशने प्रयोगन्तु क्षिप्रमप्यभिचारकम् ।

येनारिनिर्कट स्थात्तु प्रागेव निधनं व्रजेत्॥ ९१ ॥

तत्साध्यवृक्षैः पुत्तलिका विधायाष्टे शतं क्रमात् ।

ताः प्रागुदीरितक्षीरद्वयसिक्ताः ससंज्ञकाः ॥ ९२ ॥

तत्तदंशकमानापघनास्ता मध्यरात्रतः ।

एकामेकां हनेद्वैरिदिङ्मुखास्ता अशेषतः ॥ ९३ ॥

तत्तद्दंशककाले वा सुदूरस्थोपि नाशभाक् ।
कथं वा मान्त्रिकवलौ निहन्तुं शक्यतां व्रजेत् ॥ ९४ ॥
तच्छृणुष्व शिवे वच्मि प्रकारं तस्य निग्रहे ।
तैर्म्मान्त्रिकैस्तस्य पूर्व्वं विद्वेषे कारयेत्ततः ॥ ९५ ॥
तैर्द्विष्ट निधनं तस्मिन् सुशकं स्यादनाश्रयात् ।
भाग्याधिकं महारक्षाकरं मातृकसङ्गतम् ॥ ९६ ॥
राजानं राजपात्रं वा कथ हन्यात् प्रयोगतः ।
तन्मे कथय देवेश यद्युपायन्तु विद्यते ॥ ९७ ॥
वदामि ते शृणु प्राज्ञे त्वमोघं घोरविग्रहम् ।
अभिचारमरातीनामाशुनाशकरं परम् ॥ ९८ ॥
सिद्धमन्त्राननतिस्निग्धान् षोडशातिस्थिराशयान् ।
तैरवचःइन्नदर्पन्तु होमयेद्यामदिक् क्रमत् ॥ ९९ ॥
तेन नन्निधनं ब्रूयाद्रक्षितस्याप्ययत्नतः ।
अरातिनिग्रहं कुर्य्यादेवमुक्तविधानतः ॥ १०० ॥
मायातत्त्वमयी व्याप्तिरिति सम्यक् समीरिता ।
अस्या निफालनाच्चित्ते तत्तत्त्वं स्वात्मसात् कृतम् ॥ १०१ ॥
इति षोडशनित्यातन्त्रेषु श्रिकादिमते जोमात् काम्यफलोदयं नाम एकत्रिंशत् पटलम् ॥ ३१ ॥

द्वत्रि ।शपटलम् ।

अथ होमं प्रवक्ष्यामि ललिताविद्यया शिवे ।

येन मर्त्त्योऽपि भुवने प्रख्यातो देवतासमः ॥ १ ॥

तद्विधानं शृणु प्राज्ञे द्रव्यकालादिभेदतः ।

प्रोक्तेषु नवकुण्डेषु तत्तत्कर्म्मसु चोदिते ॥ २ ॥

जुहुयादुक्तमार्गेण तत्राग्निध्यानपूर्वकम् ।

शुक्लप्रतिपदारम्भात् पूर्णान्ते पङ्कजैर्हुनेत् ॥ ३ ॥

कैरवैर्हवनात्तेषु दिनेषु श्रियमाप्नुयात् ।

मधुरत्रयसंसिक्तैः पुष्पैरप्यरुणैः शुभैः ॥ ४ ॥

अखण्डितैरब्दमात्रं नरो नृपतिसन्निभः ।

तेष्वेव दिवसेष्वब्जैः सितैस्तद्धवनाद्धृतैः ॥ ५ ॥

कह्लारैर्हवनात्तेषु दिनेषु धनधान्यवान् ।

तेष्वेवोत्पलहोमेन श्रियमाप्नोति पुष्कलम् ॥ ६ ॥

अरुणैरत्पलैर्होमात् कन्यकां समवाप्नुयात् ।

सौभाग्यं कीर्त्तिमारोग्यमवाप्नोत्यर्च्चनादपि ॥ ७ ॥

तैः षड्भिः कुङ्कुमक्षोदप्लुतैस्तद्दिनहोमतः ।

अचलाञ्च श्रियं प्राप्य सुखी जीवति भूतले ॥ ८ ॥

तैश्चन्दनाक्तैर्हवनात्तद्दिनेषु यथाविधि ।

पुत्रदासीदासयुतश्चिरं जीवति मानवः ॥ ९ ॥

तैरेवेन्दुद्रवाक्तैस्तु होमात् कन्दर्पसन्निभः ।
वनिताजनसन्दोहविनोदी भुवि जीवति ॥ १० ॥
कृष्णप्रतिपदारम्भाद्दर्शान्तं जुहुयात् सितैः ।
घृताक्तैरब्दमात्रेण निःसपत्नां लभेच्छ्रियम् ॥ ११ ॥
तेष्वेव दिवसेष्वग्नौ गुडैः क्षौद्राप्लुतैर्हुनेत् ।
कान्तिलक्ष्मीजयारोग्ययुतो जीवति भूतले ॥ १२ ॥
द्राक्षाभिर्दुग्धसिक्ताभिस्तद्दिनैर्हवनान्नरः ।
क्षीराहारी चिरं भूमौ जीवत्यकलुषाशयः ॥ १३ ॥
खर्जूरीफलहोमेन त्रिमध्वक्तेन तद्दिनैः ।
आयुरारोग्यविजयसम्पन्नां श्रियमश्नुते ॥ १४ ॥
कदलीफलहोमेन तथा तद्दिवसेषु तु ।
पुण्यकीर्त्तिर्नृपैर्म्मान्यो जीवेद्वर्षशतं सुखी ॥ १५ ॥
नारिकेलफलक्षोदैः सितक्षौद्रसमन्वितैः ।
हवनात्तद्दिनैरिष्टमखिलं समवाप्नुयात् ॥ १६ ॥
तैरिक्षुवारिसंसिक्तैर्हवनात्तद्दिनेषु वै ।
वासांसि नानावर्णानि महार्हाणि लभेत सः ॥ १७ ॥
षड्भिश्च तैस्त्रिमध्वक्तैर्हवनाच्छ्रियमाप्नुयात् ।
तैः सवत्ससितागव्यपयोक्तैर्हवनादपि ॥ १८ ॥
महिषीक्षीरसंसिक्तैर्होमादिष्टमवाप्नुयात् ।

अजाक्षीरयुतैस्तैश्च तथाविक्षीरस।प्लुतैः॥ १९॥

नारिकेलफलक्षोदक्षीराक्तैरपि तैर्हुनेत्।

तथा द्वादशभिर्द्रव्यैरेकैकैकः सङ्गतैस्तु वा॥ २०॥

नित्यशो हवनाद्दुग्धक्षौद्रसर्पिःसमन्वितैः।

गोभूहिरण्यवासोभिः समृद्धो जीवति क्षितौ॥ २१॥

रविवारे सितान्नैस्तु क्षीराक्तैर्जुहुयात्तथा।

अब्दादन्नसमृद्धिः स्याद् घृताक्तैर्वा मधुप्लुतः॥ २२॥

सोमवारे सितोपेतैर्नारिकेलफलिहुतैः।

सम्पन्नशस्यां पृथिवीमवाप्नोति सुनिश्चतम्॥ २३॥

अङ्गारवारे क्षौद्राक्तैरन्नैर्होमाच्छ्रियं लभेत्।

तैरिष्टहृद्यामिलितैर्हवनात्तां महीं लभेत्॥ २४॥

बुधवारे घृताक्तैस्तु होमेन तिलतण्डुलैः।

श्रियं सकलकल्याणनिलयां लभतेऽब्दतः॥ २५॥

गुरुवारे दुग्धसिक्तपनसास्थिपरागकैः।

जुहुयादन्दमात्रेण लभते गेहमुत्तमम्॥ २६॥

सितवारे नारिकेलक्षोदैः सितसमन्वितैः।

गुडान्वितैर्वा जुहुयाच्छ्रिया सुचिरमेधते॥ २७॥

शनिवारे तैलसिक्तैस्तिलैः शुद्धैस्तथेतरैः।

हवनाल्लभते लक्ष्मीमब्दादतिमनोहराम्॥ २८॥

तैः समस्तैः समस्ताक्तैर्जुहुयात् सप्तसु क्रमात्।

तद्दिनैरिन्दिराढ्यः स्याद्विद्याहवनवैभवात्॥ २९॥

तद्दिनेषु च तद्विद्याभतांस्त्रीन् द्वौ सुभोजयेत्।

घृतक्षीरतिलक्षौद्रगुडापूपसमन्वितम्॥ ३०॥

अश्विन्यादिषु ऋक्षेषु नवस्वपि हुनेत् क्रमात्।

शालिभिस्तण्डुलैर्म्मुत्गैर्माअशैर्गौरेतरैस्तिलैः॥ ३१॥

तथाविधैः सर्षपैश्च कोद्रवैरिन्दिराप्तये।

क्षुद्रसर्पिस्तिलैर्दुग्धकेरोन्देक्षुरसाप्लुतैः॥ ३२॥

महिष्यजाविकाक्षीरप्लुतैस्तैर्नवसु क्रमात्।

मघादिषु तथा होमं नवभिः स्यान्नवस्वपि॥ ३३॥

चणकैश्चणकान्नैश्च मुद्गान्नैः कृशरैस्तथा।

माषान्नैश्च हरिद्रान्नैर्गुडान्नैः पायसैस्तथा॥ ३४॥

दुग्फ़्हान्नै(शुद्धान्नै)

श्च त्रिमध्वक्तैः कीर्त्तिलक्ष्मीजयाप्तये।

तथा मूलादिनवके कलिभर्जुहुयात्तथा॥ ३५॥

पृथुकैः शक्तुभिर्लाहैरिक्षुकाण्डैः पयःप्लुतैः।

शालीचणकमुद्गोत्थैर्माषापिष्टतिलीद्भवैः॥ ३६॥

अपूपैर्म्मधुराभ्यक्तैर्विजयं कीर्त्तिमिन्दिराम्।

आरोग्यमायुः सौभाग्यं मान्यताञ्च लभेद्धुवम्॥ ३७॥

सिद्धयोगेषु यद्द्रव्यैर्जहुयात्तत्समृद्धिमान् ।
तथामृताख्यह्वयोगेषु जुहुयाद्रोगशान्तये ॥ ३८ ॥
गुडूचीतलदूर्व्वाभिस्त्रिमध्वक्ताभिरादरात् ।
उच्चयोगेषु जुहुयादरुणैरत्पलैः शुभैः ॥ ३९ ॥
उच्चे भवति सर्वेषां स्वकुलानां सुनिश्चितम् ।
पर्व्वताख्ये हुनेद्योगे यद्द्रव्यैस्तद्धि पर्वतम् ॥ ४० ॥
भवेदस्ताचिरेणैव कालेन परमेश्वरि ।
अथान्यसद्भुतं होममाकर्णय वदामि ते ॥ ४१ ॥
स्वक्षेत्रगे स्वोच्चगे वा जुहुयाद्ग्रहतृप्तये ।
पायसैर्घृतसंसिक्तैः सितमिश्रैस्तु विद्यया ॥ ४२ ॥
सर्वदा यो हुतविधिमेनं कुर्य्याद् यथाविधि ।
तत्तत्प्रोक्तेषु कालेषु ग्रहार्त्तिः स्यान्न तत्कुले ॥ ४३ ॥
मासेषु जन्मत्रितये होमं कुर्य्याद् यथाविधि ।
दूर्वामृतातिलैर्नित्यं यावज्जीवं सुखी भवेत् ॥ ४४ ॥
तद्दिनेषु जपेद्विद्यां सहस्त्रं दिननित्यया ।
न तस्य कुत्राचित् कश्चित् कदाचित् क्लेशसम्भवः ॥ ४५ ॥
तर्पणं कारयेच्चन्द्रवासितैर्मधुरैर्जलैः ।
सौर्भाढ्यः प्रसूनैस्च पूजयेद्वाथ तद्दिने ॥ ४६ ॥
अवन्ध्यजन्मत्रितयं स्यात् कदाचिन्न मान्त्रिकः ।

यदि स्याय्यस्य रोगादिपीडां भवति निश्चितम् ॥ ४७ ॥

उच्चस्थे वा स्वराशौ वा स्थिते चन्द्र दिनाकरे ।

विद्यां जपेत् सहस्रं वा शतं वा पूजयेच्छिवाम् ॥ ४८ ॥

यस्तस्य रोगतो वाधा कदाचिन्न भवेद्धुवम् ।

तस्मादुक्तेषु कालेषु तथा कुर्व्वन् सुखी भवेत् ॥ ४९ ॥

ग्रहरोगादिदारिद्र्यक्लेशयुक्तस्य मन्त्रिणः ।

मान्त्रिकत्वं भवेल्लोके शोकहासास्पदं भवेत् ॥ ५० ॥

पलाशपुष्पैश्च फलैः पत्रैः काण्डैस्च मूलकैः ।

हवनादब्दमात्रेण वाग्मी स्यात् कुण्ठवागपि ॥ ५१ ॥

अर्कपुष्पैस्त्रिमध्वक्तैर्होमादिष्टमवाप्नुयात् ।

मण्डलात्तस्य पत्रिस्च समिद्भिरपि मूलतः ॥ ५२ ॥

बिल्वप्रसूनैस्तु फलैः पुत्रैः काण्डैस्तथा हुनेत् ।

मूलैश्च लक्ष्मीसंसिद्ध्यै मा तदन्वयगा भवेत् ॥ ५३ ॥

पद्माक्षैर्मधुराभ्यक्तैर्होमात्तावद्दिनैर्नरः ।

इन्दिरां लभते रम्यां सर्वलोकचमत्कृताम् ॥ ५४ ॥

चम्पकैर्म्मधुसंमिश्रैर्जुहुयात्तद्दिनावधि ।

आढ्यः स्यादप्रजः पुत्रानवाप्नोति गुणाधिकान् ॥ ५५ ॥

तैरेवाज्यप्लुतैर्होमान्मङ्गले तूच्चसंस्थिते ।

लभते सर्वशस्याढ्यां भुवं भोक्ता च जायते ॥ ५६ ॥

तैः क्षीराक्तैर्हुतैश्चन्द्रेस्वोच्चगे तद्दिनैर्भवेत्।

शतगुः साधकस्तद्वत्त्रिमध्वक्तैर्लभेत्त्रयम्॥ ५७॥

पाटलैः क्षौद्रसंसिक्तैर्होमात् कन्यामवाप्नुयात्।

तगरोत्थैरपि तथा लाजैश्च कुटजैरपि॥ ५८॥

तैः कीरमिश्रैर्हवनाच्चतुर्भिर्लभते धनम्।

अम्वराणि विचित्राणि महार्हाणि च तद्दिनैः॥ ५९॥

शतपत्रैस्तु मध्वक्तैर्होमाल्लक्ष्मीमवाप्नुयात्।

केशरैश्च कदम्भैस्च कुण्डै(न्दै)

र्विचकिलैरपि॥ ६०॥

मल्लिकामालतीजातिपुन्नागैश्च नमेरुभिः।

जुहुयात् प्रथमारम्भं पञ्चम्यन्तं मधुप्लुतैः॥ ६१॥

एकैकशः समस्तैश्च महालक्ष्मीमवाप्नुयात्।

तथाज्याक्तैस्तु हवनाल्लभते भूषणैः श्रियम्॥ ६२॥

प्रसूनैः कर्णिकारीत्थैः क्षौद्राक्तैर्हवनाद्दिनैः।

उदितैरचलां लक्ष्मीं अवाप्नोति सुनिश्चितम्॥ ६३॥

कह्लारै रक्तकुमुदैरुत्पलैः कमलद्वयैः।

प्राग्वन्नन्दादिपूर्णान्तमेकैकैर्वापि पञ्चभिः॥ ६४॥

हवनाल्लभते लक्ष्मीं सभूभूषणवाहनाम्।

त्रिमध्वक्तैस्तथैकैकैः सर्व्वैर्व्वा साधकोत्त्मः॥ ६५॥

केतकीकुसुमैः क्षौद्रप्लुतैर्होमात्तु तद्दिनैः ।
वासांसि लभते चित्राण्यनर्घाणि बहून्यपि ॥ ६६ ॥
सितैः प्रसूनैः क्षीराल्तैर्होमादाप्नोति तद्दिनैः ।
सितानि वासांसि तथा मुक्तादामानि रूप्यकम् ॥ ६७ ॥
हुनेत् कुरुवकैः क्षौद्रप्लुतैर्व्वाञ्छितसिद्धये ।
तथा दमनकैः पत्रैर्हवनाच्छित्रयमश्नुते ॥ ६८ ॥
यद्वर्णानि प्रसूनानि जुहुयाद्विद्यया प्रिये ।
तद्वर्णान्येव वासांसि लभते साधको ध्रुवम् ॥ ६९ ॥
मरीचैः सर्षपैस्तैलप्लुतैर्होमान्निशासु तैः ।
लज्जामानकुलत्यागलोलामिष्टां समानयेत् ॥ ७० ॥
पाटलीकुन्दमन्दारशेफालिकुसुमोद्भवैः ।
चम्पकाशोकपुन्नागनरमेरुकुसुमैः शुभैः ॥ ७१ ॥
हवनाद्वशयेत् सर्ववनिताः क्षौद्रसंप्लुतैः ।
तैरेवाज्यप्लुतैर्होमाद्वशयेत् पुरुषानपि ॥ ७२ ॥
तै राद्यलक्ष्मीं लभते घृताक्तैर्हवनान्निशि ।
समस्तजीवभुवनं वशयेत्तैः सितान्वितैः । ७३ ॥
अन्नैर्घृताप्लुतैर्नित्यं हवनादन्नवान् भवेत् ।
तथैव जुहुयान्नित्यमायुषे तिलतण्डुलैः ॥ ७४ ॥
मध्यरात्रे तु लवणैः सुश्लिष्टपरिचूर्णितैः ।

त्रिमध्वक्तैर्हुतैः सर्वान् वशयेदङ्गनाजनान्॥ ७५॥

तथा दध्यन्वितैर्लोणैर्होमाद्विष्यं वशं नयेत्।

तथा पुण्ड्रेक्षुतोयाक्तैर्हुतैः स्युर्वशगा नृपाः॥ ७६॥

आज्यैस्तु केवलैर्होमाद्दिनैरुक्तैर्धनी भवेत्।

नित्यशो घृतहोमेन श्रीमान् भोगी च जायते॥ ७७॥

स्नातोनुलिप्तः स्रग्वी च सितगन्धस्रगम्बरः।

संपूज्य देवीं हृष्टात्मा संस्कृते हव्यवाहने॥ ७८॥

सवत्सायाः सिताया गोः पयसि द्विगुणे पचेत्।

प्रस्थमात्रं तण्डुलन्तु शालिजं सितमेव च॥ ७९॥

सितदुग्धघृतोपेतं कृत्वा वै सिक्थकं महत्।

गृहीत्वा पाणिना विद्यां जपित्वा शतवारके॥ ८०॥

श्रियं मे देहि देवीति कृत्वा  काष्ठोज्ज्वलानले।

हुत्वा समाप्य पूजान्तु तथ भुक्त्वा तु तद्दिनं॥ ८१॥

निरन्तरं नित्यशश्च जुहुयाच्च तदन्वयम्।

न कदाचिद्रमा मुञ्चत्यद्भुता मन्त्रशक्तयः॥ ८२॥

पायसैर्जुहुयात् पूर्णास्वर्कवारेषु साधकः।

निवेदयेच्च पूजायामब्दादाढ्यतमो भवेत्॥ ८३॥

सवत्सारुणवर्णाया गोः क्षीरान्नवनीतकम्।

तद्दिनान्नन्तु कह्लारप्रसूने विक्षिपेत्ततः॥ ८४॥

तदुद्धृत्य हुनेदग्नौ भामवारे तदुच्चगे ।
काले तावाद्दिनैर्लक्ष्मीं भूम्याढयां लभते ध्रुवम् ॥ ८५ ॥
तथा धवलरूपाया नवनीतं सिताम्बुजे ।
निधायादाय मौनी तु हुनेदग्नी भृगोर्द्दिने ॥ ८६ ॥
सप्तवारप्रोगेन महतीमापुयाच्छ्रियम् ।
नृपमान्यां सर्वहृद्यां नानाभोगान्वितां शुभाम् ॥ ८७ ॥
तथारुणासमुद्भूतं नवनीतं रवेर्द्दिने ।
निधाय विकचे पद्मे कर्णिकायां ततस्तु तत् ॥ ८८ ॥
जुहुयादष्टभिर्वारैरढ्यः स्यात् साधकः शिवे ।
कर्णिकारस्य पुष्पाणि तथ चम्पकजानि वै ॥ ८९ ॥
जुहुयान्नवनीताक्तान्युच्चे सूच्चगते गुरौ ।
निरातङ्की महार्घाञ्च राजचोरापहारकैः ॥ ९० ॥
प्राप्नोति महतीं लक्ष्मीं मा तदन्वयगामिनौ ।
केवलं नवनीतेन सितोपेतेन होमतः ॥ ९१ ॥
कीर्त्तिलक्ष्मीधनारोग्यविजयैरायुराप्नुयात् ।
बन्धूकैः किंशुकैश्चूतैस्त्रिमध्वक्तैर्हुतक्रिया ॥ ९२ ॥
सौभाग्यलक्ष्मीविजयकान्तिप्रज्ञावहा भवेत् ।
दध्यन्नहोमादन्नढ्यः साधकः स्यात्त्रिमासतः ॥ ९३ ॥
आर्द्रेषु तालपत्रस्य् खण्डेषु निजवाञ्छितम् ।

विलिख्य नवनीतेन समेतं जुहुयान्निशि ॥ ९४ ॥

मण्डलान्मासतो वारात् प्राप्नोत्येव स्ववाञ्छितम् ।

तथा पलाशपर्णेषु विलिख्य दरदैर्हुनेत् ॥ ९५ ॥

कुङ्कुमैश्चूतपत्रेषु लिखित्वा वा हुनेन्निशि ।

चन्दनैः पानसे पत्रे विलिख्य जुहुयात्तथा ॥ ९६ ॥

पक्षक्षोदैर्विलिख्येष्टं नागवल्लीदलैर्युतैः ।

हुतैरवाप्नोति निजं वाञ्छितं प्रोक्तकालतः ॥ ९७ ॥

कस्तूरीलिखितन्त्वष्टं पत्रे चम्पकभूरुहः ।

तैर्हितैस्तदवाप्नोति तद्दिनैस्तद्विधानतः ॥९८ ॥

एलालवङ्गकक्कोलजातीफलसमन्वितैः ।

सितैरालिख्य च स्वेष्टं पत्रे पद्मसमुद्भवे ॥ ९९ ॥

जुहुयात्तस्य संसिद्ध्यै बहुभिः किमिहोदितैः ।

नासाध्यमस्ति भुवने विद्याहोमैरुदीरितैः ॥ १०० ॥

शुद्धविद्यामयी व्याप्तिरिति सम्यक् समीरिता ।

अस्या निफालनाच्चित्ते तत्तत्त्वं स्वात्मसात् कृतम् ॥ १०१ ॥

इति शोडशनित्यातन्त्रेषु श्रीकादिमते होमात् काम्यफलोदयो नाम द्वत्रिंशपटलम् ॥
३२ ॥

त्रयस्त्रिंशपटलम् ।

अथ षोडशनित्यानामाद्या या ललितोदिता ।

तस्या यन्त्राणि कथ्यन्ते तद्विद्याभेदसम्भवैः ॥ १ ॥

रूपैः षष्टिसमोपेतैर्नवशत्या यथाविधि ।

समस्तवाञ्छितावाप्तिकारणानि कृतात्मनाम् ॥ २ ॥

ललितानित्यपूजायां यन्त्रं विश्वात्मविग्रहम् ।

षोडशानाञ्च तस्याश्च पूजाकलमचक्रकम् ॥ ३ ॥

अमृताख्यघटं यन्त्रं सिद्धवज्रमतः परम् ।

कोष्ठवज्रं वज्रलिङ्गं मेरु(सेतु)

लिङ्गं यथाविधि ॥ ४ ॥

महालिङ्गं योनियन्त्रं तथा तद्वज्रवज्रकम् ।

तदेव च महाकारं कोष्ठयन्त्राणि च क्रमात् ॥ ५ ॥

नवहस्तं त्रिहस्तं वा श्रीचक्रमभिषेचने ।

कुर्य्यात् स्थण्डिलपूजायां हस्तमात्रेऽतिसुन्दरम् ॥ ६ ॥

रत्नादिषु तु निर्म्माणे मानमिच्छावशाद्भवेत् ।

सदा सुविहिते पूजा शुभान्यस्मिंस्तथान्यथा ॥ ७ ॥

भ्रमेण वृत्तं निष्पाद्य सुसमे चतुरस्रके ।

प्रमृज्य तिर्य्यङ्मध्यस्थं सूत्रं तिर्य्यङ्निपातयेत् ॥ ८ ॥

सूत्राणि नव तेषु द्वे वृत्तस्पृष्टोभयान्तके ।

विधाय तद्द्वयोरन्तान्मध्यसूत्रान्ततः क्रमात् ॥ ९ ॥

कृते सूत्रचतुष्के तु षड्कोणं स्यात्त्रिसप्तकम् ।
द्व्यष्टाग्रतः समारम्भान्नवमं प्रथमान्तरा ॥ १० ॥
कुर्य्यात् सूत्रचतुष्कन्तु चतुर्मर्म्मानुगुण्यतः ।
नवमप्रथमाग्राभ्यां तिर्य्यक् सप्तमकावधि ॥ ११ ॥
कुर्य्यात् सूत्रचतुष्के तु मर्म्माष्टकविभेदनात् ।
ततस्चतुष्कषष्ठान्तद्वयारम्भात्तथाष्टगम् ॥ १२ ॥
द्वितीयगञ्च सूत्राणां चतुष्कं पातयेत्तथा ।
चतुर्म्मर्म्मानुगुण्येन ततः पञ्चमकान्तयोः ॥ १३ ॥
तृतीयगं सूत्रयुगं कुर्य्यान्मर्म्मद्वयाश्रयम् ।
मार्जयेत्मध्यगं ब्रह्मसूत्रं स्याच्चक्रमुत्तमम् ॥ १४ ॥
बहिरष्टच्छदाम्भोजं तथा तद्द्विगुणच्छदम् ।
विधाय षड्भिर्वृत्तैश्च चतुरस्रे तथाष्टभिः ॥ १५ ॥
सूत्रैर्विधाय तस्यैव प्राक्प्रत्यग्द्वारसंयुतम् ।
दक्षिणोत्तरतो रेखात्र्यात् स्थानद्वयात्तथा ॥ १६ ॥
कोणेषु तिर्य्यक् सूत्रैश्च चतुर्भिस्तान्यनुक्रमात् ।
द्विधा कुर्य्याच्च चत्वारि पदानि परमेश्वरि ॥ १७ ॥
अओताचार्क्रमिदं लभ्यं सद्गुरुतः क्रमात् ।
सुन्दरं सुसमं सर्वलक्षणैश्च समन्वितम् ॥ १८ ॥
अधोमुखैः पञ्चभिश्च चतुर्भिश्च तथोद्ध्वगैः ।

नवभिस्त्वेकसूत्रस्थैः स्यादेतदतिसुन्दरम् ॥ १९ ॥

वृत्तस्पृष्टषडस्रञ्च तदस्पृष्टाष्टकं तथा ।

मर्म्मभिश्चाष्टदशभिर्युतं चक्रं सुलक्षणम् ॥ २० ॥

षड्रेखासन्धिमर्म्माख्यं सन्ध्याख्यद्वयसङ्गमात् ।

तच्चतुर्व्विंशतियुतं चक्रं सर्व्वार्थसिद्धिदम् ॥ २१ ॥

अन्यथा भिन्नमर्म्मादियुतं चक्रं समर्चयेत् ।

अशस्त्राद्वधं महाव्याधिं दारिद्र्यमयशो मृतिम् ॥ २२ ॥

तस्माल्लक्षणसंयुक्तमुक्तरूपं विधाय वै ।

चक्रं तत्रैव तां नित्यमर्चयन् मत्समो भवेत् ॥ २३ ॥

विधाय वृत्तयोर्म्मध्यं चत्वारिंशत् सहाष्टभिः ।

प्रागादितिव्यक्सूत्राणि षट्सु च पञ्चसु ॥ २४ ॥

पश्चिमात् षट्त्रयेऽप्येवं तन्मध्ये मर्म्मयुक्तितः ।

विदध्यात्तीणि सूत्राणि कुर्य्यात्तेनातिसुन्दरम् ॥ २५ ॥

त्र्यस्रं वृत्तं पञ्चदश च्छदानि च ततो बहिः ।

अष्टच्छदाब्जं बाह्ये दशच्छदसरोरुहम् ॥ २६ ॥

पुनर्दशच्छदं पद्मं चतुर्द्दशदलं ततः ।

अष्टच्छदाब्जं द्विगुणच्छदमष्टादशच्छदम् ॥ २७ ॥

विधाय तस्य मध्ये तां समावाह्य यजेत्तथा ।

पश्चान्नाथान् पार्श्वयोश्च हेतीरन्यास्तथार्च्चयेत् ॥ २८ ॥

एतस्मिन् पद्मचक्रस्य मध्ये तासां प्रपूजनात्।

महतीं श्रियमाप्नोति ज्ञानान्माञ्च समाप्नुयात्॥ २९॥

पूर्व्वस्मिन् पूजयेद्देवीमुक्तक्रमसमन्वितम्।

श्रियं ज्ञानात्तथावाञ्च संयाति परमेश्वरि॥ ३०॥

घटद्वयं समालिख्य बाह्याभ्यन्तरभेदतः।

तन्मध्ये नवधा कृत्वा कोणेषु प्रथमं लिखेत्॥ ३१॥

द्वितीयं दिक्षु संलिख्य मध्ये तार्त्तीयमालिखेत्।

घटयोरन्तरा कृत्वा तिर्य्यग्रेखाः समन्ततः॥ ३२॥

तेषु प्रदक्षिणं विद्यातार्त्तीयाक्षरसप्तकम्।

लिखेद्बिन्दुविसर्गाभ्यां मुखे पञ्चामृताम्बुजम्॥ ३३॥

आद्यनालमयं द्वन्द्वपत्रकेशरकर्णिकम्।

विधाय च घटाधस्ताद्विदध्याद्विनियोगकम्॥ ३४॥

मध्ये साध्याक्षरोपेतं कृत्वा तममृतं घटम्।

विभृतादिभिषिञ्चेच्च जन्मर्क्षेष्वायुराप्तये॥ ३५॥

कुहूपरागसंक्रान्तिदोषेष्वखिलशान्तये।

अभिषिञ्चदशेषार्त्तिशान्त्यै सिद्ध्यै च सम्पदा॥ ३६॥

अपमृत्युमहारोगक्षयापस्मारशान्तये।

त्रिवर्षमभिषेकन्तु कुर्य्याज्जन्मत्रये तथा॥ ३७॥

सर्व्वक्लेशविनिर्मुक्तः सुखी वर्षशतं भुवि।

आरोग्यो विजयी विश्ववन्द्यो भवति मानवः ॥ ३८ ॥

सुवर्णे राजते ताम्रे कृत्वैतत् सिक् ।थलिङ्गगम् ।

विधाय स्थापयेत् क्षौद्रे यजेत् सर्व्वापमृत्युजित् ॥ ३९ ॥

तार्त्तीयविद्यापुटितं नामालिख्य तु साधकः ।

ऊर्म्मिकादौ वहेत् सर्व्वसम्पदे रिष्टशान्तये ॥ ४० ॥

कृत्वाश्मनि तथा यन्त्रं तडागादिषु मध्यतः ।

स्थापयेत्तत्र ये स्नाता नराः स्युः सुखिनोऽनिशम् ॥ ४१ ॥

प्राक्प्रत्यग्दक्षिणोदक्क सूत्रैरष्टभिराहतैः ।

कोष्ठान्येकोनपञ्चाशत्तेषु कोणेषु मार्जयेत् ॥ ४२ ॥

चतुर्विंशतिकोष्ठानि शेषेषु विलिखेत् क्रमात् ।

विश्वेकतस्त्रिकोणानि प्रागारम्भात् प्रवेशतः ॥ ४३ ॥

तार्त्तियस्य च भेदोत्थचतुर्व्विंशतिमालिखेत् ।

विलोमेनाथ मध्यस्थे तत् समाध्यं समालिखेत् ॥ ४४ ॥

सिद्धवज्रामिधं यन्त्रं अशेषशुभदायकम् ।

विनाशनमनिष्टानां जयसौभाग्यदायकम् ॥ ४५ ॥

समरे विजयप्राप्त्यै विभृयात्तद्विवादजे ।

समस्ते धारयेत् क्लेशे विजयं सुखमाप्नुयात् ॥ ४६ ॥

प्रतिमासञ्च पूर्णायामभिषिञ्चेच्च तत्र वै ।

स्थापयित्वा घटं प्राग्वत् समस्ताभ्युदयाय वै ॥ ४७ ॥

पुत्राप्त्यै कन्याकावाप्त्यै वराप्त्यै कन्यका तथा ।

धराधनपशुप्राप्त्यै नरनारीनृपादिनाम् ॥ ४८ ॥

वश्यायाविघ्नसंसिद्ध्यै वाक्सिद्ध्यै गेहसिद्धये ।

धारयेत् सिद्धवज्रन्तु समस्तेषु प्रसिद्धये ॥ ४९ ॥

ललिताविद्यया विद्यामन्यां यन्त्रेण वामुना ।

यन्त्रमन्यत् समं वेत्ति उऽसौ स्यान्मूढचेतनः ॥ ५० ॥

प्राक्प्रत्यग्दक्षिणोदक्क सूत्राण्यष्टादश क्षिपेत् ।

तैस्तत्र कोष्ठानि तथा नवाशीतिशतद्वयम् ॥ ५१ ॥

तेषु कोणेषु कोष्ठानि मार्जयेत् पूर्ववात् प्रिये ।

षट्त्रिंशच्छिष्टवज्रे तु चतुर्भिर्दिक्त्रिकोणकम् ॥ ५२ ॥

विधाय प्राग्वहिम्र्मध्यात् प्रादक्षिण्यप्रवेशतः ।

विलिखेत्तद्वितीयार्द्धे भेदात्तु विलिखेत्ततः ॥ ५३ ॥

त्रिकोणेषु च तार्त्तीयं समाध्यं मध्यतस्तथा ।

नवसु विलिखेद्विद्याकूटत्रयमथ त्रिशः ॥ ५४ ॥

दक्षत्रये त्वाद्यकूटं मध्ये तार्त्तीयकं तथा ।

वामत्रये द्वितीयञ्च लिखेत् साध्ये तृतीयकम् ॥ ५५ ॥

एतत्तु कोष्ठवज्राख्यं यन्त्रमिष्टार्थदायकम् ।

फलानि सर्वयन्त्राणां पटलेऽस्मिन् शृणु प्रिये ॥ ५६ ॥

तत्रेऽस्मिन्नन्यतन्त्रेषु यस्य यन्त्रस्य यत् फलम् ।

प्रोक्तं तदेषामेकैकं योजयेत् सर्वमेव च ॥ ५७ ॥

तेनात्र यन्त्रनिर्म्माणमानमेवोच्यते मया ।

फलानि वाञ्छयावाप्नोत्ययत्नान्नामयोजनैः ॥ ५८ ॥

अतः फलानि तन्त्राणामिह नोक्तानि कृत्स्नशः ।

सर्वञ्च सर्वदा सर्वसमीहितफलाप्तिकृत् ॥ ५९ ॥

प्राक्प्रत्यग्दक्षिणोदक्षड्विंशत्या समाहतैः ।

सूत्रैः कोष्ठानि जायन्ते षट्शतं पञ्चविंशति ॥ ६० ॥

तेषु कोष्ठेषु परितो मार्जयेदष्टसप्ततिम् ।

शिष्टे चतुर्भिस्त्र्यस्रञ्च विदध्याद्दिक्षु पूर्ववत् ॥ ६१ ॥

तेषु तार्त्तीयविद्यान्तु समाध्यां प्राग्वदालिखेत् ।

शिष्टेषु सप्तनवति द्विशते मध्यतस्तथा ॥ ६२ ॥

सर्वमध्यस्थकोष्ठस्य पार्श्वयोरुभयोरपि ।

कोष्ठानि त्रीणि तिर्य्यक् च समीकृत्य तयोस्तथा ॥ ६३ ॥

उपर्य्यधश्च द्वे द्वे तु समीकुर्य्यात्ततस्तथा ।

तयोरधोर्द्धं च तथा द्वे द्वे कुर्य्यादथैकधा ॥ ६४ ॥

तदधश्चोपरि तथा त्वेकैकञ्च द्वयं द्वयम् ।

एकीकृत्य पुनस्चोद्ध्र्वे द्वे द्वे तु मार्जयेत्तथा ॥ ६५ ॥

ततो माला तदुपरिपार्श्वयोश्च प्रमार्जयेत् ।

दशखण्डानि शिष्टैस्तु मध्ये लिङ्गो भवेत्तथा ॥ ६६ ॥

एवं लिङ्गः समाख्यातस्चत्वारिंशद्भिरेव वै ।
शिष्टानि कोष्ठवज्राणि द्विशतं दश पञ्च च ॥ ६७ ॥
लिङ्गस्य पार्श्वयोर्मृष्टान्येकविंशतियुग्मकम् ।
तस्य लिङ्गस्य मध्यस्थपङ्क्त्यां तार्त्तीयमालिखेत् ॥ ६८ ॥
ऊर्द्ध्वादि मायामध्यस्थं सर्वमध्ये समाध्यकम् ।
सर्वत्र तार्त्तीया विद्या लेहनं समुदीरितम् ॥ ६९ ॥
लिङ्गरूपेषु नवसु पार्श्वषट्के तु पूर्ववत् ।
विद्याशेषं समालिख्य प्राग्वदारम्भतस्तथा ॥ ७० ॥
विद्याद्वितीयभेदोत्थं तद्विंशशतमालिखेत् ।
द्विशस्तत्र यजेद्देवीमावाह्य परिकारकैः ॥ ७१ ॥
स्थापयेद्विनियोगेषु प्रोक्तेषु परमेश्वरि ।
नासाध्यमस्ति भुवने यन्त्रैरेतैर्मयोदितैः ॥ ७२ ॥
एकादिद्वयंवृद्धया पार्श्वयोः कोष्ठवर्द्धनम् ।
एकोनविंशकोष्ठान्तं कृत्वा लिङ्गं तथोपरि ॥ ७३ ॥
कृत्वा प्राङ्मध्यतः प्राग्वच्चत्वारिंशद्भिरेव वै ।
तेषु मूलादिपरितो मध्यान्तं विन्यसेत् क्रमात् ॥ ७४ ॥
विद्याद्वितीयभेदोत्था विद्या विंशशतं प्रिये ।
लिङ्गस्य मध्यकोष्ठान्तं शिष्टं कोणेषु संलिखेत् ॥ ७५ ॥
विधाय चतुरस्रन्तु सूत्रद्वयनिपातनात् ।

सर्वबाह्ये तदावद्धं तस्योपरि समालिखेत् ॥ ७६ ॥

पंक्तिशः सप्तकोष्ठेषु पर्य्यायादींस्तथार्णकान् ।

नित्यापर्य्यायजनिते पार्श्वयोर्दक्षवामयोः ॥ ७७ ॥

मध्ये युगोदयार्णे तु लिखेत् प्रोक्तक्रमेण वै ।

लिङ्गाग्रमध्यादभितः  पिण्डिकायाञ्च संलिखेत् ॥ ७८ ॥

विद्याः प्रथमभेदोत्थाश्चतुर्विंशतिकास्तथा ।

कृत्वैवं मेरुलिङ्गन्तु यन्त्रं तत्रैव तां लिखेत् ॥ ७९ ॥

ममस्तवाञ्छितप्राप्त्यै जयारोग्यायुराप्तये ।

पटादौ तत् समालिख्य पूजयेन्नित्यशश्च ताम् ॥ ८० ॥

प्राक्प्रत्यग्दक्षिणोदक्कसैकविंशतिसूत्रतः ।

चतुःशतानि कोष्ठानि भवन्ति सुसमानि वै ॥ ८१ ॥

तस्यैकपार्श्वाधोभागी पञ्च कोष्ठानि मार्जयेत् ।

ततस्चोपरि षट्सप्तेत्येवमेकादशावधि ॥ ८२ ॥

मार्जयेदुपरिष्टाच्च तस्यैव प्रतिलोमकम् ।

तथा कुर्य्यात् पार्श्वयोश्च तेनाधिष्ठानपिण्डिके ॥ ८३ ॥

भवतस्चिपरिष्टात्तु पञ्चविंशतिकोष्ठकैः ।

लिङ्गमन्यानि पार्श्वस्थमार्जनाद्भवति प्रिये ॥ ८४ ॥

अधिष्ठाने पिण्डिकायां तद्द्वितीयविभेदजाः ।

लिङ्गे प्रथमभेदोत्थस्तन्मध्यस्थे स्ववाञ्छितम् ॥ ८५ ॥

मध्ये तद्दिनजां विद्यामिति प्रोक्तं तवानघे ।

महालिङ्गाभिधं यन्त्रं तत्र पूजाखिलेष्टदा ॥ ८६ ॥

समत्रिरेखां निष्पाद्य योनिं तस्यास्तु मध्यतः ।

तत्तत्सूत्रवशात् कुर्य्याद्दश त्रिषु तथा समम् ॥ ८७ ॥

एवं कृतेत्र परितो लिखेत्ता विंशतां शतम् ।

शिष्टमध्यत्रिकोणे तु लिखेद्वाञ्छितमात्मनः ॥ ८८ ॥

तत्र तामर्च्चयेत् प्राग्वत् स्थापयेच्च तथा तथा ।

तत्र स्वेष्टमवाप्नोति योनिचक्रानुभावतः ॥ ८९ ॥

समत्रिरेखं निष्पाद्य त्र्यस्रं योनिञ्च सङ्गतम् ।

तत्र तिर्य्यक् चतुःसूत्रपातनादन्यतस्तथा ॥ ९० ॥

तिर्य्यक्सूत्रं मार्जयित्वा पूर्व्वशृङ्गात्तथाभितः ।

प्रवेशगत्या विलिखेत्ताश्चतुर्व्विंशतिं क्रमात् ॥ ९१ ॥

विलिख्य शिष्टवज्रस्थं विलिखेन्निजवाञ्छितम् ।

तत्र तां पूजयेद्देवीं पूर्णास्विष्टार्थसिद्धये ॥ ९२ ॥

तथा विधाय दशभिर्द्दशभिः सूत्रपातनैः ।

द्वितीयभेदाः विलिखेत्तथा साध्यसमन्विताः ॥ ९३ ॥

तत्रापि पूजनाद्यैस्तु सिद्ध्येयुः निजवाञ्छिताः ।

एवमूह्यं तृतीयोत्थविद्याभिरपि कल्पयेत् ॥ ९४ ॥

तेपि वाञ्छितसंसिद्धौः कुर्य्युरेव सुनिश्चितम् ।

कोष्ठयन्त्रविभेदानि शृणु वक्ष्ये यथाविधि ॥ ९५ ॥

नवषोडशकोष्ठादि संवर्द्धय विषमं समम् ।

तेष्वङ्कानि समं कृत्वा पंक्तौ तेषु समालिखेत् ॥ ९६ ॥

विद्यातृतीयभेदोत्थांस्तत्तदङ्कानुगुण्यतः ।

मनीषितञ्च संलिख्य तेषां मध्यस्थकोष्ठतः ॥ ९७ ॥

विदध्याद्वाञ्छितं सर्व्वं तैर्यन्त्रैः कल्पितैस्तथा ।

वश्याकर्षणविद्वेषस्तम्भनोच्चाटनादिकम् ॥ ९८ ॥

आयुरारोग्यविजयं विभूत्याद्यञ्च सिध्यति ।

स्थापनाद्धारणच्चान्यैरुपायैः साधकोनिशम् ॥ ९९ ॥

इति देव्या यन्त्रभेदास्तवोक्ताः सर्व्वसिद्धिदाः ।

अशेषं देवि ते प्रोक्तं यन्त्रसिद्धयभिधागमे ॥ १०० ॥

ईश्वरात्ममयी व्याप्तिरिति सम्यक् समीरिता ।

अस्या निफालनाच्चित्ते तत्तत्त्वं स्वात्मसात् कृतम् ॥ १०१ ॥

इति षोडशनित्यातन्त्रे श्रीकादिमते त्रयस्त्रिंशत् पटलम् ॥ ३३ ॥

चतुस्त्रिंशपटलम् ।

अथ षोडशनित्यानां विद्याकौत्किनामिह ।

चमत्कारकरीं विद्यां वक्ष्यामि शृणु सुन्दरि ॥ १ ॥

सिद्धसारस्वतं मृत्युञ्जयं त्रिपुटगारुडे ।

अश्वारूढामन्नपूर्णां नवात्मानं नवात्मिकाम् ॥ २ ॥
ततश्च देवीहृदयं गौरीविद्याञ्च लक्षदाम् ।
निष्कत्रयप्रदामिष्टदायिनीञ्च मतङ्गिनीम् ॥ ३ ॥
राज्यलक्ष्मीं महालक्ष्मीं सिद्धलक्ष्मीमनन्तरम् ।
गोपालभेदानौषधान् वदाम्युक्तक्रमेण वै ॥ ४ ॥
शुचिः स्वेन ततो माया वियद्दाहस्ववह्नियुक् ।
हंसहृत्तेजसां योगाद्द्युतिदाहचरस्वकैः ॥ ५ ॥
पुनश्च हंसहृद्धं सद्वयदाहवनैरपि ।
समायारुदिता विद्या पञ्चार्णामृतविग्रहा ॥ ६ ॥
पटलेऽस्मिन्ननुक्तानामङ्गानि निजविद्यया ।
मायया वा विदध्याच्च ध्यानं चाद्यानुदीरिते ॥ ७ ॥
प्रयोव्रतः पञ्चलक्षं जपित्वा कुलसुन्दरीम् ।
ध्यात्वा सिद्धमनुः पश्चाद्विदध्याद्विनियोगकम् ॥ ८ ॥
अनया मन्त्रितैरद्भिः शोदयित्वा तु कन्यकाम् ।
पाययित्वा च तां ब्रूयात् श्लोकयेति समाहितः ॥ ९ ॥
गङ्गाप्रवाहवत्तस्या भारती निःसरेन्मुखात् ।
आचष्टे च त्रिकालस्थानर्थान् पृष्टा महाद्भुतम् ॥ १० ॥
भूः स्वेन ज्याधरास्वेता ह्न्मायया समन्वितं ।
पालयेति द्विरुक्त्वा तत् प्रतिलोममुदीरयेत् ॥ ११ ॥

विद्या मृत्युञ्जयाख्यासौ दीर्घस्वरयुजा हृदा ।

विद्ययाङ्गानि नियतं स्वात्मानं चिन्तयेदिति ॥ १२ ॥

आद्यमध्यतृतीयार्णनालपद्मसुकर्णिके ।

समासीनं सुधार्द्राङ्गं मौलाबिन्दुकलायुतम् ॥ १३ ॥

सुसितं हरिणाक्षस्रक्चिन्तापाशकरं हरम् ।

स्वैक्येन भावयेन्नित्यं जयदीर्घायुरेधते ॥ १४ ॥

तृतीयममृताख्याया द्वितीयं तदनन्तरम् ।

रसावह्निस्वसहितप्राणास्तैस्त्रिपुटोदिता ॥ १५ ॥

त्रिभिर्द्विरुक्तैरङ्गानि कृत्वा विद्यान्तु नित्यशः ।

जपेदह्नो मुखे स्वैक्यं भावयंस्त्रिसहस्रकम् ॥ १६ ॥

तेन विद्यां श्रियं कान्तिं कवितां गानकौशलम् ।

नरनारीनृपाणाञ्च वाल्लभ्यं लभते नरः ॥ १७ ॥

अरुणामरुणाक्षस्थां प्रसन्नवदनाम्बुजाम् ।

पुष्पेष्वङ्कुशपद्मानि पद्मपाशेक्षुचापकान् ॥ १८ ॥

दधानां बाहुभिः षड्भिः माणिक्यमुकुटोज्ज्वलाम् ।

शृङ्गारभूषापिकवाक्चामरादर्शपीडकाः ॥ १९ ॥

दधानाः परितस्तस्या गायन्त्यश्चापि शक्तयः ।

परिवार्य्य स्थितास्ताभिर्वृतां तां स्वैक्यतः स्मरेत् ॥ २० ॥

भूः स्वेन हंसदाहाभ्यां मरुद्वह्निक्ष्मया युतौ ।

वैमोंहीत्यक्षराणां चतुष्कं गरुडेति च ॥ २१ ॥

जवी सवह्निग्रासश्च हंसहिंसद्वयन्तथा ।

स्वाहान्तो गदितो मन्त्रस्तार्क्षस्याखिलरक्षितुः ॥ २२ ॥

त्रयोविंशार्णको मन्त्र  उपरागे सुसाधितः ।

फणिदष्टान् पिशाचाद्यैः क्लिष्टानन्यांश्च रोगिणः ॥ २३ ॥

विषार्त्तान् त्रिविधैरुग्रैर्मूर्च्छतांश्च गतासुकान् ।

पालयेच्छतजप्तेन तोयेनाभ्युक्षणात् क्षनात् ॥ २४ ॥

कुर्वतस्ताण्डवं शम्भोरग्रे मेरुसमं विभुम् ।

अहितानि च खादन्तं स्मरंस्तार्क्षमनुं जपेत् ॥ २५ ॥

पद्माक्षबिजतैलेनाप्याशु नशेन नाशयेत् ।

गरलं भुजगानाञ्च समस्तानामयत्नतः ॥ २६ ॥

प्रणवं चरहंसाग्निजवीदाहो नभस्चरौ ।

शून्याम्बु रसदाहोग्निहृदम्बुमरुदन्वितः ॥ २७ ॥

हंसश्च मरुता युक्तः प्रोक्ता विद्या दशाक्षरी ।

षडङ्गं मायया कृत्वा जपेदक्षरलक्षकम् ॥ २८ ॥

ततो यमुद्दिश्य जपं निशि कुर्य्यादयत्नतः ।

समानयेत् स्वगेहे तमानाशात् प्रोक्तकारिणम् ॥ २९ ॥

वश्यमाकर्षणं लक्ष्मीं सुवर्णं वाञ्छितानि च ।

प्राप्नोत्युयत्नादनया विद्यया सिद्धयानिशम् ॥ ३० ॥

लोहितां लोहिताश्वस्थां लोहिताम्बरभूषणाम् ।
चतुर्भुजां त्रिनयनां प्रसन्नवदनाम्बुजाम् ॥ ३१ ॥
भल्लां दक्षेण वामेन चर्म्मयष्टिं समुज्ज्वलाम् ।
अभ्याभ्यां हेमपाशेन कण्ठे वद्धा स्वसाध्यकम् ॥ ३२ ॥
हेमवेत्राहतं वद्धा करयुग्मकृताञ्जलिम् ।
दासोहमिति भाषन्तं पतितं निजपादयोः ॥ ३३ ॥
स्वरन् विद्यां जपेन्मर्त्त्यो वशे कुर्य्यादयत्नतः ।
समस्तं जीवभुवनमश्वारूढाख्यविद्यया ॥ ३४ ॥
प्रणवं नमसा युक्तं तथा भगवतीति च ।
माहेश्वरीति प्रोक्तवान्नपूर्णे स्वाहेति तन्मनुः ॥ ३५ ॥
विधाय माययाङ्गानि जपेद्विद्यामहर्मुखे ।
सहस्रवारं नियतं न तस्य स्याद्दरिद्रता ॥ ३६ ॥
भुजङ्गत्रासकरणनृत्यासक्तावलोकिनीम् ।
स्मितवक्त्रां हेमपात्रात् पायसं दधतीं करे ॥ ३७ ॥
भवानो सर्वदा विद्याजपवान्न कदाचन ।
बुभुक्षितो भवेदेव न कदाचिन्न कुत्रचित् ॥ ३८ ॥
तथा नृत्यस्थितं मां त्वां तदालोकनकौतुकाम् ।
आभ्यां भजेन्नित्यशो यो मन्त्राभ्यां याचते वरम् ॥ ३९ ॥
तस्यावयोः प्रसादेन सिध्यतेवाशु चिन्तितम् ।

तिष्ठेच्चोपरि सर्वेषां सर्वथा सर्वतः सदा ॥ ४० ॥

हंसहृद्वासनभसां रसाम्बुव्याप्तदाहकैः ।

क्ष्मास्वयोगान्नामतश्च नवात्म नवभिश्च तैः ॥ ४१ ॥

तस्यैव क्ष्माक्षरं हित्वा वह्निं तत्र प्रयोजयेत् ।

नवात्मिका तु ते विद्या द्वावेतौ सर्वसिद्धिदौ ॥ ४२ ॥

प्रणवं त्रिपुटान्त्यार्णं नमसा चतुरक्षरी ।

देवीहृदयसंज्ञासौ विद्या सर्वार्थसिद्धिदा ॥ ४३ ॥

ध्यानमुक्तममुष्यास्तु सततं सर्वमङ्गलाम् ।

सितकुष्ठं स्वर्णपुष्पीमूलं तत्पत्रवारिणा ॥ ४४ ॥

पिष्ट्वा शुद्धः पायसाशी विद्याजापी जितेन्द्रियः ।

भुमौ श्रयित तां रात्रिं विजने सुशुभे गृहे ॥ ४५ ॥

तल्लिप्ताज्ञाकण्ठहृत्कस्तत्रालिखितमायकः ।

आज्ञास्थितं (ता)

तथा सा तं वहेदस्याभिवाञ्छितम् ॥ ४६ ॥

देवीहृइदयविद्येयं स्त्रीणां सद्यःफलप्रदा ।

सौभाग्यलक्ष्मीकीर्त्यायुरारोग्यविजयावहा ॥ ४७ ॥

प्रणवं रुद्रदयिते तथा योगेश्वरीति च ।

स्वाहान्तिका तु विद्येयं कथिता द्वादशाक्षरी ॥ ४८ ॥

गौरीविद्येत्यसौ प्रोक्ता लक्षजप्ता सुसाधिता ।

ध्यात्वा प्राग्वद्धयारूढा देवी साधयतीप्सितम् ॥ ४९ ॥

निशामध्ये तु निशया निजवामोरुदेशतः ।

साध्यनामसमोपेतामालिख्यैतान्तु तन्मनाः ॥ ५० ॥

ध्यायंस्तथा जपेद्विद्यां तदैवाकर्षयेत् प्रियाम् ।

नानया सदृशी विद्या विद्यते वनितावशे ॥ ५१ ॥

राजवश्ये तथा लोकवश्ये स्त्रीवशकर्म्मणि ।

न विद्याः सन्ति भुवने हयगौरीसनुद्भयात् ॥ ५२ ॥

अग्निर्नादश्च तद्युक्तः तावेवाथ नभोधरौ ।

एतद्द्वितीयं तौ स्यातां काकण्ठेति ततः परम् ॥ ५३ ॥

मुण्डिस्वाहेति विद्येयमुक्ता पञ्चदशाक्षरा ।

कृताङ्गो मायया ध्यात्वा तां देवीं सर्वमङ्गलाम् ॥ ५४ ॥

जपेद्विद्यां मौनयुतः कदलीपूगमध्यतः ।

त्रिसन्ध्यार्चासमोपेतं सा प्रीता लक्षदा दिनैः ॥ ५५ ॥

प्रणवं नवकेशां च कनकवतिसंयुतम् ।

स्वाहान्तं द्वादशार्णेयं विद्या निष्कत्रयप्रदा ॥ ५६ ॥

नित्यशो गिरिशृङ्गस्थवटमूले त्रिलक्षकम् ।

जपित्वा वर्णशो विद्यां फलमुक्तमवाप्नुयात् ॥ ५७ ॥

चरः प्राणो मरुद्युक्तो व्याप्तं प्राणो धरान्वितः ।

व्योमद्वयं मरुद्युक्तं रयश्च धरया युतः ॥ ५८ ॥

चरः प्राण इति प्रोक्त्वा विद्याभीष्टं वदेन्मिथः।
जातिपुष्पैर्निशामध्ये पूजिता मङ्गलाकृतिः॥ ५९॥
सिद्धसारस्वतस्यादौ त्र्यक्षराणि ततः परम्।
मातङ्गिन्यै तथा स्वाहा पुनस्त्रीणीति तन्मनुः॥ ६०॥
द्वादशार्णेयमचिरात् सौभाग्यं कवितां श्रियम्।
गानाभियोगं विश्वेषां मान्यताञ्च प्रयच्छति॥ ६१॥
मायाकृताङ्गो नित्यशस्तां प्रजपेदुदये रवेः।
सहस्रवारं तेनासौ सिद्धा सर्वं प्रयच्छति॥ ६२॥
इन्द्रनीलनिभां रक्तवसनाभरणोज्ज्वलाम्।
प्रलम्बवेणीसन्नद्धसौगन्धिकसमुज्ज्वलाम्॥ ६३॥
तत्क्लृप्तमुण्डमालाञ्च मुक्तास्तवकशोभिताम्।
ऊर्म्मिकावीरकटकनूपुरैर्मण्डिताङ्घ्रिकाम्॥ ६४॥
वादयन्तीं महावीणां स्वसमानाङ्गनाजनैः।
स्तूयमानाञ्च परितो ध्यायेद्देवीं शुचिस्मिताम्॥ ६५॥
मातङ्गिन्या द्वितीयञ्च तृतीयं तदनन्तरम्।
रसाचरस्कैरम्बुस्याद्धाताग्नी तदनन्तरम्॥ ६६॥
राज्यदे राज्यलक्ष्मीति हृन्माया व्युत्क्रमात्रयम्।
विद्यासौ राज्यलक्ष्म्यास्तु षोडशार्णा समीरिता॥ ६७॥
ध्यात्वा तां विजयां विद्यां जपेन्नित्यञ्च पूजयेत्।

राज्यं प्रयच्छति प्रीता साधायाविलम्बितम् ॥ ६८ ॥
प्रणवं श्रीपुटां मायां कमले तदनन्तरम् ।
कमलातो लये पस्चात् प्रसीदद्वितयं पुनः ॥ ६९ ॥
आद्यत्रयं महालक्ष्म्यै नमः प्रोक्ता महेश्वरि ।
विद्या ते सप्तविंशार्णा समस्ताभीष्टदानिशम् ॥ ७० ॥
बीजत्रयैः षडङ्गानि द्विरुक्तैर्विहितानि वै ।
ध्यानञ्च विजयारूपं प्रजपाद्दिनशस्तथा ॥ ७१ ॥
कीर्त्तिलक्ष्मीधनारोग्यविजयाद्यखिलेष्टदा ।
तुलास्थे भास्करे पूजा पूर्णयां सकलेष्टदा ॥ ७२ ॥
ज्यासकदाहवह्निस्वान्नभो हंसो मरुद्युतः ।
चण्डतेजश्च सङ्कर्षणवर्णाः स्युस्तदनन्तरम् ॥ ७३ ॥
व्योमाग्न्या कालीमन्थाने वर्णा हंसश्च मायया ।
सिद्धलक्ष्म्यादिविदेयेयं प्रोक्ता सप्तदशाक्षरा ॥ ७४ ॥
आद्येन कृत्वा चाङ्गानि जपेद्विद्यान्तु नित्यशः ।
प्रातः सहस्रवारन्तु तर्पयेत्तद्दशांशकम् ॥ ७५ ॥
प्रसन्न वर्षतो नित्यपूजायां साधकस्य सा ।
प्रयच्छति जयं युद्धे श्रियं सर्वातिशायिनीम् ॥ ७६ ॥
भ्यतप्रेतपिशाचापस्मारकृत्यादिवारणम् ।
करोति मार्गे कान्तारगिरिकृच्छ्रेभिरक्षति ॥ ७७ ॥

ध्यानन्तु तस्या देवेशि मङ्गले मङ्गलासमा ।

युद्धमार्गादिरक्षासु शृणु वक्ष्ये यथाविधि ॥ ७८ ॥

शतशीर्षां त्रिनयनां प्रतिवक्तं भयानकाम्

हस्तद्विशतसंयुक्तां स्वसमाकारशक्तिभिः ॥ ७९ ॥

वृतामनन्तैर्हस्तेषु साधकाभीष्टहेतिकाम् ।

ध्यात्वैवमर्चयेदिष्टमवाप्नोत्यखिलं द्रुहुवम् ॥ ८० ॥

प्राक्प्रत्यग्द्क्षिणोदक्क कृत्वा सूत्राष्टकं ततः ।

मार्जयेद्वाह्यवीथीषु पञ्चपञ्च तथैकधा ॥ ८१ ॥

तदन्तरपि कोणेषु त्रयमेकीकृते ततः ।

मध्यादि विलिखेन्मन्त्रवर्णान् षोडश नाम च ॥ ८२ ॥

प्रादक्षिण्यक्रमान्मध्ये पूजयेत्तत्र तां सदा ।

समस्ताभीष्टसंसिद्ध्यै सिद्धलक्ष्मी तु नित्यशः ॥ ८३ ॥

कदाचिदाद्या ललिता पुंरूपा कृष्णविग्रहा ।

सर्वनारीसमारम्भादकरोद्विवशं जगत् ॥ ८४ ॥

ततः स गोपीस ।ङ्गाभिरावृतोभूत् । स्वशक्तिभिः ।

तदा तेन विनोदाय स्वं षोढाकल्पयद्वपुः ॥ ८५ ॥

तेषां ष्णाञ्च षन्मन्त्राः समस्ताभीष्टदायकाः ।

तैर्यन्त्रपूजाहवनजपतर्पणसेचनैः ॥ ८६ ॥

भवन्ति लक्ष्मीकान्तिश्रीविजयारोग्यसंयुताः ।

शृणु तान् षट्क्रमान्मन्त्रान् ध्यानार्चाविनियोगकैः ॥ ८७ ॥

स्थिरारसाव्याप्तवनस्तैरुक्तोभून्महामनुः ।

प्रणवद्वयमध्यस्थः सिद्धगोपालकाभिदः ॥ ८८ ॥

प्रोक्तैस्तैः पञ्चभिः काममन्त्रैरेकैकतः क्रमात् ।

पुटनान्नामतस्तस्माद्वाणैस्तैः पुटनाद्भवेत् ॥ ८९ ॥

सम्मोहनाख्यस्त्वेवञ्च सप्तधाबून्महामनुः ।

आद्यः पञ्चाङ्गको मन्त्रास्त्वितरे स्युः षडङ्गकाः ॥ ९० ॥

तत्तद्बीजादिकेन स्यात् षडङ्गानि यथाविधि ।

अष्टपत्राभमध्यस्थं पूजयेत् सप्तातिक्रमात् ॥ ९१ ॥

यन्त्राणि तानि तन्मन्त्रयुतमध्यान्यनुक्रमात् ।

वारेषु भास्कराद्येषु तेषां पूजा क्रमेण वै ॥ ९२ ॥

सकलेष्टप्रदा नित्यं दुग्धक्षौद्रघृतान्नकैः ।

पायसैर्नारिकेलैश्च ससितैः कदलीफलैः ॥ ९३ ॥

क्रमाद्वारेषु नैवेद्यं दद्यादिष्टार्थसिद्धये ।

इतीरितैः सप्तभिस्तैः सर्वमिष्टमवाप्नुयात् ॥ ९४ ॥

अरुणं षड्भुजं वंशवादिनं पाशमङ्कुशम् ।

पुण्ड्रेक्षुचापपुष्पेषून् दधानं शक्तिभिः स्मरेत् ॥ ९५ ॥

सुवर्णपुष्पीमुलेन पिष्टेन निजवारिणा ।

हृत्कण्ठाङ्गालेपनतो देवतादर्शनं भवेत् ॥ ९६ ॥

उग्रगन्धां च नीलीं च धातकीफलसंयुताम् ।
आरग्वधं मुण्डिनीं च शाकोटं जम्बुमूलकम् ॥ ९७ ॥
कर्णिकारिं हंसपदीं वाराहीं मृगराजकम् ।
कोरण्टं पिप्पलं मूलं त्रिफलं चूर्णयेत् समम् ॥ ९८ ॥
सितेनाज्येन मधुना दग्ध्वा तल्लिप्ततत्त्रयः ।
भागयंस्तन्मयो भूयाद्दिवसैः कैश्चिदात्म्वान् ॥ ९९ ॥
सदाशिवमयी व्याप्तिरिति सम्यक् समीरिता ।
अस्या निफालनाच्चित्ते तत्तत्त्वं स्वात्मसात् कृतम् ॥ १०० ॥ ?

इति षोडशनित्यातन्त्रेषु श्रिकादिमते चतुस्त्रिम् ।शत् पटलम् परिपूर्णम् ॥ ३४ ॥
पञ्चत्रिंशपटलम् ।
अथ षोडशनित्यानां स्वात्मत्वे वासनां शृणु ।
यया तन्मयतासिद्धिः प्रत्यक्षा भवति ध्रुवम् ॥ १ ॥
गुरुराद्या भवेच्छक्तिः सा विमर्शमयी मता ।
नवत्वं तस्य देहस्य रन्ध्रत्वेनावभासते ॥ २ ॥
बलिदेव्याः स्वमायाः स्युः पञ्चमी जनकात्मिका ।
कुरुकुल्ला भवेन्माता पुरुषार्थास्तु सागराः ॥ ३ ॥
रत्नद्वीपो भवेद्देहो नवत्वं धातुरोमभिः ।
सङ्कल्पाः कल्पतरवः स्वाधारा ऋतवः स्मृताः ॥ ४ ॥

ग्रहर्क्षराशिचक्रेण कालात्मा पश्चिमामुखः ।
तेन पूर्व्वाभिमुख्यं स्यादन्यत्ते कथितं मिथः ॥ ५ ॥
ज्ञाता स्वात्मा भवेज्ज्ञानमर्घ्यं ज्ञेयं बहिःस्थितम् ।
श्रीचक्रं पूजनं तेषां एकीकरणमीरितम् ॥ ६ ॥
श्रिचक्रे सिद्धयः प्रोक्ता रसा नियतिसंयुताः ।
ऊर्म्मयः पुण्यपापे च ब्राह्म्याद्या मातरः स्मृताः ॥ ७ ॥
भ्हुतेन्द्रियमनांस्येव क्रमान्नित्याकला पुनः ।
कर्म्मेन्द्रियार्था दोषाञ्च ज्ञेयाः स्युः शक्तयोष्ट वै ॥ ८ ॥
नाड्यश्चतुर्द्दश प्रोक्तः  क्षोभिण्याद्यास्तु शक्तयः ।
वायवो दश संप्रोक्ताः सर्वसिद्धयादिशक्तयः ॥ ९ ॥
वह्नयो दश संप्रोक्ताः सर्वज्ञाद्यास्तु शक्तयः ।
श्रीतोष्णसुखदुःखेच्छा गुणाः प्रोक्ताः क्रमेण वै ॥ १० ॥
वशिन्याद्याः शक्तयः स्युस्तन्मात्राः पुष्पसायकः ।
मनो भवेदिक्षुधनुः पाशो राग उदीरितः ॥ ११ ॥
द्वेषः स्यादङ्कुश ।ः प्रोक्तः क्रमेण वरवर्णिनि ।
अव्यक्ताहङ्कृतिमहदाकाराः प्रतिलोमतः ॥ १२ ॥
कामेश्वर्य्यादि देव्यः स्युः सम्बित् कामेश्वरः स्मृतः ।
स्वात्मैव देवता प्रोक्ता ललिता विश्वविग्रहा ॥ १३ ॥
लौहित्यं तद्विमर्शः स्यादुपास्तिरिति भावना ।

सिद्धिस्त्वनन्यचित्तत्वं मुद्रा वैभवभावनम् ॥ १४ ॥

उपचाराश्चलत्वेपि तन्मयत्वाप्रमत्तता ।

प्रयोगास्तु विकल्पानां हेतोः स्वात्मनि नाशनम् ॥ १५ ॥

यन्त्राणि मन्त्राः सर्वत्र स्वात्मत्वे स्थैर्य्यसाधनम् ।

सन्ध्यासु भजनं देव्या आदिमध्यान्तमज्जनम् ॥ १६ ॥

अन्यास्तु शक्तयश्चक्रगामिन्यो याः समन्ततः ।

तास्तु विश्वविकल्पानां हेतवः समुदीरिताः ॥ १७ ॥

न्यासस्तु देवतात्वेन स्वात्मनो देहकल्पनम् ।

जपस्तन्मयतारूपभावनं सम्यगीरितम् ॥ १८ ॥

होमो विश्वविकल्पानामात्मन्यस्तमयो मतः ।

(तेषामन्योन्यसम्भेदमावनं तर्पणं भवेत् ॥ १९ ॥

मोहाज्ञानादिदुःखानामात्मन्यस्तमयो दृढम् । )

अभिषेकस्तु विद्या स्यादात्म सर्व्वाश्रयो महान् ॥ २० ॥

उपाधीनान्तु राहित्यमुपदेश इतीरितः ।

दक्षिणा भेदशून्यत्वं शुश्रूषा स्थैर्य्यमुच्यते ॥ २१ ॥

तिथिरूपेण कालस्य परिणामावलोकनम् ।

नित्या पञ्चदशैताः स्युरिति प्रोक्तास्तु वासनाः ॥ २२ ॥

पृथिव्यादीनि भूतानि कनिष्ठाद्या क्रमान्मता ।

तेषामन्योन्यसम्भेदप्रकारैस्ततत्प्रपञ्चता ॥ २३ ॥

र्णैः या भि लि र्वं ता स्त्रि ल ते र्थो धी क य ला भि स ।
न्तु दे रू षे प ण वी शे तं दि मी न रि स्या द् ते ॥ २४ ॥
स्नं तो गत् शे कृत् ष ज अ रि त्म मी ल्ले श्व खा क ह्व ।
तः र्थ क स्या थि श्चा स्तु त तः न्त्रे गो र्व पि त षु स ॥ २५ ॥
त्वं का मा म्ना न प्र श व्यो ना न भ स ग्नि मा त्व ग्र ।
रो म ई यो का र्वि र्श त नं त फा न्दु ल ना न्नि वि ॥ २६ ॥
अथ मन्त्रविनिर्म्माणविधानमभिधीयते ।
मन्त्रवीर्य्यसुसिद्धानामितरेषां विशेषकृत् ॥ २७ ॥
मन्त्रा एकाक्षराः पिण्डाः कर्त्तर्य्यो द्व्यक्षराः स्मृतः ।
वर्णत्रयं समारभ्य नवार्णवधि बीजकाः ॥ २८ ॥
ततो दशार्णमारभ्य यावद्विंशति मन्त्रकाः ।
तत ऊर्द्ध्वं गता मालास्तासु भेदो न विद्यते ॥ २९ ॥
तथैव पिण्डकर्त्तर्य्योर्भेदो बीजेषु वर्णतः ।
पदिर्म्मन्त्रेषु भेदः स्यात् तेषां संख्याः शृणु क्रमात् ॥ ३० ॥
षट्चतुर्विंशति तथा शतं विंशतिसंयुतम् ।
सविंशति सप्तशतं चत्वारिंशद्भिरन्वितम् ॥ ३१ ॥
सहस्रपञ्चकं पश्चाच्चत्वारिंशत्सहस्रयुक् ।
त्रिशतं विंशति ततस्त्रिलक्षेण समन्वितम् ॥ ३२ ॥
द्विषष्टिश्च सहस्राणां साशीत्यष्टशतन्त्विति ।

भेदसंख्येत्थं सप्तानां ताभिरन्याः समुन्नयेत्॥ ३३॥

प्रस्तारक्रममेतेषां शृणु देवि यथाक्रमम्।

एतैरेवोन्नयेन्मन्त्रपदभेदाननुक्रमात्॥ ३४॥

तिर्य्यग्रेखाद्वयं कृत्वा तत्राधोर्द्धा लिखेत् क्रमात्।

रेखाश्चतस्रः पञ्चवमृज्वाकारा दशावधि॥ ३५॥

तदधो वर्द्धयेद्रेखास्तत्तत्संख्याङ्गुलावधि।

तिर्य्यग्रेखास्तावतीश्च कृत्वा तेष्वङ्कमालिखेत्॥ ३६॥

सव्यदक्षस्थितेष्वेषु कोष्ठपंक्तिष्वनुक्रमात्।

आद्ये द्विद्विक्रमादङ्कान् पूरयेत्तत्र चोदितान्॥ ३७॥

एतेनान्यत्र सर्वत्र देयानङ्कराननुक्रमात्।

द्वितीयपंक्तौ प्रथमे खण्डे शेषांस्तु पूरयेत्॥ ३८॥

द्वितीयादिष्वपि तथा शेषान् खण्डेषु पूरयेत्।

(तृतीयपंक्तौ तु शेषैस्त्वेवमेव समालिखेत्॥ ३९॥

चतुर्थादिष्वपि तथा नवमान्तं समालिखेत्।)

तिर्य्यक्पंक्तिष्वनभ्यस्तक्रममङ्कास्तु सर्वतः॥ ४०॥

एवं कृते भवेद्विद्या सर्व्वोर्द्धा वैरवन्दिते।

सर्व्वाधस्ताद्विलोमा सा मध्यस्था व्याकुलक्रमाः॥ ४१॥

ताभिः सर्व्वाभिरप्याशु सिध्यत्येवाभिवाञ्छितम्।

ललिताभेदजातानि तद्यन्त्रोक्तान्यशेषःअतः॥ ४२॥

नित्यानित्याभिदाश्चापि तद्यन्त्रपटलोदिताः ।
अन्यास्तु तत्र तत्रैव द्रष्टव्या यत्र चोदिताः ॥ ४३ ॥
एषां पञ्चप्रकाराणामर्थाः कीदृग्विधा मताः ।
सम्यक्त्वमेषां केन स्यात् सर्वेषामप्ययत्नतः ॥ ४४ ॥
असम्यक्त्वञ्च केन स्यात्तत्सम्यक्करणं कथम् ।
कानि सिद्धस्य चिह्नानि का वा सिद्धिरुदाहृता ॥ ४५ ॥
रेखाः षडालिखेत्तिर्य्यक्तेष्वधोर्द्ध्वा लिखेत् क्रमात् ।
एकादश ततस्चक्रं पञ्चाशत्कोष्ठकं भवेत् ॥ ४६ ॥
तत्र सव्यादिदक्षान्तं लिखेदर्णाननुक्रमात् ।
प्राणाग्नीलाम्बुखात्मानः पंक्तयः पञ्च कीर्त्तिताः ॥ ४७ ॥
मायाशक्त्यभिधः सर्गः सर्वभूतात्मकः प्रभुः ।
तस्मात्तस्यात्र विन्यासो नैकदेशः शिवात्मनः ॥ ४८ ॥
णो रु रः तो प्रा म च्च वा वी दो यो यु ज र्ना र वा ।
नि र्श ना ष्टः मा स्प श्च व्या श म तां र्णा द् नां रु व ॥ ४९ ॥
जः ह्निः चि ग्नि स्तो र्व शु अ तिः वः स्वी भा द्यु दा शि प्र ।
नि स ना हो मा ग्रा श्च दा पि तै सा र्णा म नां ज व ॥ ५० ॥
कूः भूः रा रा ज्या क्ष्मा स्थि ध ला मी सा त्रा इ भू र गो ।
नां ता व मा र्णा न्ये नि ना मं स्यु था मा क्र नां र्य भौ ॥ ५१ ॥
कं रि नं लं वाः वा व ज हृत् यं सो थ म्बु स्तो र पा ।

ना ता व मा र्णा न्ये नि ना सं स्यु था प्या क्र नां र्य्यं मा ॥ ५२ ॥

च स्व र भ्रुः भ्रं ख द्यु त्रि यत् न्यं भो अ वि शू न व्यो ।

नि ना न्ये स ता श्च मा हं णां व्यो रू मे पि ण म क्र ॥ ५३ ॥

एतैर्नाभभिरेवात्र मन्त्रोद्धारः कृतः शिवे ।

तस्मादतीव गोप्यानि नामान्येतान्ति सर्वदा ॥ ५४ ॥

उक्तनिह्नवयोगेन लिख्तेत्तत्र तु पुस्तके ।

पद्यमेकं वदेत् कर्णे शिष्यस्यैकोक्तरूपिणिः ॥ ५५ ॥

ङ्के र्णान् खे त्त द जा लि वृ तः क्र यो त्य ग स्त म र्व्यं ।

र्य्यात् यो ने भें कु द ज तै तर्णाशेषर्भामिसं ॥ ५६ ॥

श्लोकेनानेन जनयेदनन्तान् सम्प्रदायतः ।

नानावृत्तानभीष्टार्थान्निह्नवाय तु देशिकः ॥ ५७ ॥

अनुष्णशीते विजने सुसमे रम्यविग्रहे ।

गृहे वा मण्डपे स्थित्वा पीठं धवलितोदरम् ॥ ५८ ॥

विनस्य तस्मिन् पूर्णायां शुभर्क्षे वा शुभोदये ।

कुचन्दनैः कुङ्कुमैर्वा दरदैर्वोपदेशतः ॥ ५९ ॥

कृत्वोक्तं मण्डलं सार्णं तत्रावाह्य यजेच्छिवाम् ।

नित्यशो मातृकां जप्यात् सम्प्रदायानुसारतः ॥ ६० ॥

एवमब्द तु सम्पूर्णेभीष्टदेवाय मन्त्रवित् ।

कुर्य्यान्मन्त्रमभीष्टार्थगमकं प्रोक्तयोगतः ॥ ६१ ॥

नभोग्निवायुप्रायार्णाः क्रूराः क्षोभकरा मताः ॥
भूतोयप्रचुराः सौम्याः सेव्याः सिद्धिकरा मताः ॥ ६२ ॥
एषामन्योन्यसम्भेदबाहुल्याद्बहवोर्णवाः ।
तैः तथा भजनात् सिद्धा फलन्ति सैक्ययोगतः ॥ ६३ ॥
मन्त्रार्थास्त्रिविधा ज्ञेया ज्ञातव्याः सिद्धिकाङ्क्षिभिः ।
पूजापटलसम्प्रोक्तास्त्रिविधाः स्युरुपासकाः ॥ ६४ ॥
वर्णस्योदयविश्रान्तिपदे बिद्धिनिपेशनम् ।
एकोन्यः सर्वतः सिद्धव्युत्पत्त्यर्थाभिवीक्षणम् ॥ ६५ ॥
वाच्यवाचक संभेदभावनादिभितीरिताः ।
एषां पञ्चप्रकाराणामशेषेणेष्टसिद्धिदाः ॥ ६६ ॥
मन्त्रवीर्य्यं शृणु प्राज्ञे कथयामि सुखास्पदम् ।
येन ज्ञानानुभूतेन जीवन्मुक्तो भवेन्नरः ॥ ६७ ॥
तेजसां शक्तिमूर्त्तीनां प्रपञ्चस्यापि कारणम् ।
गुणत्रयममीषाञ्च यत् कारणमुदाहृतम् ॥ ६८ ॥
तत्स्वरूपानुसन्धानसिद्धिः सम्यक्त्वमीरितम् ।
तन्मन्त्रवीर्य्यमुद्दिष्टं मन्त्राणां जीव ईरितः ॥ ६९ ॥
असम्यक्त्वन्तु मन्त्राणामयोग्यकथनेन वै ।
सदा प्रयोगाद्भजादकाले संशयाद्भवेत् ॥ ७० ॥
गुरोरवज्ञया पापान्निषिद्धाचारयोगतः ।

देवताद्रोहतः सर्वपरिवादानवस्थया ॥ ७१ ॥

असम्प्रदायादज्ञानादनेकभजनादपि ।

तत्सम्यक्त्वं येन भवेत् कार्य्यं तत् पूर्वमीरितम् ॥ ७२ ॥

नातिद्वेषो नातिरागो नातिभोगेषु सङ्गतिः ।

नातिशोको नातिहर्षो नातिस्नेहो न मत्सरः ॥ ७३ ॥

नातिव्यसनवर्त्तित्वं सुखिता क्लिष्टकारिता ।

स्वदेहमात्रयात्रेच्छा परचिन्ताविवर्जनम् ॥ ७४ ॥

एकरूप्यं लाभहान्योः सदा सन्तुष्टचित्तता ।

भोक्तृत्वं शक्तितो दानमिति सिद्धस्य लक्षणम् ॥ ७५ ॥

मनोरथानामक्लेशसंसिद्धिः सिद्धिरीरिता ।

राज्ञः प्रसादः सर्वेषां मान्यत्वं पुण्यसिद्धयः ॥ ७६ ॥

ख्यातिर्वाहनभूषादिलाभः सुचिरजीवितम् ।

आरोग्यमविसंवादः सच्छिष्यत्वं कृतज्ञता ॥ ७७ ॥

विषाणां जरणं ज्ञानं स्वस्थस्याविदनं तथा ।

प्रत्यक्षाः सिद्धयः पोक्ता मनोः सिद्धस्य सर्वतः ॥ ७८ ॥

एताः स्युः सिद्धयः प्रोक्ताः सिद्धमन्त्रस्य सुचकाः ।

सिद्धमन्त्रेण कर्त्तव्याः प्रयोगे नान्यथा प्रिये ॥ ७९ ॥

नराणामिव मन्त्राणां देवतानाञ्च पार्वति ।

अन्योन्यवैरमस्त्येव गुणभूतसमन्वयात् ॥ ८० ॥

आग्नेयानाञ्च भौमानामाप्या मन्त्रास्तु वैरिणः ।
वायव्यानां जलानाञ्च भौमानां स्यात् प्रस्परम् ॥८१ ॥
स्त्रीदैवत्या वैरिणः स्युः पुंदैवत्यस्य भूयसा ।
स्त्रीदैवत्येषु सौम्यानां क्रूराणां स्यात् प्रस्परम् ॥ ८२ ॥
तथैव पुंदेवतानां त्वरितानरसिंहयोः ।
शस्त्रानुयक्षिणीनां स्यादघोरास्त्रस्य चक्रतः ॥ ८३ ॥
मन्त्राणां देवतानाञ्च वैरीकरणमीश्वरि ।
कथयामि शृणु प्राज्ञे येन लोकोतिसीदति ॥ ८४ ॥
वैषम्यभजनं पुंसामज्ञानादाशयाथवा ।
तेन मन्त्रा देवताश्च क्रुद्धा हन्युरुपासकम् ॥ ८५ ॥
तस्मात् सर्वस्य लोकस्य मन्त्रवीर्य्यं हि जीवितम् ।
यन्निष्ठानाममी दोषा न स्पृशन्ति कदाचन ॥ ८६ ॥
गुरोः शुश्रूषया काले दीक्षया लब्धमादरात् ।
तदाज्ञया भजेदेकरूपं मन्त्रं स्वसिद्धये ॥ ८७ ॥
अन्यथा साधकं हन्याच्छस्त्रेण रिपुतो भयात् ।
दारिद्र्याद्दीर्घरोगाद्वा व्यसनेष्वतिसर्जनात् ॥ ८८ ॥
यो यो मन्त्रस्तस्य तस्य वर्णौषधिविनिर्म्मिता ।
तत्तद्वर्णोत्थसंख्याभिर्गुलिका मन्त्रसिद्धिदा ॥ ८९ ॥
तयाभिषेकस्तद्धारणं तत्स्वादस्तद्विलेपनम् ।

तत्पूजा च तथा सिद्धिलाभाय स्यान्न चान्यथा ॥ ९० ॥

सितरक्ते चन्दने च मांसै पिप्पलकस्तथा ।

लज्जातुका शिखिशिखा दर्भाः पातलभृङ्गकौ ॥ ९१ ॥

श्रीदेवीति समुद्दिष्टा वायुवर्णौषधानि वै ।

क्रमाद्दशानां वर्णानां तैः कुर्यात्ततदर्च्चनम् ॥ ९२ ॥

लघुश्चन्द्रो सुरो बिल्वोदुम्बरः प्लक्षकस्थथा ।

कृष्णशङ्खप्रसूनञ्च चित्राफान्ता इति क्रमात् ॥ ९३ ॥

वह्निवर्णोषदानि स्युः पत्रं सर्गस्य कीर्त्तितम् ।

तैस्तेषामर्चनं कुर्य्याद्गुरुपादार्च्चने रतः ॥ ९४ ॥

उशीरकुष्ठौ चौरगुहे अश्मरीकाग्निमन्थकौ ।

रोहिणस्तुलसी पोत्री सदामद्रेति च क्रमात् ॥ ९५ ॥

भूमेर्वर्णौषदान्युक्तान्येभिस्तेषां समर्च्चयेत् ।

तत्तत्कार्य्यार्थसंसिद्ध्यै कुर्य्यात् सद्गुरुदक्षिणाम् ॥ ९६ ॥

सलिलं घुसृणं ग्रन्थिपर्णी शोणतृणं तथा ।

कुशो वृहती दुलता दूर्व्वा लक्ष्मीरिति क्रमात् ॥ ९७ ॥

श्रीदेवीति जलार्णानामौशधानि क्रमेण वै ।

तेषां समर्च्चनं कुर्य्यादौषधैरेभिरादरात् ॥ ९८ ॥

कक्कोलञ्च तथा रोचनाकलकिङ्कक ।

सिंही दुन्दूकयुगलमपामार्गाञ्जलिः सह ॥ ९९ ॥

इत्युक्तानि खवर्णानामौशदधानि क्रमेण वै ।
तैस्तेषामर्च्चनं कुर्य्यात्ततत्कार्य्यार्थसिद्धये ॥ १०० ॥
सदाशिवमयी व्याप्तिरिति सम्यक् समीरिता ।
अस्या निफालदाच्चित्ते तत्तत्त्वं स्वात्मसात् कृतम् ॥
इति षोडशनित्यातन्त्रेषु श्रीकादिमते पञ्चत्रिंशत्  पटलं परिपूर्नम् ॥ ३५ ॥

षट्त्रिंशपटलम् ।

अथ षोडशनित्यानां विधानानि त्वयाधुना ।
कथितानि मया तानि श्रुतानि च महेश्वर ॥ १ ॥
तासां ते मे तथान्येषां दैवतानां यथार्थतः ।
स्वरूपं किं कथं विश्वं किमाकारञ्च दृश्यते ॥ २ ॥
प्राणिनां पुण्यपापानि किंरूपाणि च कैस्तथा ।
तेषां जन्मानि केन स्युः का मुक्तिः संसृतिश्च का ॥ ३ ॥
कस्य मुल्तिः कथं बन्धः केन तस्य च मोचनम् ।
किं मूलं संसृतेरस्याः कानि तत्त्वानि का च धीः ॥ ४ ॥
कानीन्द्रियाणि के प्राणाः को जीवः क परस्तथा ।
कः कालः के ग्रहाः सर्वं यथावन्मे वद प्रभो ॥ ५ ॥
येन वेदैश्च शास्त्रैश्च पुराणैरागमैरपि ।
कथये तत् स्फुटं ब्रूहि नातिसङ्कोचविस्तरम् ॥ ६ ॥

यत्त्वया विंशतिविधः कृतः प्रश्नः शिवेऽधुना ।

तेषामुक्तक्रेमेणैव कथयामि तवोत्तरम् ॥ ७ ॥

यैरुत्तरैः स्वस्वरूपं ज्ञायते स्म्यगञ्जसा ।

यदितोऽन्यत्र सर्वत्र प्रोक्तं निह्ववचक्रतः ॥ ८ ॥

अत्राञ्जसा प्रोच्यते तद्दुर्वचं तु निदर्शनैः ।

तैर्म्मयोक्तक्रमाज्जित्वां दुर्जयां वासनां शनैः ॥ ९ ॥

सत्यशुद्धस्फुटाशेषस्फुरत्तात्मा भवेद्ध्रुवम् ।

गुह्यं रहस्यं परमं गोपयेत् सर्वतः सदा ॥ १० ॥

यजज्ञानमिदमो ज्ञानं यज्ज्ञानमहमस्तथा ।

द्वयोरपि च यज्ज्ञानं तज्ज्ञानं विद्धि मे वपुः ॥ ११ ॥

तासां तव तथान्येषां चैतन्यात्म यथार्थतः ।

लाभादेवं वासनाया विनाशादन्यथा तथा ॥ १२ ॥

स्थिरः स्वात्मप्रकाशः स्यान्नितोऽप्रतिभटो महान् ।

नित्याहृदयसंप्रोक्तस्फुटोपायेन वा भवेत् ॥ १३ ॥

शब्दस्य भुद्धैर्द्वैरूप्यात् प्रपञ्चस्य च दृश्यते ।

द्वैरूप्यमनयोरुक्तं सत्यासत्यसम(मय)

त्वतः ॥ १४ ॥

तेनैव प्राणिनां पुण्यपापकर्म्मसु वर्त्तनम् ।

यथात्मजानतोऽर्थेषु व्यापारः पुण्यसंज्ञकः ॥ १५ ॥

अनर्थेष्वर्थसङ्कल्पः पापाख्यो मनसा तथा ।
जन्मानि नानारूपाणि यैर्नित्यं क्लेशभाजनम् ॥ १६ ॥
याथार्थ्ये ज्ञानमर्थानां मुक्तिस्तद्विपरीतता ।
संसृतिम्मोंचनं बुद्धेर्व्वासना वन्ध ईरितः ॥ १७ ॥
कर्म्मक्षयात् सद्गुरोस्तु कटाक्षोक्तिविमर्शतः ।
मोचनं सर्वजन्तूनां नेतरैस्च कदाचन ॥ १८ ॥
संसृतेः कन्दमुदितमविवेकः परो महान् ।
यदायत्तमिदं जीवभुवनं परिवर्त्तते ॥ १९ ॥
तत्त्वानि तत्त्वान्युक्तानि सर्वैः सर्वत्र सर्वदा ।
ज्ञातृज्ञानज्ञेयमयान्यन्यथान्यानि सर्वदा ॥ २० ॥
का च धीरिति यत् पृष्टं तद्दुर्वचमपि स्फुटम् ।
कथयामि शृणु प्राज्ञे यदायत्ता च विंशतिः ॥ २१ ॥
भनोबुद्धिरहङ्कारचित्तमित्यादि नामभिः ।
वस्तुभेदादभेदाच्च यदुक्तं सर्वतः सदा ॥ २२ ॥
तदेकमक्षयं स्थूलं सूक्ष्मं दुज्ञमतिस्फुटम् ।
विषमञ्च समं विश्वं विश्वातीतमनामयम् ॥ २३ ॥
अरुपं सर्वरूपञ्च सर्वक्लेशकरं हरम् ।
सर्वतृष्णाकरहरं सर्वेषां सर्वतः सदा ॥ २४ ॥
सत्त्वरूपं रजोरूपं तमोरूपमतन्मयम् ।

संसाररूपमुत्तीर्णविग्रहं सुस्थिरं चलम्॥ २५॥

अपापं पापरूपञ्च जीवरूपं परात्मकम्।

अतीन्द्रियं चेन्द्रियात्मनिर्देश्यं (वं)

सर्वदैवतम्॥ २६॥

सर्वक्षोभात्मकं सर्वशाक्तिरूपञ्च निर्दयम्।

सदयञ्चाविवेकात्म विवेकपरमार्थकम्॥ २७॥

उत्तारकं पातनकृद्धङ्गरूपं जयात्मकम्।

शोकात्मकञ्च निःशोकं सकौतुकमकौतुकम्॥ २८॥

निरुद्यमं सदोद्युक्तं सावलेपमगर्वकम्।

अमर्शरूपमक्षोभ्यं सर्वक्षोभ्यं सुखासुखम्॥ २९॥

क्रोधलोभमदद्रोहमात्सर्य्यकामविग्रहम्।

अस्पृष्टषड्गुणं षण्डः वनिता पुरुषस्तथा॥ ३०॥

अपकृष्टं तथोत्कृष्टं स्वच्छाकारं तथाविलम्।

अगाधमतिगम्भीरमुदारं कृपणन्तथा॥ ३१॥

भाग्यरूपमभाग्यात्म निर्भयं सभयं तथा।

अनिच्छमिच्छारूपञ्च  कातरं वीरविग्रहम्॥ ३२॥

निर्दोषः सर्वदोषात्मा सर्वविन्मूढविग्रहः।

सङ्कोचरूपः सर्वेषां तथा सर्वप्रकाशकः॥ ३३॥

अस्तेयरूपस्तेयात्म वश्योऽवश्यश्चरो मृदुः।

सरसं विरसं क्रूरं सौम्यं तैर्बहुभिस्तु किम् ॥ ३४ ॥
त्वन्मयी धीः समाख्याता मन्मयी चिदुदीरिता ।
उभैक्याद्विवेकात्म जीवोऽन्यस्तद्विवेकवान् ॥ ३५ ॥
तस्यास्तु बुद्धेर्यो वेत्ति याथात्म्यं विकृतीरपि ।
सामर्थ्यं स्वाविभेदत्वं सिद्धे प्राप्यफलानि च ॥ ३६ ॥
योगी ज्ञो ब्रह्मविज्ञानी शिवयोगी तथात्मवित् ।
तेनैव विहितं सर्वं प्रपञ्चात्मैक्यविग्रहम् ॥ ३७ ॥
स्वात्मनस्तु मनो वृत्त्या विषयग्रहणाय वै ।
सृष्टानि भूतशक्त्यात्मविग्रहाणीन्द्रियाणि तु ॥ ३८ ॥
भूतात्मबुद्धिसं घातशक्तिचैतन्यजृम्भणम् ।
प्राणास्तत् साक्षिभूतो हि जीवस्तत्त्वात्मकः परः ॥ ३९ ॥
कालस्तु पूर्वं बुद्धेर्यदुक्तं गुणसमस्तवान् ।
काल इत्युक्षरद्वन्द्वाद्यद्वाच्यं तद्वपुर्म्मम ॥ ४० ॥
न शक्यतेऽञ्जसा वक्तुं तथा दर्शयितुं तव ।
तथापि तव यत्किञ्चिद्व्याकरोमि समञ्जसा ॥ ४१ ॥
अहोरात्रादिभेदस्तु चन्द्रार्कादिसमन्वयात् ।
तेन तन्मयतारूपकथनं नोचितं ततः ॥ ४२ ॥
लवत्रुट्यादयो यत्तद्भाष्यन्ते खण्डकास्तु तत् ।
कालस्य रूपं तत् प्रोक्तं यदनाद्यन्तविग्रहम् ॥ ४३ ॥

लवत्रुट्यादिकं ब्रूहि यैः कालो ज्ञायते मया ।
नलिन्या पत्रनिचये सूचीविद्धेऽथ तस्य वै ॥ ४४ ॥
एकैकदलभेदोत्थावस्था लव उदाहृतः ।
तत्त्रिंशद्गुणितं प्रोक्तं त्रुटीत्यादिशरीरवान् ॥ ४५ ॥
काल इत्युदितं तस्य स्वरूपं किं कथं भवेत् ।
इति पृष्टेन तद्वक्तुं शक्यते सुस्फुटं मया ॥ ४६ ॥
स्वबुद्ध्या प्रोक्तमात्रस्य भावनाद्यत्तु लभ्यते ।
तत्तस्य वपुरुद्दिष्टं नान्यास्ति गतिरत्र वै ॥ ४७ ॥
ग्रहास्तु चिन्मयाः काले क्वापि चक्रभ्रमात् पुनः ।
भूतादीनि समस्तानि विकृतानि वितन्वते ॥ ४८ ॥
नानाविधास्तथाकाराः प्रपञ्चो दृश्यते सदा ।
तैरेव तेषां नाशश्च मरुतेव हविर्भुजः ॥ ४९ ॥
प्रश्नानामुत्तरं देव त्वया च कथितं विभो ।
तथापि मे प्रपञ्चात्मविवेकोऽभून्न मेऽधुना ॥ ५० ॥
जननं मरणञ्चेति द्वयं कस्य कथं भवेत् ।
अरूपस्य विभोस्तस्य जीवश्चेत्तत् कथं स्थितिः ॥ ५१ ॥
कुतः स्थितिः कथं वा स्यात्तत्कालपरमात्मनोः ।
मुक्तो वा जायते किन्तु परे वा सम्भवन्ति किम् ॥ ५२ ॥
कथं वा पञ्चभूतानां स्थितिर्देहेषु वान्यतः ।

देहेषु जीवसंप्राप्तिः कीदृशीत्यादि मे वद ॥ ५३ ॥

येन श्रुतेन चित्ते मे शुश्रूषान्यस्य नो भवेत् ।

तथा मे सर्वसन्देहांश्छिन्धि पूर्णोपदेशतः ॥ ५४ ॥

प्रागुक्तबुद्धिवैविध्यारब्धकर्म्मविपाकतः ।

जननं मरणञ्चेति द्वयं देहपरिग्रहात् ॥ ५५ ॥

प्रतप्तलोहपिण्डेऽग्निस्थितिवत् परविश्वयोः ।

अवस्था कालपरयोस्तादात्म्यादेव वर्त्तनम् ॥ ५६ ॥

मुक्तास्तु जीवा न कदाप्याविर्भूयुः कुतश्चन ।

न वापूर्व्वाः सम्भवन्ति बुद्धेः कृत्यमशेषतः ॥ ५७ ॥

मुद्रिकारूपमुद्रेव मधूच्छिष्टादिविग्रहम् ।

जीवादिरूपतो बुद्धिर्विशेषयति तत्प्ररम् ॥ ५८ ॥

भूमेरेवास्फुटं स्थानं कुतश्चित् सुस्थिरं सदा ।

जलाग्न्योस्तत्र चान्यत्र व्यक्ताव्यक्तस्थितिः सदा ॥ ५९ ॥

वायोः सर्वत्र सततमवस्थानं त्वनेकधा ।

व्योम सर्वगमेव स्यात् कालताद्रूप्यतः सदा ॥ ६० ॥

देहेषु सस्फुटं तेषामवस्थानन्तु पञ्चधा ।

जीवानामागतिर्देहे मातापित्रोस्तु वीर्य्यतः ॥ ६१ ॥

तादात्म्यं सङ्गतं तत्र जृम्भते सा चिदात्मका ।

तत्र प्रारव्धविरमान्मरणं निद्रया समम् ॥ ६२ ॥

सिद्धानां सर्वदा देहत्यागे भेदो न विद्यते।
प्रागेव तस्य देहात्मविवेकान्मनसि स्वगे॥ ६३॥
नेतरेषां स साध्यानां साधकानाञ्च कालतः।
पुष्यादिषु तु मासेषु षट्सु राकोपकण्ठतः॥ ६४॥
मरणं सुगैत्वस्य ज्ञापकं सुगतिस्फुटम्।
सिद्धस्तु पूर्वतो मुक्तो देहेन्द्रियमनःस्थिरः॥ ६५॥
यतस्तेनास्य निधनं सर्वदा सर्वतस्तथा।
सुगतित्वं व्यन्यत्त्येव जीवन्मुक्तो यतस्त्वयम्॥ ६६॥
देहवत्त्वे समानेऽपि प्रणिनां सर्वतः सदा।
बुद्धेर्वैविध्यरूपस्य कारणं किं वद प्रभो॥ ६७॥
भूमिष्ठत्वे समानेपि तोयानां रसभेदवत्।
जायते त्वाश्रयवशात् स च कर्म्मभिरेव वै॥ ६८॥
यथाश्वत्थगतो वह्निरुपायैरितरैः क्वचित्।
नोपलभ्यो भवेत् शुष्कमथनव्यापृतिं विना॥ ६९॥
तथात्मज्ञानसंप्राप्तिः सद्गुरुप्राप्तितो विना।
न कस्यापि भवेदेषा प्रतिज्ञा विश्वतोऽनिशम्॥ ७०॥
खननाद्भूगतं तोयं यथा समुपलभ्यते।
तथा सद्गुरुसंसेवां संप्राप्य स्वस्वरूपकम्॥ ७१॥
सद्गुरोः पादसेवातः सम्प्राप्तात्मस्वरूपिणः।

विशेषः को भवेदन्यदुर्लभः  सत्यविग्रहः ॥ ७२ ॥

आभिरूप्यमसन्देहः सन्तोषः परिपूर्णता ।

दयार्द्रचित्तता रागद्वेषाविषयचित्तसा ॥ ७३ ॥

सुलभत्वमगर्वित्वं सदा नियतशीलता ।

कृतज्ञता सत्यता च परचिन्तानिवर्त्तनम् ॥ ७४ ॥

आर्जवञ्चावित्तलौल्यं विषयानतिसङ्गिता ।

अदैर्घ्यसूत्र्यमक्षौद्यं नात्यगाधाशयात्मता ॥ ७५ ॥

वृथालापेष्टशक्तिश्च वृथाव्यापारवर्जनम् ।

वृथाविनोदराहित्यं जिह्मचित्तैरसङ्गतिः ॥ ७६ ॥

पुरुषार्थार्थकथनचिन्ताकरणकौतुकम् ।

अस्तेयशक्तिरास्तिक्यं परलोकानुचितनम् ॥ ७७ ॥

देवतापूजनस्तोत्रवैभवालापशीलता ।

पापानां वर्जनं पुण्यकरणे कौतुकं सदा ॥ ७८ ॥

परस्तबननिन्दासु विरतिर्वीतरागिता ।

निस्पृहत्वमलोलत्वमनाक्षेपोऽजडात्मता ॥ ७९ ॥

अगोपनं स्वभक्तानामभक्तानाञ्च गोपनम् ।

गुरुविद्यागमाचारस्तवनं तत्प्रवर्त्तनम् ॥ ८० ॥

सिद्धचिह्नानि चैतानि भवन्त्यात्मवतां ध्रुवं ।

न भवन्तीतरेषान्तु प्रद्विषन्त्येव तांश्च ते ॥ ८१ ॥

तत्कृत्यं शृणु वक्ष्येऽहं यो लब्धस्वात्मवैभवः ।
निरस्ताशेषसंसारसौख्याज्ञानाविवेकवान् ॥ ८२ ॥
देशकालकुलाचारान् गुरुराजादिकल्पितान् ।
पालयन् सुस्मितमुखः पूजापूजनकौतुकी ॥ ८३ ॥
देहस्थैर्य्यं तथाज्ञानं व्यापारान् कालतः क्षणात् ।
पतितान्वन्दुचित्ताज्ञादुर्लङ्घ्यान् स्वचयस्थितीम् ॥ ८४ ॥
स्वेन्द्रियाणाञ्च सामर्थ्यं स्वकर्म्माणि कृतानि च ।
मुहुर्मुहुश्च विमृशेद्विग्मेदशुभात्मनः ॥ ८५ ॥
था न कालं गमयेद्द्यूतस्त्रीस्वापवादतः ।
गमयेद्देवतापूजाजपयोगस्तवादिना ॥ ८६ ॥
गुरोः कृपालापकथास्तोत्रागमविकोकनैः ।
गमयेदनिशं कालं न वदेत् परदूषणम् ॥ ८७ ॥
प्रत्यक्षे च परोक्षे च स्तुवीत प्रणभेद्गुरुम् ।
तद्गुणैस्तत्कृपाधिक्यैः पुण्यैश्वर्य्यैश्च सत्यतः ॥ ८८ ॥
रागलोभमदक्रोध पापपैशुन्यवर्जनैः ।
सन्तोषाचारनित्यमशान्तिज्ञानादिभिस्तथा ॥ ८९ ॥
मिताहारो मितालापो विविक्तसमवर्त्तिता ।
नित्याचिन्ता स्वात्मशुद्धिः कृत्यमात्मवतां सदा ॥ ९० ॥
पूर्वोक्तद्वादशास्त्रस्य मध्ये कृत्वा यथाविधि ।

योनिं तन्मध्यतो देवीं ललितां पृष्ठतो गुरून्॥ ९१ ॥

पार्श्वयोरायुधान्यष्टौ कोणेषु परितः क्रमात्।

कामेश्वर्य्यादिकास्तत्र तद्बहिर्द्वादशस्वपि ॥ ९२ ॥

द्वादशान्या यजेत्तत्तन्नित्याविद्याभिरेव वा।

तन्नामविद्याभिर्वा ताः पूजयेत् सार्धकल्फनम्॥ ९३ ॥

सन्ध्यात्रयं षष्तिसंख्यं जपेत्तद्दिनविद्यया।

नान्यत् कृत्यं भवेत्तस्य नित्यनैमित्तिकादिकम्॥ ९४ ॥

तन्मध्ये नवयोनिं वा विधायात्रस्थशक्तिभिः।

पूजयेत् प्राग्वदुभयप्रकारादेकयोगतः ॥ ९५ ॥

यावज्जीवं विधिस्त्वेष गदितः सिद्धये सदा।

सिद्धानामपि सर्वेषां येनासौ स्वात्मवानभूत्॥ ९६ ॥

समस्तमेतत्तन्त्रन्ते कथितं परमेश्वरि।

यत्परामर्शतो भावस्त्वावयोरैक्यमश्नुते ॥ ९७ ॥

तद्द्यात्तन्त्रमेतत्तु नाभक्ताय कदाचन।

नाशिष्याय न दम्भाय प्रच्छन्नानयशीलिने ॥ ९८ ॥

नायाचते नास्तिकाय न लुब्धाय न मानिने।

न पापाय न वित्ताय नादक्षाय च भेदिने ॥ ९९ ॥

यस्तन्त्रमेतत् सकलं नित्याविद्यास्तु षोडश।

शक्त्य संगृह्य विधिवद्भजते स मदंशकः ॥ १०० ॥

शिवतत्त्वमयी व्याप्तिरिति सम्यक् समीरिता ।

अस्या निफालनाच्चित्ते तत्तत्त्वं स्वात्मसात् कृतम् ॥ १००१ ॥

इति षोडशनित्यातन्त्रेषु श्रीकादिमते तन्त्रराजे स्वात्मकथनं नाम षट्त्रिंशत् पटलम् परिपूर्णम् परामृष्टम् ॥ ॐ तत् सत् ॥

॥ ३६ ॥ ॐ तत् सत् ॥